

आज़ादी का अमृत महोत्सव

# संस्कृतभाषा पाठ्यपुस्तकम्

## वेदविभूषणप्रथमवर्षम् / उत्तरमध्यमा प्रथमवर्षम् / कक्षा एकादशी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

लोभात्क्रोधः प्रभवति, क्रोधाद्द्रोहः प्रवर्तते । द्रोहेण नरकं याति, शास्त्रज्ञोऽपि विचक्षणः ॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥
क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।
तन्मे मनः शिवसङ्कल्पमस्तु ।
कस्मै देवाय हविषा विधेम ?
किं किं न साधयति कल्पलतेव विद्या ?
अनभ्यासे विषं विद्या ।
समय एव करोति बलाबलम् ।
महीयांसः प्रकृत्या मितभाषिणः ।












महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)
(भारतसर्वकारस्य शिक्षामन्त्रालयः)
Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

# संस्कृतभाषा

## पाठ्यपुस्तकम्

वेदविभूषणप्रथमवर्षम् / उत्तरमध्यमा प्रथमवर्षम् / कक्षा एकादशी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)


**महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी (म.प्र.)**

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

| | | |
|---|---|---|
| मार्गदर्शकः | : | प्रतिष्ठानस्य माननीयः सचिवः प्रो. विरूपाक्षः वि. जड्डीपालो महाभागः |
| विशेषज्ञाः | : | .............. |
| लेखकगणः | : | श्री शेषराज रेग्मी, श्री यतिराज सापकोटा, श्री सुकान्त प्रामाणिक |
| आवरणं सज्जा च | : | .......... |
| चित्राङ्कनम् | : | ........... |
| यान्त्रिकसहयोगः | : | .......... |
| अक्षरविन्यासः | : | ......... |


© महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी

| | | |
|---|---|---|
| मूल्यम् | : | ...... |
| संस्करणम् | : | ......... |
| प्रकाशिताः प्रतिकृतयः | : | ........... |
| पत्रस्य उपयोगः | : | ८० जी.एस.एम. पत्रे मुद्रितम् |
| प्रकाशकः | : | महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् |

(भारतसर्वकार- शिक्षामन्त्रालस्य स्वायत्तशासि संस्थानम्)

email : msrvvpujn@gmail.com,

Web : msrvvp.ac.in

दूरभाषा (०७३४) २५१००७८

# प्रस्तावना

## (2020 राष्ट्रियशिक्षानीतेः आलोके)

राष्ट्रियवेदविद्याप्रतिष्ठानस्य स्थापनां भारतसर्वकार-शिक्षामन्त्रालयः (उच्चतरशिक्षाविभागः) माननीयस्य शिक्षामन्त्रिणः (तदानीन्तन-मानवसंसाधन-विकासमन्त्रिणः) अध्यक्षतायां नवदेहल्यां 1987 वर्षे जनवरीमासस्य 20 दिनाङ्के 1860 सोसायटीपञ्जीकरणाधिनियमान्तर्गततया अकरोत्। भारतसर्वकारः वेदानां श्रुतिपरम्परायाः संरक्षणाय, संवर्धनाय, विकासाय, प्रचाराय, प्रसाराय च प्रतिष्ठानस्य स्थापनायाः संकल्पनं 6-3/85-SKT-IV पत्र-संख्यया 30-03-1987 दिनाङ्के भारत-राजपत्रेऽधिसूचनया प्राकाशयत्। संस्थापना-स्मरणपत्रे सस्वरवेदाध्ययनस्य, श्रुतिपरम्परायाः च संरक्षणाय, वैज्ञानिकरीत्या वेदार्थानां व्याख्यानाय च दायित्वं वेदविद्याप्रतिष्ठानाय प्रदत्तम् आसीत्। 1993 तमे वर्षे मई-मासे राष्ट्रियवेदविद्याप्रतिष्ठानस्य उज्जयिन्यां स्थानान्तरणानन्तरं प्रतिष्ठानस्य नाम महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् इति परिवर्तितम् अभूत्। सम्प्रति प्रतिष्ठानमिदं मध्यप्रदेशसर्वकारेण प्रदत्तायां 23.6 एकड-भूमौ महाकालमन्दिरात् 6 किलोमीटरदूरे उज्जयिनी-नगर्याम् प्रतिष्ठितम् अस्ति।

1986 राष्ट्रियशिक्षानीतौ, 1992 संशोधितशिक्षानीतौ, 1992 कार्यप्रणाल्यां- (प्रोग्राम ऑफ एक्शन) च वैदिकशिक्षायाः संवर्धनार्थं राष्ट्रियवेदविद्याप्रतिष्ठानाय अखिलभारतस्तरीयम् उत्तरदायित्वं प्रदत्तम् अस्ति। भारतस्य प्राचीनज्ञानभाण्डागारस्य, ज्ञानविज्ञानकोषस्य, मौखिकपरम्पराणां शिक्षाप्रदानाय च गुरुशिष्य-परम्परानुरूपं पारम्परिकगुरूणां नियोजनोद्देश्यं 1992 शिक्षानीतेः कार्यप्रणाल्यां (प्रोग्राम ऑफ एक्शन) उल्लिखितमासीत्।

राष्ट्रस्य आकाङ्क्षानुरूपं, राष्ट्रियस्तरे वेदस्य संस्कृतस्य च शिक्षणार्थं, मानकीकृतपरीक्षार्थं च बोर्ड-इत्यस्य स्थापनायाः पक्षे राष्ट्रियसहमतेः, जनादेशस्य, शिक्षणनीतेः, विशिष्टोद्देश्यानां कार्यान्वयन-व्यूहस्य चानुरूपं भारतसर्वकारस्य शिक्षामन्त्रिणाम् अध्यक्षतायां महासभायाः शासिपरिषदश्च समावेशे "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृत-शिक्षाबोर्ड्" इत्यस्य स्थापना 2019 तमे वर्षे अभवत्। प्रतिष्ठानस्य नियमावल्यनुरूपं वेदसंस्कृतशिक्षाबोर्ड् अपि वैवेदशिक्षाया एकः

भागः, तथा प्रतिष्ठानस्योद्देश्यानां पूर्तये नियमेषु संकल्पना च कृता वर्तते। “महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृतशिक्षाबोर्ड्” इत्यस्य कृते भारतसर्वकारात् भारतीयविश्वविद्यलयसंघात्, केन्द्रीयमाध्यमिकशिक्षाबोर्ड् इत्यस्मात्, राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषदः च मान्यता प्राप्ता वर्तते।

भारतसर्वकारस्य शिक्षामन्त्रालयेन 2015 तमे वर्षे श्री एन्. गोपालस्वामी, ऐ.ए.एस् (प्रधान-निर्वाचनायुक्तचरः)-महोदयस्य आध्यक्ष्ये संरचितया समित्या “संस्कृतस्य विकासाय दूरदृष्टिः पथप्रदर्शनं च-दशवर्षाणां परिप्रेक्षायां योजना” इत्यनया अनुशंसितं यत् उच्चतरमाध्यमिकस्तरपर्यन्तं वेदसंस्कृतविषयकशिक्षणस्य पाठ्यक्रमाणां मानकीकरणाय, संवर्द्धनाय, परीक्षामान्यतायै, प्रमाणीकरणाय “वेद-संस्कृतशिक्षाबोर्ड्” इत्यस्य झटिति स्थापना आवश्य करणीया। प्राथमिकस्तरे वेदस्य संस्कृतस्य चाध्ययनम् अभिप्रेरकं, सम्प्रेरकम्, आनन्ददायकं च भवेत् । आधुनिकशिक्षाबोर्ड-व्यवस्थायां पाठ्यमानानाम् आधुनिक-विषयणाम् अपि वेद-संस्कृतपाठशालासु सम्यक् मिलित्वा अध्यापनम् आवश्यकम्। साम्प्रतिकसमाजस्य आवश्यकतानां संपूर्तये, प्राचीनज्ञानस्य सम्यक् उपयोगं कृत्वा वेद-संस्कृतपाठशालानां पाठ्यक्रमसामग्र्यः आधुनिकसमस्यानां निवारणोपायान्वेषणाय विकसिताः स्युः इति च समितेः अनुशंसा आसीत् ।

संस्कृतस्य आधुनिकविषयाणां च सुमेलनेन स्तरानुगुणं पाठ्यसामग्र्याः विकासपुरस्सरं सस्वरवेदपाठे कौशलसंवर्धनस्य, वेदकण्ठस्थीकरणे, वेदमन्त्रोच्चारणे च अखिलभारतस्तरे मानकीकरणस्यावश्यकता वर्तते । यतो हि वेदच्छात्रा अन्ततोगत्वा वेदभाष्याणाम् अध्ययने, वेदार्थचिन्तने समर्था भवेयुः। वेद-संस्कृत-छात्राणां वृत्तिप्राप्ति-लक्ष्यं मनसि निधाय मुख्यधारायाम् अपि भावि अध्ययनं सुशकं भवेत्। समुचितस्तरे वेदविकृतिपाठानामध्ययने ध्यानं दात्तव्यम् इति च वेदपाठशालानां सम्बन्धे समितिः संस्तुतवती। वेदानां सस्वरपाठः आभारतं सर्वत्र राज्येषु समानरूपेण नास्ति इति हेतोः समितेः सदस्यैः चिन्ता प्रकाशिता। अतः वेदानां सस्वरपाठस्य शैल्यादीनां, शिक्षणपद्धतेश्च क्षेत्रीयविविधतानामुपरि हस्तक्षेपम् अकृत्वा

विद्यामानायाः स्थितेः समाधानाय, समीकरणाय शीघ्रं समुचितव्यवस्था प्रतिष्ठानेन करणीया इति च वेदपाठशालानां सम्बन्धे समितिः संस्तुतवती ।

वेदः संस्कृतं चेति द्वयम् अविभक्तम्, एकम् अपरस्य उपोद्बलकं च वर्तते। परं तु आभारतं समेषां वेदपाठशालानां संस्कृतपाठशालानां च परीक्षा-मान्यतायाः, सम्बद्धतायाः च समस्या चिरकालात् सम्मुखं वर्तते, एतदर्थं वेद-संस्कृतयोः परीक्षादिविषये सहैव राष्ट्रस्तरे वेदसंस्कृतबोर्ड् इत्यस्य स्थापना भवेत्। समितिः एतदपि संस्तुतवती यत् बोर्ड-माध्यमेन आयोजयिष्यमाणा परीक्षा विधिसम्मता सर्वकारेण मानिता च भवेत्, शिक्षाया आधुनिकबोर्ड् प्रणाल्या तुल्या च भवेत्। समित्या एवमपि अनुशंसा कृता यत् "महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्" "महर्षिसान्दीपनि-राष्ट्रियवेदसंस्कृतविद्यापरिषद्" इति परीक्षा बोर्ड् संज्ञया उद्घोषितं मानितं च भवेत्, एतस्य मुख्यालयः उज्जयिनी भवेत्। परीक्षाबोर्ड् कार्याणि अतिरिच्य अद्यावधि प्रचलितानां वेदप्रसार-प्रचार-संवर्धन-कार्यक्रमाणाम् अन्येषां वेदाध्ययन-संवर्धन-गतिविधीनाञ्च सञ्चालनं प्रतिष्ठानस्य पक्षतः एव यथापूर्वं भवेत् इति समितिः संस्तुतवती ।

वेदशिक्षायाः संचालनं, संवर्धनं, प्रचारः च भारतस्य गौरवशालिज्ञानपरम्पराया एकं सुविस्तृतं व्यापकं च अध्ययनमस्ति । वेदाध्ययने (संहिताः, विकृतिपाठाः, स्वराणां सम्यक् प्रयोगः ज्ञानादयश्च) सस्वरपाठकौशलम्, मन्त्रोच्चारणम्, संस्कृतज्ञानप्रणाल्याः बहुस्तरीया श्रुतिपरम्परा सम्मिलिता भवति। 2020 राष्ट्रियशिक्षानीतेः (NEP-2020) अनुरूपं पुनर्व्यवस्थापितायां 3 + 4 सप्तवर्षीयायां प्रतिष्ठानस्य पाठ्यक्रमयोजनायां वेदाध्ययननिरतान् पारम्परिकच्छात्रान् मुख्यधारायाम् आनेतुं नीतेः दृष्टौ आधुनिकविषयाः यथा-संस्कृतम्, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः इत्यादयः विषयाः नीतिनिर्धारकनिकायेषु वैदिकशिक्षाया उपरि राष्ट्रियसम्मत्यनुरूपम् उपलब्धसमयाधारेण पाठ्यक्रमानुरूपम् अध्येयाः विषयाः समावेशिताः। रा.शि.नी. 2020 इत्यस्य अनुसरणाय प्रतिष्ठानेन प्रवर्तिता अध्ययनस्येयं विशिष्टा

पाठ्यक्रमयोजना भारतीयज्ञानप्रणाल्याः पाठ्यक्रमसामग्रीषु आधुनिकज्ञानविज्ञानैः च सह भारतीयचिन्तनधारायाः, वैदिकज्ञानस्रोतसः च उपयुक्तज्ञानसामग्रीणां समायोजनं वर्तते।

प्रतिष्ठानस्य बोर्ड्-सम्बद्धानां पाठशालानां, गुरुशिष्य-इकाई-इत्यादीनां, गुरुकुलानां च पाठ्यक्रमस्य आधारभूतः मुख्यः विषयः भवति सम्पूर्णवेदशाखाया कण्ठस्थीकरणेन सह सस्वराध्ययनम्। तेन सह नियमानुरूपं संस्कृतभाषा व्याकरणं च, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, समाजोपयोगि-उत्पादकविषयाः (SUPW) इत्यादयः पञ्चान्यूनं यथाचयनं विषया भवन्ति।

इतिहासविद्भिः विदितो विषयो वर्तते यत् महर्षेः पतञ्जलेः काले ऋग्वेदस्य 21 शाखाः, यजुर्वेदस्य 101 शाखाः, सामवेदस्य 1000 शाखाः, अथर्ववेदस्य च 9 शाखाः चेति वेदानां 1131 शाखा आसन्। याते काले बह्वीनां वेदशाखानाम् अध्येतृपरम्परायाः लोपात् बह्व्यः शाखाः कालकवलिता अभूवन्, सम्प्रति केवलं 10 शाखाः अवशिष्यन्ते, तेषु ऋग्वेदस्य एका, यजुर्वेदस्य चतस्रः, सामवेदस्य तिस्रः, अथर्ववेदस्य च द्वे शाखे सस्वरपाठपरम्परायां समुपलभ्यन्ते। एतासामुपरि एव भारतीयज्ञानप्रणाली आश्रिता वर्तते। एतासां 10 शाखानां कण्ठस्थीकरणेन सस्वर-पाठेषु प्रवीणाः पण्डिताः ये वेदपाठपरम्परां वेदज्ञानपरम्पराञ्च पूर्णरूपेण प्राचीनपद्धत्या च संरक्षितवन्तः ते विरला एव तथा अध्येतारोऽपि न्यूनमात्रया एव सन्ति । यावत् श्रुतिपरम्परानुसारेण कण्ठस्थीकरणपूर्वकं वेदशिक्षाम् आश्रित्य मूलरूपेण चिन्तनं न क्रियते, दृष्टिः न दीयते तावत् वेदशिक्षाव्यवस्था सुदृढा न भवति। सामान्यविद्यालयीयाध्ययने वेदस्य सस्वरपरम्पराया अध्येयविषयत्वेन अध्यापनं न भवति, न तु विद्यालयीयपाठ्यक्रमे वेदपाठ्यक्रमसमायोजनाय सञ्चालनाय वा विशेषज्ञता सामान्यबोर्ड्-मध्ये वर्तते। केवलं मुद्रितवेदपुस्तकवाचनं पारम्परिकं वेदाध्ययनं नैव भवति। अत एव एषा स्थितिः वर्तते।

वेदछात्राः ये श्रुतिपरम्परया सस्वरं वेदं गुरुमुखात् परम्परया अधियन्ति, ते सुदूरे ग्रामेषु नगरेषु वा स्थितेषु वेदगुरुकुलेषु, आश्रमेषु, पाठशालासु वा निवसन्ति, पठन्ति च। वेदाध्ययनाय वेदविद्यार्थिनः प्रतिवर्षम् अन्यूनं 1900-2100 होराः उपयुञ्जते। ते आधुनिक-

विद्यालयीयशिक्षणप्रणालेः समयात् द्विगुणितं समयं वेदाध्ययनाय उपयुञ्जते। वैदिकछात्राः गुरोः सम्मुखम् उपविश्य शब्दशः वेदोच्चारणशिक्षणं प्रप्नुवन्ति, वेदस्य एकैकं शाखायां स्वाध्यायविधया सस्वरम् उच्चारणेन सह कण्ठस्थीकरणमपि अवश्यं कुर्वन्ति। आधुनिकान् च विषयान् यथासामर्थ्यम् अधियन्ति।

अत्रेदं ज्ञातव्यं भवति यत् वेदाध्ययनस्य, वेदमन्त्राणां पाठविधेः, गुरुशिष्ययोर्मध्ये प्रचलितायाः अनूचानायाः वेदानां श्रुति-परम्परायाः, पाठपरम्परायाः एव कारणात् वेदानां श्रुतिप्रचालितं मौखिकप्रसारणं मानवताया अमूर्तसांस्कृतिकनिधिरूपेण विश्वसंस्थायाः यूनेस्को (UNESCO) इत्यस्य मौखिकसांस्कृतिकनिधेः सूच्यां मानितं विद्यते। अतः वैदिकशिक्षायाः प्राचीनताम् अखण्डतां च चिरकालं स्थापयितुं योग्या फलप्रदात्री कार्यनीतिः आवश्यकी वर्तते। अतः प्रतिष्ठानं, प्रतिष्ठानस्य बोर्ड् च 2020 राष्ट्रियशिक्षानीतौ निर्दिष्टैः कौशलविषयैः, व्यावसायिकविषयैः,आधुनिकविषयैः च सह यथा- संस्कृतम्, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, सङ्गणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, इत्यादिभिः मिलित्वा विशिष्टं सस्वर-वेदपाठ्यक्रमं सर्वासु उपलब्धशाखासु सञ्चालयति, स पाठ्यक्रमः सर्वकारेण मानितः, सर्वकारेण मानितं बोर्ड्-प्रमाणपत्रं च प्रदीयते।

वेदितव्ये परा अपरा चेति द्वे विद्ये अधीत्य मानवः सुखीभवति। अस्मिन् प्रपञ्चे अधीता विद्या अविद्या च सुखेन जीवनयापनार्थं मनुष्यान् समर्थान् करोति, परलोके मुक्तियोग्यान् च विधत्ते। वेदे वर्णितानां भौतिकानां विषयाणां ज्ञानं, भौतिकज्ञानस्य साहाय्यशाखाः, भौतिकरुच्यनुगुणाः विषयाः च अपरा विद्येति नाम्ना कथ्यन्ते। उपनिषत्सु प्रतिपादितम् आत्मचिन्तनम् आत्मनः अन्वेषणं च परा विद्येति नाम्ना कथ्यते। प्राचीनभारते प्रसिद्धाः, वेदाः सहयोगिन्यः ज्ञानविषयिण्यः विद्याः चतुर्दश (14) वर्तन्ते। ता यथा- चत्वारः वेदाः, षड्वेदाङ्गानि, पुराणानि, न्यायः, मीमांसा, धर्मशास्त्रं च । चतुर्दशभिः विद्याभिः सह आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रम् (स्थापत्यवेदः वा) इति चतुरः उपवेदान् संयोज्य 18 विद्याः वर्तन्ते। सहस्रशः वर्षेभ्यः अत्र भरतखण्डे भारतभूमौ सर्वेषां ज्ञानानां, विज्ञानानां, शिक्षणस्य च भाषा

संस्कृतभाषा आसीत्, यतो हि अस्मिन् भरतखण्डे भारतमहाद्वीपे भारतभूखण्डे दीर्घकालं यावत् एकमात्रं भाषितभाषा संस्कृतभाषा एव आसीत्। तस्मात् तदा वेदार्थानां सुलभतया ज्ञानाय जनाः समर्थाः एव आसन्।

प्राचीनस्य तक्षशिला-विश्वविद्यालयस्य विषये वयं सर्वे श्रृणुमः एव। तत्र अष्टादश (18)-शिल्पानां, प्रौद्योगिकविषयाणां च अध्ययनम् अध्यापनं च प्राचलत्, आनुभविकं प्रयोगपूर्वकं शिक्षणं प्राचलत् इति च वयं जानीमः एव। छान्दोग्योपनिषदि[1] केषुचित् नीतिशास्त्रग्रन्थेषु च एतासां विद्यानां विवरणं लभ्यते। तदनीन्तनाः ते 18 व्यावसायिकपाठ्यविषया अद्यापि अध्ययनयोग्यविषया इति ज्ञायन्ते । ते यथा- 1. गायनसङ्गीतम् 2. वाद्यसङ्गीतम् 3. नृत्यम् 4. चित्रकला 5. लेखशास्त्रम् 6. अभियान्त्रिकी 7. मूर्तिकला 8. प्रसूतितन्त्रम् 9. वाणिज्यम्, 10. गणितम् 11. आयुर्वेदः, चिकित्सा 12. कृषिः 13. रथनिर्माणम्, परिवहनम् 14. राज्यशासनम्, प्रशासनिकप्रशिक्षणम्, 15. धनुर्विद्या, दुर्गनिर्माणम्, सैन्यकला च, 16. विविध-वस्तुनिर्माणम्, उत्पादनं च , 17. सर्पविद्या 18. गुप्तनिधेरन्वेषणम् । उपर्युक्तासु कलासु शिल्पेषु च अभियान्त्रिक्याः शिक्षणाय, कौशलसम्पादनाय च प्राचीनकाले प्रशिशिक्षुप्रणाली विकसिता आसीत्।

समग्रे विश्वे प्राचीनसभ्यतासु सर्वदौ गण्यमानायां भारतीयसभ्यतायां शास्त्राणां, ज्ञानस्य, विज्ञानस्य, प्रौद्योगिक्याः च शिक्षणस्य विशाला सुदृढा च परम्परा वर्तते । भारतं प्राचीनकालादेव ऋषीणां, ज्ञानिनां, विदुषां वैज्ञानिकानां च भूमिः अपि वर्तते। अनुसन्धानैः इदं ज्ञातं यत् भारतं विद्यानाम् (विद्या आध्यात्मिकं ज्ञानम् , अविद्या भौतिकं ज्ञानम्) अध्ययने अध्यापने च विश्वगुरुः आसीत् भविष्यति च, समग्रे प्रपञ्चे भारतं सक्रियं योगदानं च सर्वेषु क्षेत्रेषु प्रादात्, ददाति च। प्राचीनकालादेव भारतस्य नानभागेषु आधुनिकविश्वविद्यालयेन तुल्यानां बृहतां शिक्षणकेन्द्राणां गुरुकुलानां च स्थापना अभवत्, तत्र सहस्राधिकाः विद्यार्थिनः नानास्थानेभ्यः नानादेशेभ्यः च आगच्छन्ति स्म। प्राचीनै ऋषिभिः अन्विष्टाः ज्ञान-विज्ञान-प्रौद्योगिक्यभियान्त्रिक्यादीनाम् अध्ययनपद्धतयः, प्रयोगात् परीक्षणविधानानि, सिद्धान्ताः च अनेकेषु विषयेषु विश्व-ज्ञानस्य

---

[1] नाम वा ऋग्वेदो यजुर्वेदः, सामवेदः, आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्त्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नाम---। छान्दोग्ये 7.1.4

मूलसिद्धान्तान् स्थापयामासुः, चिन्तनस्य उत्साः च अभूवन्, खगोलविज्ञाने, भौतिक्यां, रसायनविज्ञाने, गणिते, चिकित्साविज्ञाने, प्रौद्योगिक्यां, ध्वन्यनुसन्धाने, व्याकरणे एवम् अन्यत्र च तादृशेषु विविधेषु विषयेषु सिद्धान्तप्रतिपादने प्राचीनकालादेव भारतस्य योगदानम् अतीव महत्त्वपूर्णं वर्तते इति अनुसन्धानेन आविश्वं प्रथितमेव । अतः भव्यस्य भारतस्य नागरिकाः बालकाः बालिकाः च अवश्यमेव ऋषिप्रदत्तं मूलं वैदिकं ज्ञानं प्राप्नुयुः गौरवमनुभूय भारतभाग्यं चिन्तयेयुः, रचयेयुः च । भारत-संसद्भवनस्य मुख्यद्वारि उट्टङ्कितं "वसुधैव कुटुम्बकम्" इति, विविधेषु अवसरेषु गणमान्यैः संवैधानिकप्राधिकरणैः उद्धृतानां वेदमन्त्राणामर्थज्ञानं वेदाध्ययनेन, वेदमन्त्रार्थचिन्तनेन एव सम्भवति। वेदेषु, सम्पूर्णे वैदिकसाहित्ये च सत्, चित्, आनन्द-तत्त्वचिन्तनं समेषां प्राणिनाम् अन्तर्णिहितयाः समानताया उपरि बलं प्रददाति।

वेदाः वैज्ञानिकज्ञानस्य स्रोतांसि वर्तन्ते। अतः बह्वीनाम् आधुनिकसमस्यानां समाधानाय वेदमूलकानां भारतीयज्ञानस्रोतसां श्रद्धया पुनः पुनः अन्वेषणम् आवश्यकम्। वेदानां पाठं, वैदिकज्ञानसामग्रीं, वैदिकदर्शनं वा आध्यात्मिकज्ञानस्य वैज्ञानिकज्ञानस्य च रूपेण यावत् वयं छात्रान् न बोधयामः तावत् आधुनिकभारतस्य अपेक्षा-पूर्त्यर्थं वेदे निहितानां विविधानां ज्ञान-विज्ञान-विचाराणां देशे सर्वत्र, विश्वस्तरे च प्रसारः पूर्णरूपेण नैव भविष्यति।

वेदाध्यापनं वेदशिक्षा वा (वेदपाठः, मौखिकी, श्रुतिपरम्परा वा, वेदज्ञानपरम्परा) केवलं धार्मिक- शिक्षामात्रं नैव । वेदानामध्ययनं नाम धर्मविषयकमेव निर्देशमात्रम् इति कथनं सर्वथा अनुचितमेव। वेदः धार्मिकवाङ्मयमात्रम् एव न, वेदेषु केवलं धार्मिकसिद्धान्तमात्रम् एव न प्रतिपादितम्, अपितु वेदाः ज्ञानविज्ञानकोषाः सन्ति, तत्र ज्ञानं विज्ञानं च वर्तते । मानवजीवनसाफल्याय, आनन्दाय च आवश्यकानां समेषां ज्ञानानां कोषरूपः वेदः, स वेदः सर्वज्ञाननिधिः । अतः वेदशिक्षणं वेदाध्ययनं वा धार्मिकशिक्षणम्, धार्मिकनिर्देशः इति वा चिन्तनं सर्वथा युक्तियुक्तं न विद्यते।

2004 वर्षस्य 6736 नागरिक-प्रतिवेदनसंख्यान्वितम् अभियोगम् (AIR 2013: 15 SCC 677) अनुलक्ष्य 03-07-2013 दिनाङ्के प्रकाशिते माननीयसर्वोच्चन्यायालयस्य निर्णये स्पष्टं यत्

वेदाः केवलं धार्मिकग्रन्थाः नैव सन्ति, वेदेषु गणितं, खगोलविज्ञानं, ऋतुविज्ञानं, रसायनविज्ञानं, द्रवचालिकी (हाइड्रोलिक्स) भौतिकविज्ञानं, प्रौद्योगिकी, कृषिः, दर्शनं, योगः, शिक्षा, काव्यशास्त्रं, व्याकरणं, भाषाविज्ञानम् इत्यादयः विषयाः सम्मिलिताः सन्ति इति।

**2020 राष्ट्रियशिक्षानीतेः अनुसरणपूर्वकं प्रतिष्ठानस्य, बोर्ड् इत्यस्य च माध्यमेन वेदशिक्षणम्-**

2020 राष्ट्रियशिक्षानीतौ भारतीयज्ञानप्रणाली नाम्ना संस्कृतज्ञानप्रणाली संज्ञिता अस्ति। तत्र भारतीयज्ञान-प्रणाल्याः महत्त्वं, पाठ्यक्रमे तस्याः समावेशः, विविधविषयाणां संयोजने नम्या दृष्टिः स्पष्टं शिक्षानीतौ प्रकाशिता अस्ति। कलायाः, वाणिज्यस्य, मानविक्याः च छात्रा विज्ञानविषयाध्ययनाय समर्था भविष्यन्ति, प्रौद्योगिकीछात्राः विज्ञानछात्राश्च कलादिविषयान् अध्येतुमर्हन्ति। अध्येतारः सर्वे इच्छानुगुणं व्यावसायिकं, व्यावहारिकं च कौशलं (सॉफ्ट स्किल्स) प्राप्नुयुः इति। कलासु, विज्ञानेषु, इतरेषु क्षेत्रेषु च भारतस्य गौरवशालिनी परम्परा अनया शिक्षणव्यवस्थया संवर्धयितुं शक्यते। भारतस्य समृद्धां प्राचीनसंस्कृतिम्, आधुनिकजीवनपद्धतिं, भारतीयज्ञानप्रणालीं, परम्परां च संयोजयितुं संवर्धयितुं च सर्वकारेण शिक्षानीतिरियं निर्मिता।

भारतस्य शास्त्रीयभाषाणां साहित्यानां च महत्त्वं, प्रासङ्गिकता, सुन्दरता च उपेक्षितुं न शक्यते। संस्कृतं नाम संविधानस्याष्टमानुसूच्यां निर्दिष्टा एका महत्त्वपूर्णा आधुनिकी भाषा वर्तते। समग्रं लैटिन-ग्रीकसाहित्यं च संस्कृतसाहित्येन गुणे परिमाणे च तुलनायां कथमपि समानतां न प्राप्नोति। संस्कृतसाहित्ये गणितम्, दर्शनम्, व्याकरणम्, संगीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कथा आख्यायिका, कविता इति वाङ्मयविधानां विशालः कोषः वर्तते, स संस्कृतज्ञानप्रणालीरूपेण ज्ञायते। संस्कृतज्ञानप्रणाली न केवलं विश्वज्ञाननिधेः पोषणाय संरक्षणाय च भवेत् अपि तु संस्कृतज्ञानप्रणाली अनुसन्धानैः संवर्धनीया, नवीनैः चिन्तनैः संस्कृतज्ञानप्रणाली अस्माकं शिक्षाप्रणाल्यां सम्यक् उपयुक्ता च भवेत्। विगतेषु बहुषु सहस्राब्देषु विविध-विषयक-विद्वज्जनैः विविधासु सामाजिकपृष्ठभूमिषु कार्याणि कुर्वद्भिः विस्तृतजीवनदर्शनेन सह संस्कृतज्ञानप्रणाल्या वाङ्मयसर्वस्वं प्ररोपितं निर्मितं च अस्ति। संस्कृतविषयाः रुचियुक्तैः विधिभिः आकर्षकविधानैः प्रासङ्गिकविधिभिः च पाठयिष्यन्ते। अस्याः प्रणाल्या उपयोगः

विशिष्टरूपेण ध्वनिरूपेण उच्चारणेन च वर्तते। माध्यमिकस्तरे संस्कृतविषयान् संस्कृतमाध्यमेन पाठयितुं, संस्कृताध्ययनम् आनन्दप्रदं कर्तुं संस्कृतपाठ्यविषयाणां लेखनं सरलमानकसंस्कृतेन (एस्. एस्. एस्.) भविष्यति। वेदानां श्रुतिपरम्परायां मौखिकपरम्परायां वा ध्वन्यात्मकम् उच्चारणं प्रवर्तते, वेदशिक्षायाः आधारः सस्वरोच्चारणं, ध्वन्यात्मकोच्चारणं च वर्तते।

कलाविज्ञानयोः पाठ्यक्रम-पाठ्येतरक्रिययोः शैक्षणिक-व्यावसायिकधारयोश्च मध्ये परस्परं स्पष्टो भेदो न कृतः शिक्षानीत्याम्, एतेषां सम्मिश्रणं पाठ्यचर्यायां भवितुमर्हति। समेषां विषयाणाम् अन्तस्सम्बन्धम् एकताम् अखण्डतां च सुनिश्चित्य अध्ययनाय बहुविषयकः आधारः शिक्षानीत्यां निर्मितः अस्ति, तेन च विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादिभिः सह बहुविषयिण्याः समग्रशिक्षाया उपरि बलं प्रदत्तमस्ति। नैतिकता, मानवसम्बद्धानि संवैधानिकमूल्यानि, सहानुभूतिः, परेषां कृते सम्मानः, स्वच्छता, शिष्टाचारः, लोकतान्त्रिकी भावना, सेवाभावना, सार्वजनीनसम्पदां सम्मानः, वैज्ञानिकचिन्तनं, स्वतन्त्रता, उत्तरदायित्वं, नानाविचारवादः, समानता, न्यायः इति भावानाम् उपरि बलं प्रदत्तमस्ति।

2020 राष्ट्रियशिक्षानीतेः 4.23 बिन्दु-संख्यायां अनिवार्यतया अध्येयविषयाणां, कौशलसंवर्धनस्य, शिक्षाक्रमस्य च विषये निर्देशो वर्तते। विद्यार्थिनाम् इच्छानुगुणं अध्येयविषयाणां चयनविकल्पाः अधिकतया नमनीयाः भवेयुः, पाठ्यक्रमाः नमनीयाः स्युः । अपि च अधुना झटिति परिवर्तिनि विश्वे विद्यार्थिनः उत्तमाः, यशस्विनः, सफलाः, उद्योगशीलाः, उद्योगयोग्याः, उत्पादकशीलाश्च भवेयुः चेत् केचन अध्येयज्ञानविषयाः कौशलविषयाः अनिवार्याः करणीयाः, वृत्तिसामर्थ्यप्राप्तिः च अनिवार्या विद्यते, छात्रहितदृष्ट्या तत् महत्त्वपूर्णं च।

वैज्ञानिकः चिन्तनस्वभावः, प्रमाणाधारितं चिन्तनं, रचनात्मिकी नवीनता च, सौन्दर्यशास्त्रं कलायाः च भावना, मौखिकं लिखितं च अभिव्यक्तिसामर्थ्यं, संवादकौशलं च, स्वास्थ्यं संपोषणं च, शारीरिकशिक्षा, दैहिकसामर्थ्यं स्वास्थ्यं क्रीडा च, सहयोगः सामूहिककार्यम्, समस्यायाः समाधानं तार्किकं चिन्तनं, व्यावसायिकाभिप्रकाशः कौशलं च, तन्त्रज्ञानप्रयोगकौशलं, संख्यासाक्षरता, कूटचिह्नसंज्ञानं, संगणकीयं चिन्तनं, नैतिकता, नैतिक-

तार्किकक्रिया, मानवीयानां संविधानीयानां मूल्यानां ज्ञानम् अभ्यासश्च, स्त्रीपुंस-संवेदनशीलता, मौलिककर्तव्यम्, नगरिकता-कौशलं मूल्यं च, भारतस्य ज्ञानम्, पर्यावरणसम्बद्धा जागरा, तत्र जलसंसाधन-संरक्षणम्, स्वच्छता, समकालिकविषयाः स्थानीयविषयाश्च, देशेन, राज्यैः, प्रपञ्चेन वा सम्मुखीक्रियमाणानां विषयाणां ज्ञानं, नानाभाषासु कौशलेन सह अत्रोक्तानां कौशलानामपि अध्येयविषयेषु समायोजनं विद्यते । बालकानां भाषाकौशलसंवर्धनाय, समृद्धभाषाणां तत्रस्थानां च कलाकोषाणां च संरक्षणाय सर्वकारीयेषु स्वनिधिपोषितेषु विद्यालयेषु च सर्वेभ्यः छात्रेभ्यः एकां शास्त्रीयभाषां तत्साहित्यं च अधिगन्तुं वर्षद्वयस्य अवसरः भविष्यति।

2020 राष्ट्रियशिक्षानीतेः 4.27 बिन्दु-संख्यायां "भारतस्य ज्ञानम्" इति विषये महत्त्वपूर्णः निर्देशो वर्तते। "भारतस्य ज्ञानम्" इत्यस्मिन् विषये आधुनिकभारतस्य प्रतिस्पर्धानां सफलतया सम्मुखीकरणे, आधुनिकभारतस्य सफलतायै, प्राचीनभारतस्य ज्ञानं योगदानञ्च, भारतीयज्ञानप्रणाली यथा- गणितं, खगोलविज्ञानं, दर्शनं, योगः, वास्तुकला, चिकित्सा, कृषिः, अभियान्त्रिकी, भाषाविज्ञानं, साहित्यं, क्रीडया सह शासनं, राजव्यवस्था, संरक्षणं च इत्यादीनां विषयाणां यत्रापि प्रासङ्गिकता भविष्यति तत्र विषयाणां सम्यक् योजनं भविष्यति । एतेषु औषधपद्धतयः, वनप्रबन्धनं, पारम्परिक (जैविकी) कृषिपद्धतिः, प्राकृतिक-कृषिपद्धतिः, स्वदेशीयक्रिडाः, विज्ञानादिषु क्षेत्रेषु प्राचीनार्वाचीनयोः भारतयोः प्रेरकाणां महापुरुषाणां ज्ञानप्रदाः विषयाः भवन्ति।

2020 राष्ट्रियशिक्षानीतेः 11.1 बिन्दु-संख्यायां समग्रशिक्षां बहुविषयकशिक्षां प्रति च प्रवृत्त्यर्थं निर्देशाः सन्ति। भारते समग्रतया बहुविषयकाध्ययनं काचित् प्राचीना परम्परा विद्यते। तक्षशिला, नालन्दा-प्रभृतिविश्वविद्यालयेषु अध्यापितानि 64 कला-कौशलानि, सङ्गीतकला, चित्रकला इत्यादिकलाविषयाः, रसायनशास्त्रं, गणितम्, इत्यादिवैज्ञानिकक्षेत्राणि, काष्ठतक्षणकार्यम्, वस्त्रसीवनकला, इत्यादिवृत्तिपरकक्षेत्राणि, औषधीयकार्यम्, अभियान्त्रिकी इत्यादिव्यावसायिकक्षेत्राणि, सम्प्रेषणम्, चर्चा, संवादः इत्यादिव्यावहारिककौशलानि (सॉफ्ट स्किल) च अन्तर्भूतानि । गणितम्, विज्ञानम्, वृत्तिपरकविषयान्, व्यवहारिकविषयान्,

व्यावसायिकविषयान् च अन्तर्भाव्य मानवसर्जनस्य सर्वाणि क्षेत्राणि कला इति भारतीयं चिन्तनमस्ति। विविधकलानां यत् ज्ञानम् अस्ति, तत् आधुनिककाले समान्यतः कथ्यते उदारकला (कलानाम् उदारकल्पना ) इति। विविधकला-ज्ञानानां भारतीयशिक्षायां पुनः समायोजनम् अवश्यं भवेत् । ईदृशी शिक्षा एकविंशे (21) शताब्दे अपेक्षिता विद्यते।

2020 राष्ट्रियशिक्षानीतेः 22.1 बिन्दु-संख्यायां भारतीयभाषाणां, कलायाः, संस्कृतेश्च संवर्धनाय निर्देशो भवति। सहस्रेण वर्षैः निरन्तरं विकसितं भारतं विशिष्टस्य संस्कृतेः समृद्धः भाण्डागारः वर्तते। सा भारतसंस्कृतिः कलासु, साहित्यकृतिषु, प्रथासु, परम्परासु, भाषाभिव्यक्तिषु, कलाकृतिषु, ऐतिहासिकेषु, सांस्कृतिकसम्पत्तिस्थलेषु च परिलक्षिता भवति। भारते भ्रमणम्, भारतीयातिथ्यसत्कारस्यानन्दः, भारतस्य सुन्दरहस्तशिल्पानां हस्तनिर्मितवस्त्राणां च क्रयणम्, भारतस्य प्राचीनसाहित्यस्य पठनम्, योग-ध्यानयोः अभ्यासः, भारतीयदर्शनशास्त्रेण प्रेरणा, भारतस्य विभिन्नपर्वसु उत्सवेषु वा भागग्रहणम्, भारतस्य वैविध्यपूर्णसंगीतस्य कलायाश्च प्रशंसनम्, भारतीयचलचित्राणां दर्शनम् इत्यादयः केचनायामाः वर्तन्ते येषां माध्यमेन विश्वस्य कोटिशः जनाः अस्यां भारतीय-सांस्कृतिकविविधतायां सम्मिलिताः भवन्ति। एवम् अस्य आनन्दम् अनुभवन्ति, लाभान्विताः च भवन्ति।

एषा सांस्कृतिकी प्राकृतिकी च सम्पद् वर्तते, तस्याः भारत-सांस्कृतिकसम्पदः संरक्षणम्, संवर्धनम्, प्रसारः च देशस्य सर्वोत्तमं प्राथम्यं स्यात्, यतो हि इयं सांस्कृतिकसम्पत् देशस्य अभिज्ञानाय अर्थव्यवस्थाविकासाय च अत्यन्तं महत्त्वपूर्णा वर्तते।

2020 राष्ट्रियशिक्षानीतेः 22.2 बिन्दु-संख्यायां कलानां विषये निर्देशो वर्तते। भारतीयकलायाः संस्कृतेश्च संवर्धनं न केवलं राष्ट्राय एव आवश्यकं, राष्ट्रियजनानां कृते अपि महत्त्वपूर्णं वर्तते। बालेषु बालिकासु च स्वाभिज्ञता, देश्य-जनेषु मामकीनभावः, अन्यसंस्कृतीनां तदीयलक्षणानां च कृते गौरवबुद्धिं जनयितुं सांस्कृतिकप्रज्ञायाः जागृतिः, अभिव्यक्तिः इत्यादीनां सामर्थ्यानां विकासस्य अपेक्षा वर्तते। बालकेषु बालिकासु च स्वकीयसांस्कृतिकेतिहासे, कलायां, भाषासु, परम्परासु च स्वकीयभावनाया विकासेनैव गुणपूर्णस्य सांस्कृतिकाभिज्ञानस्य संस्कारः

उत्पादयितुं शक्यते। अतः स्वकल्याणाय समाजकल्याणाय राष्ट्रकल्याणाय च सांस्कृतिकी जागृतिः अभिव्यक्तिश्च अधिकं महत्त्वं प्राप्नोति।

प्रतिष्ठानस्य मुख्यः पाठ्यक्रमः सस्वरवेदशिक्षणरूपः (मौखिकी, श्रुतिपरम्परा च-वेदपाठेन वेदज्ञानपरम्परया च सह) वर्तते। तेन सह इतरे अनिवार्या आवश्यकाः आधुनिकविषयाः यथा- संस्कृतभाषा व्याकरणं च, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, समाजोपयोगि-उत्पादकविषयाः (SUPW) महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षाबोर्ड् इत्यस्य प्रतिविषयं पाठ्यपुस्तकेषु संयोजिताः सन्ति। इतरे आवश्यकाः आधुनिकविषयाः भारतीयज्ञानपरम्परायाः (आई.के. एस्.) विषयाणां अनुप्रविष्टीनाम् उपरि (इनपुट) आधारिता वर्तन्ते। एते सर्वे पाठ्यपुस्तकविषया 2020 राष्ट्रियशिक्षानीतेः दिशानिर्देशस्य अनुरूपं संयोजिताः वर्तन्ते। 2020 राष्ट्रियशिक्षानीतिं, महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य वैदिक-शैक्षिकचिन्तकानां प्राधिकरणानां च परामर्शं च ध्यात्वा प्रापणीय-अभिलेख-संचिका- (PDF) (ऑनलाईन पुस्तकम्) पुस्तकानि प्रस्तुतानि सन्ति। एन.सी.ई.आर्.टी-संस्थया प्रकाशनीयायाः नवीन-राष्ट्रियपाठ्यचर्या-रूपरेखाया: अनुरूपम् एतानि पुस्तकानि अद्यतनानि करिष्यन्ते, ततः परमेव मुद्रितरूपेण पुस्तकानि उपलब्धानि भविष्यन्ति।

प्रतिष्ठानस्य राष्ट्रियादर्शवेदविद्यालयस्य अध्यापका:, वेदाध्यापने समर्पिता वेदाचार्या:, संबद्ध-विविधवेदपाठशालानां संस्कृताध्यापका: संस्कृतपाठ्यपुस्तकानां प्रत्नरूपम् अभिलेखम् निरन्तरं परिश्रम्य निरमन्। तदुपरि प्रतिष्ठानेन संबद्धानां वेदपाठशालानां नैके संस्कृताध्यापकाः सुपरिश्रम्य इत्थंरूपाणि संस्कृतपाठ्यपुस्तकानि सुष्ठु निर्मितवन्तः । तान् सर्वान् प्रति धन्यवादान् अर्पयामि । राष्ट्रस्तरीयाः संस्कृतभाषाविशेषज्ञा: समये समये पाठ्यपुस्तकेषु गुणवत्तामानेतुं विविधाः संस्तुतीः दत्त्वा दोषनिवारणं च कृत्वा पुस्तकानां गुणाधिक्ये साहाय्यं कृतवन्तः । तान् सर्वानपि धन्यवादैः सभाजयामि। अक्षरयोजनाय, मुद्राक्षरदोषदूरीकरणाय, चित्राङ्कनाय च मम सहयोगिन: कर्मचारिणः कार्यं कृतवन्तः। तेभ्यः हार्दान् धन्यवादान् अर्पयामि।

पाठ्यपुस्तकानां गुणवत्ताविकासाय पुनः परिष्काराय च रचनात्मकविचाराणां कृते स्वागतवचांसि व्याहरामि। किं बहुना--

**आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**

**बलवदपि शिक्षितानाम् आत्मन्यप्रत्ययं चेतः॥** (अभिज्ञानशाकुन्तलम् १.०२)


प्रो. विरूपाक्ष वि जड्डीपाल्

सचिवः

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी

महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड, उज्जयिनी



महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी
यत्र विश्वं भवत्येकनीडम्

# पाठ्यपुस्तकविषये प्रस्तावना

सस्वरवेदाध्ययनस्य, श्रुतिपरम्परायाः च संरक्षणाय प्रतिष्ठापितस्य महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य, प्राथमिकस्तरात् उच्चतरमाध्यमिकस्तरपर्यन्तं वेद-संस्कृत-शिक्षण-पाठ्यक्रमाणां मानकीकरणाय, संवर्द्धनाय, परीक्षामान्यतायै, प्रमाणीकरणाय च संस्थापितस्य "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृतशिक्षाबोर्ड्" इत्यस्य वेदविभूषण-प्रथम-कक्ष्यायाः, सामान्यशिक्षणव्यवस्थायाम् एकादश-कक्ष्यायाः कृते निर्धारितम् इदं पाठ्यपुस्तकम् अध्येतृहस्ते अस्ति इति नितराम् आनन्दस्य विषयः। 2020 राष्ट्रियशिक्षानीतेः (NEP-2020) अनुरूपं पुनर्व्यवस्थापितायां 3 + 4 सप्तवर्षीयायां प्रतिष्ठानस्य वेदाध्ययनपाठ्यक्रमयोजनायां वेदाध्ययननिरतान् पारम्परिकच्छात्रान् मुख्यधारायाम् आनेतुं, संस्कृतपाठ्यपुस्तकद्वारा भाषादक्षतां संवर्धयितुं च प्रयत्नः कृतः अस्ति।

वेदवाङ्मय-संस्कृतग्रन्थस्थविषयाणाम् उपयोगं कृत्वा वेद-संस्कृतपाठशालानां पाठ्यक्रमसामग्र्यः आधुनिकसमस्यानां निवारणोपायान्वेषणाय विकसिताः स्युः इति नीतिगतं चिन्तनस्ति। अत्र पाठ्यपुस्तके यथास्थानम् आधुनिकज्ञानविज्ञानैः च सह भारतीयचिन्तनधारायाः, वैदिकज्ञानस्रोतसः च उपयुक्तज्ञानसामग्रीणां समायोजनं वर्तते। भारतस्य समृद्धां प्राचीनसंस्कृतिम्, आधुनिकजीवनपद्धतिं, भारतीयज्ञानप्रणालीं, परम्परां च संयोजयितुं संवर्धयितुं च सर्वकारेण शिक्षानीतिरियं निर्मिता। पाठ्यसामग्रीद्वारा एतस्याः अनुभवः भवेत् इति अनुभवपूर्वकम् अधिगमाय च सामग्री अत्र प्रदत्ता।

सर्वस्तरेषु संस्कृतस्य अध्ययनम् अभिप्रेरकं, सम्प्रेरकम्, आनन्ददायकं भाषाशिक्षणसोपानानुगुणं च भवेत्। सरलतया संस्कृतभाषाशिक्षणाय, विविधविषयाध्यापनाय च उपयोगि पाठ्यपुस्तकानि भवेयुः । पुस्तकम् अभ्यस्य सरलतया संस्कृतेन संभाषितुं योग्यता छात्राणां स्वतः भवेत् । अन्यभाषामाध्यमेन संस्कृतस्य पठनं पाठनं च न भवेत्, संस्कृतमाध्यमेन

एव भवेत् , संस्कृतपाठ्यविषयाणां लेखनं सरलमानकसंस्कृतेन भवेत् इत्यादीनि संकल्पनानि अस्य पाठ्यपुस्तकस्य निर्माणावसरे मनसि स्थापितानि।

संस्कृताध्यापनाय अस्य पाठ्यपुस्तकस्य उपयोगं ये कुर्वन्ति ते पुनः पुनः अभ्यासं कारयित्वा भाषण-पठन-लेखन-कौशलानां विकासाय, विशिष्टविषयज्ञानप्रदानाय च अध्यापकाः प्रयत्नं कुर्युः। पाठ्यसामग्रीनिर्माणावसरे विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादिभिः सह बहुविषयिण्याः समग्रशिक्षाया उपरि, संस्कृतभाषादक्षताविषये च बलं प्रदत्तमस्ति। शिष्टाचारः, स्वच्छता, सेवाभावना, मौलिककर्तव्यम्, नगरिकता-कौशलं मूल्यं च, सामूहिककार्यम्, मौखिकं लिखितं च अभिव्यक्तिसामर्थ्यं, संवादकौशलं च, मानवसम्बद्धानि संवैधानिकमूल्यानि, सहानुभूतिः, लोकतान्त्रिकी भावना, वैज्ञानिकचिन्तनं, न्यायः इति भावाः आनुभविकाधिगमाय तत्र तत्र पाठ्यसामग्र्याम् अन्तः निवेशिताः । इमे संस्कृतविषयाः रुचियुक्तैः विधिभिः आकर्षकविधानैः प्रासङ्गिकविधिभिः च पाठनीयाः प्रयत्नतः। संस्कृतस्य स्तरानुगुणं पाठ्यसामग्र्यां वेदसम्बद्धाः संस्कृतभाषाविषयाः योजिताः सन्ति। संस्कृतस्य सम्यक् अध्ययनं, भाषण-पठन-लेखन-कौशलविकासःभवेत्। संस्कृतभाषादक्षता अपि कौशलं भवति, वृत्तिसामर्थ्यप्राप्तये भाषाकौशलप्राप्तिः अनिवार्या अस्ति। विज्ञानादिषु क्षेत्रेषु प्राचीनार्वाचीनयोः भारतयोः प्रेरकाणां महापुरुषाणां ज्ञानप्रदाः विषयाः अपि पाठ्यसामग्र्याम् अन्तः निवेशिताः सन्ति।

कलाविज्ञानयोः सम्मिश्रणं, बहुविषयकः आधारः, विविधविषयाणां सङ्गमः च पाठ्यपुस्तके विषयदृष्ट्या द्रष्टुं शक्यम्। विविधपाठेषु विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादीनि संस्कृतवाङ्मयस्य विविधानि मुखानि उद्घाटितानि सन्ति। आधुनिकभारते प्राचीनभारतीयज्ञानस्य योगदानम्, भारतस्य ज्ञानम्, भारतीयज्ञानप्रणाल्याः गणितं, खगोलविज्ञानं, दर्शनं, योगः, वास्तुकला, चिकित्सा, कृषिः, अभियान्त्रिकी, भाषाविज्ञानं, साहित्यं, क्रीडया सह शासनं, राजव्यवस्था, ज्ञान-संरक्षणं, पर्यावरणसंरक्षणम्, जलसंसाधन-संरक्षणं च इत्यादीनां विषयाणां समायोजनं विद्यते पाठ्यपुस्तके। अध्येतारः एतस्य

संस्कृतभाषा-व्याकरण-पाठ्यपुस्तकस्य सम्यक् अध्ययनेन लाभान्विता भविष्यन्ति इति विश्वसिमः।

प्रतिष्ठानेन संबद्धानां वेदपाठशालानां संस्कृताध्यापकाः श्रीसुरेशचन्द्रशर्मा, श्रीमणिशङ्करमिश्रः, डॉ. नरेशगोपालकटारा, डॉ. विजयकुमार उपाध्यायः, श्रीमनोजकुमारशर्मा, श्री अखलेशकुमारः, डॉ.ब्रजबिहारीपाण्डेयः, प्रतिष्ठानस्य अध्यापकचरः डॉ. अनूपकुमारमिश्रः च संस्कृतपाठ्यपुस्तकस्य प्राग्रूपतया (ड्राफ्ट) कांश्चन पाठान् निर्मितवन्तः। आदितः संस्कृतपाठ्यपुस्तक-निर्माण-कार्ये अस्मिन् संपूर्णतया संयुक्ताः डॉ.श्रीशेषराजरेग्मी, डॉ.यतिराज-सापकोटा, डॉ.सुकान्तप्रामाणिकः च संशोधन-प्रश्नसंयोजन-योग्यताविस्तारादियोजनेन, दोषदूरीकरणेन च अन्तिमं पुस्तकनिर्माणं कृतवन्तः। राष्ट्रियादर्शवेदविद्यालयस्य इदानीन्तनः संस्कृताध्यापकः डॉ. वेणुधरदाशः संस्कृतपाठ्यपुस्तकानां मुद्रणशोधने साहाय्यम् अकरोत्। तान् सर्वान् प्रति धन्यवादान् अर्पयामः ।

राष्ट्रस्तरीयाः विविधाः संस्कृतभाषाविशेषज्ञाः यथासमयं संस्तुतीः दत्त्वा दोषनिवारणं कृतवन्तः । तेषां सर्वेषां कृते धन्यवादाः समर्प्यन्ते। अक्षरयोजनाय, मुद्राक्षरदोषदूरीकरणाय, पत्रसंयोजनाय, चित्राङ्कनाय च श्रीमती मिताली रत्नपारखी, श्रीमती किरण-परमार, श्रीशैलेन्द्र डोडिया एवम् अन्ये च सहयोगिनः कर्मचारिणः कार्यं कृतवन्तः। तेभ्यः ताभ्यश्च हार्दान् धन्यवादान् अर्पयामः।

पाठ्यपुस्तकानां परिष्काराय विद्वांसः सूचनाः प्रयच्छन्तु इति प्रार्थनां कुर्मः।

पाठ्यपुस्तकनिर्मातृगणसदस्याः अध्यापकाः

# किमर्थमध्येयं संस्कृतम् ? ...... अतः अध्येयं संस्कृतम्।

1. अस्माकं भारतराष्ट्रस्य अत्यमूल्यः ज्ञाननिधिः संस्कृतभाषा। संस्कृते ज्ञानं, विज्ञानं, शब्दसम्पत्, नूतनशब्दनिर्माणशक्तिः,चिन्तनसम्पत्, देशस्य एकसूत्रे ग्रन्थनशक्तिश्च च सन्ति। संस्कृतभाषया तत्र विद्यमानेन लौकिकेन अलौकिकेन च ज्ञानेन विश्वस्मिन् विश्वे भारतस्य महान् आदरः, प्रतिष्ठा च वर्तते। भारतं प्रति वैश्विकस्य समादरस्य रक्षणाय संवर्धनाय च, वसुधैव कुटुम्बकमिति, यत्र विश्वं भवत्येकनीडमिति च भावनायाः संपोषणाय संवर्धनाय च संस्कृतस्याध्ययनं वयं कुर्याम, संस्कृताध्ययनाय विश्वजनान् बोधयेम, संस्कृताध्ययने समादरं च दध्याम।
2. भारतीयसंस्कृतेः ज्ञानं संस्कृतभाषां विना नैव सम्भवति । भारतीयसंस्कृतेः भारतीयजीवनपद्धतेः, विविधानां पर्वणां च सम्यक् ज्ञानम् आचरणं च संस्कृताध्ययनं विना न सम्भवति। संस्कृतिः संस्कृताश्रिता। उक्तं च "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" ।
3. मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, सत्यं वद, धर्मं चर, सत्यान्न प्रमदितव्यम्, धर्मान्न प्रमदितव्यम्, कुशलान्न प्रमदितव्यम्, वसुधैव कुटुम्बकम्, सङ्गच्छध्वं संवदध्वं, सह नाववतु सह नौ भुनक्तु, सत्यमेव जयते नानृतम्, उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत, ईशावास्यमिदं सर्वम्, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, श्रुतं मे गोपाय, उद्धरेदात्मनात्मानम् इत्यादीनाम् अमूल्यानां प्रेरकाणां जीवनपथदर्शकाणां नीतिवाक्यानां सर्वाद्यं स्रोतः संस्कृतम्। मानवजीवनस्य साफल्याय, एतेषां नीतिवाक्यानां परिज्ञानाय च अध्येयं संस्कृतम्।
4. सर्वेषां मानावानां कृते अविनाशी सनातनः ज्ञाननिधिः वेदराशिः। वेदार्थज्ञानाय वेदभाष्यज्ञानम् आवश्यकम्, वेदभाष्यज्ञानाय संस्कृतम् अध्येयम्।
5. उदात्त-अनुदात्त-स्वरित-स्वरपूर्वकं समुच्चारितो वेदो ज्ञाननिधिः वैश्विकं सृष्टिरहस्यम्, यच्च एतावता कालेन नैवोद्घाटितं प्रमाणितं वा अन्यैः वैदेशिकैः संशोधनैः, स वेदः

संस्कृतभाषामय एव ऋषिभिः दृष्टः समाम्नातश्च। सृष्टिरहस्यस्य परिज्ञानाय मन्त्र-सृष्टिरहस्यपरिज्ञानाय चाध्येयं संस्कृतम्।

6. वेदाः, उपनिषदः, ब्राह्मणानि, आरण्यकानि, पुराणानि, शिक्षादिषड्वेदाङ्गानि, स्मृतयः, ब्रह्मसूत्र-योगसूत्रादीनि सूत्राणि, रामायणम्, महाभारतम्, भगवद्गीता, पञ्चतन्त्रम्, हितोपदेशः, नीतिशतकम्, कालिदासादिकविरचितानि विविधानि काव्यानि, भासादिरचितानि विविधानि नाटकानि च संस्कृतभाषया एव रचितानि सन्ति । एतेषां वाङ्मयविशेषाणां ज्ञानाय सततं छात्रैः, सर्वैः जिज्ञासुभिः जनैश्च अध्येयं संस्कृतम्।

7. संस्कृते दर्शनशास्त्रम्, अर्थशास्त्रम्, राजनीतिशास्त्रम्, धर्मशास्त्रम्, नीतिशास्त्रम्, इतिहासपुराणानि आयुर्वेदादयः नानाज्ञानविषयाः विद्यन्ते। समृद्धस्य संस्कृतेः समृद्धं वाङ्मयम् अस्ति संस्कृते, तस्मात् संस्कृतम् अध्येतव्यम्।

8. संस्कृतवाङ्मयस्थानां विविधजीवनसूत्राणाम्, मानवान्तर्निहितस्य देवत्वस्य, आनन्दस्रोतसां च ज्ञानस्य, तेषां समुद्घाटनाय, आविष्काराय अमूल्यज्ञाननिधीनां ज्ञानाय च छात्रैः, सर्वैः जिज्ञासुभिः जनैश्च अध्येयं संस्कृतम्।

9. प्राचीनैः वैज्ञानिकैः चरक-सुश्रुत-कणाद-भास्कर-बोधायन-नागार्जुन-भारद्वाज-आर्यभट्ट-वराहमिहिरादिभिः रचितानां विविधानां वैज्ञानिकग्रन्थानां विज्ञानसिद्धान्तानां च सुष्ठु ज्ञानाय अध्येयं संस्कृतम्।

10. सर्वासां भारतीयभाषाणां नानावैश्विकभाषाणां च जननी पोषयित्री च संस्कृतभाषा। सर्वासु भारतीयभाषासु 95% शब्दाः संस्कृतभाषासमुत्पन्नाः एव शब्दा विलसन्ति। नानाराज्यवासिभिः जनैः भाषितानां विविधानां भाषाणां सुलभावगमाय, सुबोधाय च, अस्माकं भारतदेशस्य एकतायै अखण्डतायै च अध्येयं संस्कृतम्।

11. संस्कृतभाषा कंप्यूटर-यन्त्रस्य प्रोग्राम-समारचानाय योग्या भाषा अस्ति, भगवद्गीतायाः भाषा अस्ति, उपनिषदां भाषा अस्ति, वास्तु-खगोल-ज्यौतिष-आयुर्वेदादि-विज्ञनस्य भाषा अस्ति, नाट्यशास्त्र-सङ्गीत-चित्रादि-ललित-कालादीनां भाषा अस्ति, मानवविकासस्य

ज्ञपिका भाषा अस्ति,  संस्कृते अस्ति धर्मार्थकाममोक्षोपदेशः, जीवननिर्वाहाय हितावहः श्रुतिस्मृत्युपदेशः अस्ति, राज्यशासनाय विश्वक्षेमङ्करः अर्थशास्त्रोपदेशः च अस्ति। लोकोपकाराय आत्मोद्धाराय च विश्वजनीनं तादृशं संस्कृतम् अध्येयम् ।

12. विविधेषु देशेषु वैदेशिकाः विद्वांसः संस्कृतभाषायाः ज्ञानमहिम्ना एव संस्कृताभिमुखाः अनुसन्धाननिरताः च दृश्यन्ते। संस्कृतवाङ्मये औषधित्वेन द्रव्यगुणत्वेन च उल्लिखितान् औषधिवनस्पतीन् आश्रित्य अनुसन्धानं विधाय ते वैदेशिकाः संशोधनतत्त्वं प्राप्तवन्तः सन्ति। अस्माभिरपि भारतीयस्य ज्ञानतत्त्वस्य रक्षायै प्रकाशाय देशहिताय च अनुसन्धानार्थम् अवश्यम् अध्येतव्यं संस्कृतम्।

13. भारतराष्ट्रस्य एकतायै अखण्डतायै च अत्यावश्यकमस्ति संस्कृताध्ययनम्। आसहस्रं वर्षेभ्यः अद्यावधि भारतस्य प्रतिग्रामं, सर्वेषु प्रदेशेषु, क्षेत्रेषु, राज्येषु संस्कृतस्य प्रभावः अविच्छिन्नतया दृश्यते। सर्वविधैः ज्ञानैः परिपूर्णा इयं भाषितभाषा देववाणी संस्कृतिशेवधिः, सुमधुरा, सरला, सरसा, सुबोधा, मनोज्ञा च । भारतवासिनां प्रत्येकं जनेन मनोयोगसाधनाय, मनस्सन्धानाय, नानाराज्यवासिभिः जनैः भाषितानां विविधानां भाषाणां, तत्रस्थानां शब्दानां च सुलभतया ज्ञानाय, भारतीयतायाः रक्षायै च अवश्यम् अध्येयं संस्कृतम्।

14. संस्कृतभाषायां विविध-विषयाणां ज्ञानस्य च अपरिमितत्वात् अगाधत्वात् च ज्ञान-महिम्ना एव चिराय भारतराष्ट्रं विश्वगुरुः आसीत्। तादृशं विश्वगौरवं पुनः प्राप्तुं, विश्वजनीनसौहार्दाय, विश्वशान्तये च जानीयाम संस्कृतम्, अधीयीमहि संस्कृतम्, अध्यापयेम संस्कृतम्।

15. भाषण-भूषण-आहार-विहार-व्यवहारसम्बद्धानां सदाचाराणां ज्ञानाय, कायिक-वाचिक-मानसिकव्यवहाराणां सम्यक् परिज्ञानाय, जीवनोपयोगिनां विषयाणां सम्यक्परिशीलनपूर्वकम् अनुभवाय समाजस्योपयोगिनां नानाविषयाणां शेवधिः संस्कृतभाषा अस्ति।

16. चरकसंहिता-सुश्रुतसंहिता-अष्टाङ्गहृदयाद्यायुर्वेदग्रन्थानां परिशीलनपुरस्सरं वात-पित्त-कफानां शरीरगतानां लक्षणज्ञानपुरस्सरं स्वस्थवृत्ताचारादिज्ञानेन निरामयाय निरामयजीवनयापनाय निश्श्रेयसे चाध्येयं संस्कृतम्।

17. संस्कृतभाषानिबद्धानां षड्दर्शनानां परिशीलनेन, योगादिशास्त्राणां प्रयोगेण निरन्तरम् अष्टाङ्गयोगाभ्यासेन च आत्मोद्धाराय, निश्श्रेयसे, मनश्शान्तये, स्वान्तस्सुखाय चाध्येयं संस्कृतम्, अध्याप्यं संस्कृतम्।

18. भारतस्य प्राचीनेतिहासप्रकाशकाः पुराणादयो ग्रन्थाः संस्कृतमाध्यमेन एव संरचिताः। अष्टादशसु पुराणेषु, अन्यत्र ग्रन्थेषु, प्राचीनशिलालेखेषु च भारतस्य प्रत्येकम् ऐतिहासिक-क्षेत्रस्य इतिहासः निगूढः अस्ति। यथार्थतया अस्मद्देशस्य इतिहासमधिगन्तुं प्रकाशयितुं च संस्कृतस्य ज्ञानमावश्यकम्। अतः संस्कृतम् अध्येयम्।

19. सर्वेषां विश्वजनीनानां मानवानाम् उपयोगी ज्ञानराशिः यथा - वैद्यकम्, योगः, ध्यानम्, जलस्रोतोन्वेषणम्, राष्ट्ररक्षासूत्राणि, नक्षत्रज्ञानम्, खगोलज्ञानम्, वैश्विकसृष्टिः, यज्ञयागादिः, भौतिकज्ञानं, रासायनिकं ज्ञानं, भौगोलिकाः पर्यावरणीयाः सामाजिकाः ज्ञानाधाराः, नीतिः, न्यायः इत्यादयः विषयाः, अन्यानि चिरन्तनानि चिन्तनानि च विलसन्ति संस्कृतग्रन्थेषु। तादृशानां विविधविषयाणां ज्ञानाय अध्येयं संस्कृतम्।

20. भाषाभिमानस्य, धनाभिमानस्य, मताभिमानस्य, आभिजात्याभिमानस्य, क्षेत्राभिमानस्य, अहङ्कारस्य च दूरीकरणपूर्वकं सत्यं, शिवं, सुन्दरम् इति भावनापूर्वकं सर्वत्र समबुद्धित्वस्य साधनाय अनुभवाय च, ततः भारतस्य राष्ट्रियैकतायै, अखण्डतायै, विकासाय च अध्येयं संस्कृतम्।

21. जीवनस्य सर्वाङ्गीणविकासाय, ज्ञानं (अध्यात्मं), विज्ञानं, कौशलं, कला चेति सर्वेऽपि विषयाः नूनमेव अपेक्षिताः। एतेषां चतुर्णां भारतीयविषयाणां ज्ञानाय, संवर्धनाय, अनुभूत्यै च संस्कृतस्य ज्ञानम् अनिवार्यम् अस्ति। अतः संस्कृतम् अध्येयम्।

## वेदविभूषणप्रथमवर्षम्

## उत्तरमध्यमायाः प्रथमवर्षेण/एकादशवर्गेण समकक्ष्यम्

## पाठोद्देश्यानि

1. वीरवरस्य समर्पणम् इति कथामाध्यमेन छात्राः वीरवरस्य राजानं प्रति कर्तव्यं समर्पणभावं च ज्ञातुं शक्नुवन्ति। एषा कथा लोकनीतिं राजनीतिं जीवनोपायनीतिञ्च छात्रान् नितरां शिक्षयति।
2. "तन्मे मनः शिवसंकल्पमस्तु" इति पाठमाध्यमेन 'मम मनः शिवसंकल्पः धर्मविषयकः वा भवतु'। अर्थात् 'मन्मनसि सर्वदा धर्म एव विलसतु न कदाचित् पापम्' इति भावनया छात्राः प्रेरिता भवन्ति।
3. कालिदासनाटकरचनाशैल्याः अवगमनपुरस्सरं मानवसम्बन्धानां महत्त्वबोधनम्, स्नेहप्रवृत्त्या, वात्सल्येन, शकुन्तलायाः प्रकृतिं प्रति प्रेमभावः इत्यादिविषयान् जानन्ति।
4. हिरण्यगर्भसूक्तम् इति पाठात् प्रजापतेः हिरण्यगर्भस्य जगत्कारणविषयकं माहात्म्यं ज्ञायते।
5. भोजप्रबन्धे विद्यमानानि नीतिवाक्यानि अधीत्य तानि आचरणे आनेतुं प्रेरिताः भवन्ति।
6. भ्रातरः सहोदरैः सह कथमाचरेयुः, माता पुत्रैः पत्या च कथं व्यवहरेत्, पुत्राश्च पितृभ्यां सह कथमाचरेयुः, सर्वैः सह कथं भाव्यम् इत्यादीन् सद्भावान् छात्राः ज्ञातुं व्यवहर्तुं च प्रभवन्ति।
7. कादम्बर्याः चन्द्रापीडस्य शिक्षाव्यवस्था इत्यस्य अध्ययनेन प्राचीनकालिकी शिक्षाव्यवस्था कियती उत्कृष्टा आसीत् इति वेदितुं शक्नुवन्ति। प्राचीनकालस्य

विश्वविद्यालयस्य उत्कृष्टतमां निर्माणव्यवस्थाम् अभिजानन्ति। संस्कृतपदप्रयोगस्य सामर्थ्यमभिवर्धते।

8. नीतिश्लोकाः इति पाठस्य अध्ययनेन परोपकारभावनां, किं कर्तव्यम्, किम् अकर्तव्यम्, केन सह कथम् आचरणीयम् इत्यादीनां नानाविषयाणां ज्ञानं जायते।

9. लेखने सम्भाषणे च णिजन्त-सन्नन्त-यङन्त-यङ्लुगन्तानां प्रयोगः कस्मिन्नर्थे कथं कदा च करणीयः इति ससूत्रं विदन्ति।

10. दर्शनस्य अध्ययनेन बाह्यपदार्थानां चाक्षुष-घ्राणज-रासन-श्रौत्र-त्वाच-मानसादिसर्वविधं ज्ञानम् आत्मतत्त्वबोधश्च जायते।

11. संस्कृतकाव्येषु इतिहासः इति पाठमाध्यमेन कश्मीरप्रदेशस्य उत्पत्तिं तस्य सौन्दर्यं च ज्ञातुं शक्नुवन्ति। तथा तत्प्रदेशस्थानां जनानाम् आदर्शचरितं वीरत्वं च जानन्ति।

12. शिशुपालवधम् इति महाकाव्यस्य प्रथमसर्गं पठित्वा महर्षेः नारदस्य माहात्म्यं ज्ञातुं शक्नुवन्ति। भगवतः श्रीकृष्णस्य नारदं प्रति आदरः ज्ञातुं शक्यते।

13. हर्षचरितस्य दिवाकरमित्रस्य आश्रमवर्णनम् इति पाठेन बाणभट्टस्य प्रयोगकौशलं तथा दिवाकरमित्रस्य आश्रमस्य प्राकृतिकसौन्दर्यं जानन्ति।

**टिप्पणी** - पाठ्यपुस्तकेऽस्मिन् मुख्यांशानामेव समायोजनं कृतं वर्तते। समग्रज्ञानार्थं **शिक्षकैः मूलग्रन्थाः अध्याप्याः छात्रैश्च अध्येतव्याः**। अत्र सर्वेषां पाठगतानाम् उद्देश्यानां सामान्यतया ज्ञानाय एकत्र समायोजनेन उल्लेखः कृतः अस्ति। कक्ष्यायां साक्षात् पाठावसरे अन्तर्निहितान् उद्देश्यान् मनसि निधाय तं तं पाठम् अध्यापकः पाठयेत्, विद्यार्थिनः विद्यार्थिनीश्च बोधयेत्।

# पाठानुक्रमणिका


| | | |
|---|---|---|
| | प्रार्थना | |
| प्रथमः पाठः | वीरवरस्य समर्पणम् (वेतालपञ्चविंशतिः) | 1 – 10 |
| द्वितीयः पाठः | तन्मे मनः शिवसङ्कल्पमस्तु (शुक्लयजुर्वेदीयमाध्यन्दिनशाखा) | 11 - 17 |
| तृतीयः पाठः | अभिज्ञानशाकुन्तलम् (चतुर्थोऽङ्कः) | 18 - 34 |
| चतुर्थः पाठः | हिरण्यगर्भसूक्तम् | 35 - 41 |
| पञ्चमः पाठः | भोजप्रबन्धः (नैकेनापि समं गता वसुमती नूनं त्वया यास्यति) | 42 - 51 |
| षष्ठः पाठः | सांमनस्यसूक्तम् | 52 - 57 |
| सप्तमः पाठः | कादम्बरी (चन्द्रापीडस्य शिक्षाव्यवस्था) | 58 - 63 |
| अष्टमः पाठः | नीतिश्लोकाः | 64 - 70 |
| नवमः पाठः | णिजन्त-सन्नन्त-यङन्त-यङ्लुगन्त-प्रयोगाः | 71 - 77 |
| दशमः पाठः | दर्शनपरिचयः | 78 - 89 |
| एकादशः पाठः | संस्कृतकाव्येषु इतिहासः (राजतरङ्गिणी) | 90 - 98 |
| द्वादशः पाठः | शिशुपालवधम् – प्रथमसर्गः | 99 - 107 |
| त्रयोदशः पाठः | हर्षचरितम् | 108 - 114 |
| चतुर्दशः पाठः | स्मृतयः | 115 - 125 |

# श्रीवेदपुरुषाय नमः

## मङ्गलम्

१. ॐ समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि॥

ऋग्वेदः १०.१९१.३

२. नमस्ते शारदे ! देवि ! काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे ॥१॥
अक्षसूत्राङ्कुशधरा पाशपुस्तकधारिणी ।
मुक्तहारसभायुक्ता वाचि तिष्ठतु मे सदा ॥२॥
कम्बुकण्ठी सुताम्रोष्ठी सर्वाभरणभूषिता ।
महासरस्वती देवी जिह्वाग्रे सन्निविश्यताम् ॥३॥
शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ॥४॥

३. गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा
कावेरी सरयू महेन्द्रतनया चर्मण्वती वेदिका।
क्षिप्रा वेत्रवती महासुरनदी ख्याता गया गण्डकी
पूर्णाः पूर्णजलैः समुद्रसहिताः कुर्यात् सदा मङ्गलम्॥

४. वाल्मीकिः सनकः सनन्दनतरुव्यासो वसिष्ठो भृगु-
जाबालिजमदग्निकच्छजनको गर्गोऽङ्गिरा गौतमः।
मान्धाता ऋतुपर्णवैन्यसगरा धन्यो दिलीपो नलः
पुण्यो धर्मसुतो ययातिनहुषौ कुर्वन्तु नो मङ्गलम्॥

# प्रथमः पाठः

## वीरवरस्य समर्पणम्

### वेतालपञ्चविंशतिः

संस्कृतसाहित्यं कथानामाकरोऽस्ति। कथासरित्सागरः, पञ्चतन्त्रम्, हितोपदेशः, बृहत्कथामञ्जरी, भोजप्रबन्धः, कथामुक्तावली, कथामञ्जरी, जातकमालादयः कथाग्रन्थाः आख्यायिकानां स्रोतांसि वर्तन्ते। इह तादृशानां कथासुधानां सङ्ग्रहो दरीदृश्यते या अद्यत्वे अकल्पनीया विद्यन्ते। एतादृश्यः कथा लोकनीतिं राजनीतिं जीवनोपायनीतिञ्च अस्मान् नितरां शिक्षयन्ति। प्रस्तुतोऽयं पाठ्यांशः वेतालपञ्चविंशतिः इति प्रसिद्धकथासङ्ग्रहात् सङ्गृहीतोऽस्ति। इह आह्लादजनकघटनाभिः आश्चर्यजनकघटनाभिः विस्मयकारिघटनाभिश्च जीवननैतिकमूल्यानां निरूपणं वर्तते। अस्यां कथायां वीरवरस्य समर्पणभावं द्रष्टुं शक्नुमः। अस्मिन् जगति केवलं परोपकार एव सर्वोत्कृष्टं चिरस्थायि तत्त्वमस्ति।

**मूलपाठः -**

ततः स त्रिविक्रमसेनो नृपतिः पुनस्तस्य शिंशपातरोर्मूलं गत्वा निशि तं मुक्ताट्टहासं शवाधिष्ठितं वेतालं प्राप्य निष्कम्पः तथैव स्कन्धमारोप्य तस्य भिक्षोः सकाशमुदचलत्। तञ्च चलन्तम् अंसस्थः स वेतालः पुनरब्रवीत् - "राजन्! दुराचारस्य अस्य भिक्षोः कृते कोऽयं ते प्रयासः? निष्फले अमुष्मिन् प्रयत्ने तव विवेको न दृश्यते; यद् भवतु, त्वद्धत्त्या तवाध्वश्रम-विनोदिनीमपरामेकां कथां कथयामि, श्रूयताम्, -

अस्ति शोभावती नाम यथार्थनाम्नी काऽपि नगरी, तस्यामभूत् शूद्रको नाम प्रभूतपराक्रमो महाप्रतापो नृपतिः। यस्य जयिनः प्रतापानलोऽनवरतं वन्दीकृतारिवनिता धृतचामरमारुतैः ज्वलति स्म। येन च अलुप्तधर्मचरणा स्फीता वसुन्धरा रामादीनपि भूपतीन् विसस्मार।

कदाचित् तं महीपालं प्रियशूरं सेवितुं मालवात् कश्चित् वीरवरो नाम क्षत्रियः समागात्; तस्य धर्मवती नाम भार्य्या, शक्तिधरो नाम सुतः, वीरवती नाम्नी कन्या आसीत्। सेवापरिच्छदस्तस्य त्रयमेव, कट्यां कृपाणिका, करे तरवारिः, अपरे च करे चर्म; एतावन्मात्रपरिच्छदपरीवारः स प्रत्यहं तं राजानं दीनारशतपञ्चकं वेतनं प्रार्थयामास। राजा च तम् आकारसूचितोदारपौरुषं मत्वा, तस्मै यथेप्सितां वृत्तिं ददाति स्म, स्थापयति स्म च कौतुकात् प्रच्छन्नं चारान् तत्पृष्ठतः "किमेभिः प्रभूतैर्वेतनैरेष करोति ?" इत्यन्वेष्टुम्।

स च वीरवरः प्रातः राजदर्शनं कृत्वा, मध्याह्ने धृतायुधः तस्य सिंहद्वारे स्थित्वा च स्ववृत्तिलब्धानां दीनाराणां शतं गार्हस्थ्यनिर्वाहाय भार्याया हस्ते प्रादात्; अपरेण च शतेन वस्त्रम् अङ्गरागं ताम्बूलादीनि च क्रीणाति स्म; अपरञ्च शतं स्नात्वा विष्णोः शिवस्य च पूजार्थं विनियुयोज; अन्यच्च शतद्वयं विप्रेभ्यः दरिद्रेभ्यश्च प्रादात्। एवं विभज्य प्रत्यहं तानि पञ्चशतानि स व्ययीचकार। ततश्च अग्निकार्यादिकं विधाय भुक्त्वा च निशि एकाकी तदेव सिंहद्वारं धृतकृपाणचर्मा प्रत्यहं तस्थौ। एतत् सर्वं चारमुखात् श्रुत्वा राजा शूद्रकः भृशं तुतोष, निवारयामास च तान् चारान् पुनस्तस्य मार्गणे; मेने च विशेषपूजार्हं तं पुरुषातिशयम् ।

अथ गच्छत्सु दिनेषु एकदा धारावर्षिणि दिवानिशं जलदपटले गगनमावृण्वति, जनरहिते च समन्तात् राजमार्गे, एकाकी स वीरवरस्तस्मिन् सिंहद्वारे एवातिष्ठत्। स च राजा दिनपतावस्तं गते तादृशे भीषणे तमसि विजृम्भिते सधारावर्षे, तस्य वीरवरस्य भावं जिज्ञासुः निशि प्रासादाग्रमारुह्य जगाद - "कोऽत्र सिंहद्वारि स्थितः?" इति। तदाकर्ण्य - "अहमेव स्थितः" इति वीरवरः प्रत्यवादीत्। "अहो ! महासत्त्वोऽयं वीरवरः मद्भक्तः, तदेष मया अवश्यमेव महत् पदं प्रापणीयः" इति सञ्चिन्त्य राजा प्रासादादवतीर्य अन्तःपुरं प्रविश्य शयनमगात्।

अन्येद्युश्च तथैव मेघेषु धाराऽऽसारान् वर्षत्सु निशायां, भुवने कालतमसि विजृम्भिते, राजा पुनश्च तद्भावं जिज्ञासुः प्रासादमधिरुह्य सिंहद्वारमाभे - "कोऽत्र स्थितः ?" इति व्याजहार। वीरवरेण च "अहं स्थितो देव।" इति प्रोक्ते स राजा भृशं विसिष्मिये, शुश्राव च तावदतिदूरे सहसा रुदतीं कामपि स्त्रियं वामस्वरेण; व्यचिन्तयच्च - "केयं विषादविकलेव सप्रलापकरुणं विरौति ? राष्ट्रे च मम पराभवः नास्ति, न दरिद्रः, नापि कश्चित् दुःखितः, तदेषा का ?" इत । आदिदेश च करुणार्द्रचेताः तं वीरवरमधःस्थितं - "भो वीरवर ! श्रृणु, एषा दूरे काऽपि रोदिति, किमर्थमसौ रोदिति, का चेयम् ? त्वया गत्वा एतत् निरूप्यताम्" इति ।

तदाकर्ण्य स वीरवरः "तथा" इत्युक्त्वा निबद्धासिधेनुः करतलधृतकरवालश्च गन्तुं प्रावर्त्तत, नागणयत् तत् स्थूलधाराशिलावर्षि ज्वलद्विद्युद्विलोचनं नवमेघान्धकारम्। तञ्च तादृश्यां निशायां प्रस्थितमेकाकिनं दृष्ट्वा करुणाकौतुकाऽऽविष्टो राजा प्रासादादवतीर्य्य गृहीतासिरेकाकी अनुपलक्षितः तमनुजगाम।

स च वीरवरः रुदितमनुसरन् नगर्य्या बहिः सरोवरमेकं प्राप, ददर्श च तत्र - "हा शूर ! हा कृपालो ! हा वदान्य ! त्वया शून्या कथमहं वत्स्यामि ?" इत्येवं रुदतीं वारिमध्यवर्त्तिनीं कामपि स्त्रियम्। स च वीरवरः - "का त्वम् ? कथं वा रोदिषि ?" इति विस्मितः सचकितमपृच्छत्। सा अभ्यधात् - "भो वीरवर ! मां पृथिवीं जानीहि, अस्याश्च मम इदानीं धार्मिकः शूद्रको नाम राजा

भर्त्ता इतश्च तृतीये दिने तस्य राज्ञो मृत्युर्भविष्यति, तादृशमन्यं पतिं कथमवाप्नुयामिति शोकेन विधुराऽहं शोचामि” इति।

एतदाकर्ण्य स वीरवरस्त्रस्त इव तामब्रवीत् - “देवि ! अस्ति कश्चिदस्य प्रतीकारः ? येनास्य जगत्प्रभो रक्षा स्यात् ?” इति। तस्य वचनमाकर्ण्य सा वसुमती प्रत्यभाषत - “वत्स ! एक एवास्त्युपायः, कर्तुं च शक्तो भवान्” इति। वीरवरोऽवदत् - देवि ! तद्वद द्रुतं, यावत् शीघ्रं तत् साधयामि ! अन्यथा कोऽर्थः प्राणैरस्माकम् ?” तदाकर्ण्य धरित्री प्राब्रवीत् - “वत्स ! त्वदन्यः कः प्रवरः स्वामिभक्तः ? तदस्य उपायं श्रृणु - अस्य राजकुलस्यान्तिके राज्ञाऽनेन प्रतिष्ठापिता देवी चण्डिकाऽस्ति; तस्यै चेत् सत्वरं पुत्रमुपहारीकरोषि, तदा एष राजा न म्रियेत, अन्यत् शतं समा जीवेत्। अद्यैव चेत् भवता एतत् क्रियते, तदैव शिवं, नान्यथा” इति। पृथिव्या तथाऽभिहितः स वीरो वीरवरस्तदा - “यामि देवि ! करोमि अधुनैव एतत्” इति प्रत्यवादीत्। वसुन्धरा च - “भद्रं तेऽस्तु” इत्यभिधाय तिरोदधे। गुप्तमनुसृतः स राजा तत् सर्वं शुश्राव।

ततश्च गूढे तस्मिन् राजनि तद्भावं जिज्ञासमाने गच्छति स वीरवरस्त्वरितं गृहमगात्, आगत्य च तत्र पत्नीं धर्मवतीं विबोध्य तत् सर्वं वसुन्धराप्रोक्तमर्थं प्राब्रवीत्। साऽपि तदाकर्ण्य तं स्वामिनम् आह स्म - “प्रभो ! शिवं भाव्यं चेत्, तदा शिशुमेनं प्राबोध्य भवानेव ब्रवीतु”। ततः स वीरवरस्तं सुतं बालं सुप्तं प्राबोध्य वृत्तान्तमाख्याय समवोचत् - “पुत्र ! त्वयि चण्डिकादेव्या उपहारीकृते राजाऽसौ - जीवति, नो चेत् तृतीयेऽहनि विपत्स्यते”। तदाकर्ण्य बालोऽपि यथार्थं नाम दर्शयन् अकातरचित्तः सत्वरं पितरमवदत् - “तात! यदि राजा मम प्राणैर्जीवेत् तदाऽहं कृतार्थः, भुक्तस्य च तदन्नस्य परा निष्कृतिः प्रदत्ता स्यात्, तत किं विलम्ब्यते? शीघ्रं मां नीत्वा भगवत्या उपहारीकुरुष्व, मज्जीवनेन राज्ञोऽमङ्गलशान्तिर्भवतु”। इति तेनोक्तो वीरवरः सहर्षं - “साधु ! सत्यं त्वं मत्पुत्रः” इति तमभ्यनन्दयत्। तस्य भार्या धर्म्मवती, कन्या वीरवती च तस्यां रात्रौ ताभ्यां वीरवरशक्तिधराभ्यां सह चण्डिकागृहे ययतुः। राजाऽपि छन्नवेशः तान् पृष्ठतोऽलक्षितः समनुससार ।

तत्र देव्याः पुरः पित्रा स्कन्धावतारितः स शक्तिधरः देवीं प्रणम्य धैर्य्यराशिः कृपाञ्जलिर्न्यवेदयत्, - “देवि ! मम शिरस उपहारेण राजाऽसौ अन्यत् शतं वत्सरान् जीवन् अकण्टकं राज्यं करोतु”। इत्येवं प्रार्थयतस्तस्य सूनोः शक्तिधरस्य शिरश्छित्त्वा वीरवरः चण्डिकायै - “मत्पुत्रोपहारेण राजा जीवतु” इति वदन् प्रददौ। तत्क्षणम् अन्तरिक्षात् वागुदचरत्- “कस्त्वदन्यः स्वामिभक्तः ? भो वीरवर ! येन त्वया एकमात्रपुत्रेण तथा विधसत्पुत्रप्राणव्ययिना अस्य भूपतेः जीवनं राज्यञ्च दत्तम्” इति ।

तच्च सर्वं तस्मिन् नृपे पश्यति शृण्वति च तस्य वीरवरस्य कन्या वीरवती तस्य भ्रातुर्निहतस्य मूर्द्धानमाश्लिष्य शोकान्धा स्फुटितहृदया तत्क्षणात् व्यपद्यत। ततो भार्य्या धर्मवती वीरवरमब्रवीत्, - "नाथ ! राज्ञस्तावत् श्रेयः कृतम् इदानीमहं वदामि दृष्टा त्वया, कन्याऽपि मे शोकात् मृता, तदिदानीं नष्टापत्याया मे जीवितेन किम् ? प्रागेव मूढया मया राज्ञः श्रेयोऽर्थं स्वशिरः उपहर्त्तव्यमासीत्, तदधुना अनुज्ञां देहि, अहं शीघ्रम् अनलं प्रविशामि। इति आग्रहेण वदन्तीं तां वीरवरोऽवदत् - "एवं कुरुष्व, अपत्यदुःखैकमये जीवितव्ये का प्रीतिः ? यच्च त्वयोक्तं, - 'किं न दत्तो मयाऽऽत्मा' इति तदत्र व्यथां मा कुरु, यदि अन्यसाध्यमेतद्राज्ञः श्रेयो भवेत् तदाऽहमपि किम् आत्मानं न दद्याम् ? तत् प्रतीक्षस्व तावत्, अमीभिर्दारुभिस्ते चितां रचयामि"। इत्युक्त्वा चितायां तेन सज्जितायां ज्वलन्त्यां धर्मवती पत्युः पादयोः पतित्वा तां चण्डीं देवीं प्रणम्य व्यजिज्ञपत्, "देवि! जन्मान्तरेऽपि अयमेव मे पतिर्भूयात् अस्य च प्रभोः शूद्रकस्य मदीयेनात्मजेन शिवम्" इति समुदीर्य, तस्मिन्नेव ज्वालामालिनि अनले देहं न्यक्षिपत्।

ततश्च स वीरवरश्चिन्तयामास - "निष्पन्नं मे राजकार्यं, दिव्यवाण्या विज्ञातं, भुक्तस्य च राजान्नस्य साम्प्रतमनृणोऽस्मि, तदिदानीमेकस्य मम केयं जीवनतृषा ? भरणीयं सर्वं कुटुम्बकं व्ययीकृत्य एकमात्मानं जीवयन् मादृशो न शोभते; तत् किम् आत्मोपहारेण अम्बिकान् प्रीणयामि?" इत्यालोच्य स वीरवरस्तां देवी प्रथमं स्तुत्या उपतस्थे - "जय महिषासुरमर्दिनि ! तारिणि ! दानवदारिणि ! त्रिशूलधारिणि ! विबुधोत्सवकारिणि ! भुवनत्रयधारिणि ! जय मातृवरे! जगदर्चितरणे! शरण्ये ! निःश्रेयसकारिणि ! भक्तजनानां ! कालि ! कपालिनि ! कङ्कालिनि ! शिवे ! नमोऽस्तु ते, प्रसीदेदानीं शूद्रकस्य नृपतेरनेन मदीयेन मस्तकोपहारेण" इति स्तुत्वा स वीरवरः सद्यः तरवारेण स्वं शिरश्चिच्छेद्।

तदालोक्य स छन्नस्थितः शूद्रको नृपः व्याकुलः सदुःखः साश्चर्यश्च व्यचिन्तयत् - "अहो ! न मया ईदृशमन्यत्र दृष्टं वा श्रुतम्; साधुनाऽनेन सपरिवारेण मदर्थे दुष्करं कृतम्। विचित्रेऽस्मिन् संसारे कोऽन्यः अनेन समो धीरः ? प्रभोरर्थे यः पुत्रादीन् स्वञ्च जीवितं प्रादात्; एतस्य उपकारस्य सदृशमुपकारं यदि अहं न कुर्यां, तदा मे प्रभुत्वेन किम्? जीवितेन वा पशोरिव किम्? सत्त्वभ्रंशात् सर्वत्रैव मे अयशो भविष्यति"। इति सञ्चिन्त्य स राजा कोशात् करवालम् आकृष्य समुपेत्य तां देवीं व्यजिज्ञपत् - "देवि ! सततमनुप्रपन्नस्य मम अधुना अनेन शरीरोपहारेण सुप्रीता सती अनुग्रहं कुरु; अयं नानागुणयुतो वीरवरः सपरिवारो मदर्थं त्यक्तकलेवरः साम्प्रतं जीवतु"। इति उदीर्य्य असिना यावत् स्वं शिरश्छेत्तुं प्रावर्त्तत, तावत् गगनात् भारती उदभूत् - "वत्स ! मा साहसं कृथाः, अनेन ते सत्वेन परितुष्टाऽस्मि, प्रत्युज्जीवतु अयं सापत्यदारो वीरवरः"। इत्युक्त्वा

तस्याम् अन्तरिक्षवाचि विरतायामेव स वीरवरः पुत्रेण दुहित्रा पत्न्या च सह अक्षतशरीरो जीवन्नुत्तस्थौ।

तदवलोक्य राजा पुनः छन्नविग्रहः हर्षाश्रुपूरया दृष्ट्या तान् पश्यन् न तृप्तिमाययौ। सोऽपि वीरवरः सुप्तोत्थित इव तं पुत्रं पत्नीं दुहितरञ्च पश्यन् विभ्रान्तमानसः समभवत् अपृच्छच्च पृथङ्नामग्रहं तान्; "कथं विनष्टा यूयं जीवन्तः पुनरुत्थिताः ? किमयं मे विभ्रमः ? आहोस्वित् स्वप्नः ? माया वा ? उत देव्या अनुग्रहः ?" एवं वदन् स दाराऽपत्यैः - "देव्यनुग्रहेणैव वयं जीवामः" इति निजगदे। ततः स वीरवरः "तथा" इति मत्वा तां देवीं प्रणम्य पुत्रदारानादाय कृतार्थो गृहं ययौ। तत्र च तं पुत्रं ताञ्च भार्यां दुहितरञ्च प्रवेश्य तस्यामेव रात्रौ राज्ञः सिंहद्वारमागमत्।

राजा च शूद्रक एतत् सर्वं दृष्ट्वा अलक्षित एव गत्वा स्वं प्रासादमारुरोह, पप्रच्छ च - "कोऽत्र सिंहद्वारे स्थितः ?" इति। वीरवरः प्रत्यवादीत् - "प्रभो ! अहं वीरवरस्तिष्ठामि देवादेशाच्च तां रुदतीं स्त्रियं प्रति गतश्चाहम्; सा काऽपि राक्षसी, मम वचसा दृष्ट्वैव क्वापि प्रनष्टा" इति। एतत्तस्य वचः श्रुत्वा राजा नितरां विस्मितो दृष्टोदन्तो व्यचिन्तयत् - "अहो ! समुद्रगम्भीरधीरचित्ता मनस्विनः, ये अनन्यसामान्यं कर्म्म कृत्वाऽपि नोद्गिरन्ति"। इत्यालोच्य प्रासादादवरुह्य स राजा अन्तःपुरं गत्वा रात्रिशेषम् अत्यवाहयत्।

अथ प्रातः आस्थानसमये दर्शनार्थमुपगते वीरवरे स्थिते हृष्टो राजा सर्वेभ्यो मन्त्रिभ्यः अन्येभ्यश्च तं रात्रिवृत्तान्तमवर्णयत्। सर्वे सविस्मयाः मोहिताश्च वीरवरगुणश्रवणेन तत्क्षणमभवन्, प्राशशंसुश्च - "साधु साधु" इति। ततो राजा वीरवरश्च अन्योऽन्यं तुल्यविभवौ सुखमासाताम्।

इति कथामाख्याय वेतालस्तं त्रिविक्रमसेनं नृपमपृच्छत्, "राजन् ! एतेषु कोऽधिकस्ते मतः? यदि जानन्न वक्ष्यसि; तदा पूर्व एव स शापः सेत्स्यति"। एतदाकर्ण्य स राजा तं वेतालमभाषत, देवयोने ! एतेषु सर्वेषु राजा शूद्रक एव समधिकः प्रवरः" इति। वेतालोऽब्रवीत् - नृपते ! कथं वीरवरो न ? यस्य तुल्यः पृथिव्यां सेवको न विद्यते तत्पत्नी वा कथं समधिकेति न प्रशस्यते ? या सूनोः पशुपहारतां प्रत्यक्षं दृष्ट्वाऽपि न धैर्य्यात् प्रच्युताऽऽसीत्; स वा पुत्रः शक्तिधरः कथं नाभ्य अधिकः ? यस्य बालस्यापि सततस्तादृशः सत्त्वोत्कर्षः। तत् कथमेकं शूद्रकं नृपं त्वं प्रवरं भाषसे !" इत्युक्तवन्तं वेतालं स नृपः पुनरवादीत्, "कुलपुत्रो वीरवरस्तादृक् न, तस्य प्राणैः सुतैः दारश्च स्वामिसंरक्षणकार्यम्; तस्य च पत्नी कुलजा साध्वी पतिप्राणा भर्तृवर्मानुसरन्ती धर्ममेव पालितवती शक्तिधरोऽपि तयोर्जातस्तादृश एव, यादृशास्तन्तवः तादृश एव पटो जायते। येषां भृत्यानां प्राणैः नृपेण आत्मा रक्ष्यते, तेषामर्थं प्राणांस्त्यजन् शूद्रक एव सर्वेषु विशिष्यते"।

इति वचः समाकर्ण्य स वेतालः नृपतेः अंसादलक्षितः सहसा निजाऽऽवासं ययौ। राजाऽपि तन्मायया अनुच्चलितोऽपि तस्यामेव निशि पुनस्तमानेतुं मतिमकरोत्।

## शब्दार्थाः

| | |
|---|---|
| शिंशपातरुः | भस्मगर्भा नाम वृक्षः |
| स्फीता वसुन्धरा | समृद्धा भूमिः |
| समागात् | समागच्छत् |
| तरवारिः | खड्गः/असिः |
| दीनारः | प्राचीनभारतीयमुद्रा |
| गार्हस्थ्यनिर्वाहाय | गार्हस्थ्याश्रमनिर्वाहार्थम् |
| प्रादात् | दत्तवान् |
| व्ययीचकार | व्ययम् अकरोत् |
| धृतकृपाणचर्मा | खड्गं कवचं च यः धृतवान् सः |
| तस्थौ | अतिष्ठत् |
| चारमुखात् | चरस्य मुखात्/दूतस्य मुखात् |
| भृशम् | अतिशयः |
| तुतोष | अतुष्यत् |
| मार्गणे | अन्वेषणे |
| मेने | अमन्यत |
| जलदपटले | मेघसमूहे |
| गगनमावृण्वति | गगनम् आच्छादयति |
| विजृम्भिते | व्याप्ते |
| अन्येद्युः | अन्यस्मिन् दिने |
| विसिष्मिये | विस्मयापन्नः |
| वामस्वरः | करुणस्वरः |
| व्यपद्यत | अम्रियत |
| व्यजिज्ञपत् | अज्ञापयत् |

| | |
|---|---|
| करवालः | कृपाणः |
| कलेवरम् | शरीरम् |
| मनस्विनः | बुद्धिमन्तः |

## अभ्यासः

### १. एकवाक्येन उत्तरत -

(क) शूद्रको नाम महाप्रतापो नृपतिः कुत्रत्य आसीत्?

(ख) वीरवरः कस्मात् प्रदेशात् समागात्?

(ग) वीरवरस्य पुत्रस्य नाम किम्?

(घ) वीरवती कस्य पुत्री आसीत्?

(ङ) दीनारशतपञ्चकं वेतनं कस्यासीत्?

(च) वीरवरः गार्हस्थ्यनिर्वाहाय भार्यायाः हस्ते कियत् द्रव्यं प्रादात्?

(छ) अन्योऽन्यं तुल्यविभवौ सुखमासाताम् इति कस्य कृते कथनम्?

### २. अधोलिखितप्रश्नानामुत्तराणि संस्कृतभाषया लिखत -

(क) विष्णोः शिवस्य च पूजार्थं कियद् द्रव्यं विनियुयोज?

(ख) धृतकृपाणचर्मा प्रत्यहं कुत्र कः तस्थौ?

(ग) महासत्त्वोऽयं वीरवरः मद्भक्तः इति कस्य वचनम्?

(घ) अतिदूरे सहसा रुदतीं स्त्रियं वामस्वरेण कः शुश्राव?

(ङ) रुदितमनुसरन् नगर्य्याः बहिः सरोवरमेकं कः प्राप?

(च) धार्मिकः शूद्रको नाम मम भर्ता इति कस्य वचनम्?

(छ) राजकुलस्यान्तिके कस्याः देव्याः स्थानमासीत्?

(ज) वीरवरस्य परिवारः पुनः कथं सञ्जीवितः?

### ३. रिक्तस्थानं पूरयत -

(क) इतश्च तृतीये ...................... भविष्यति।

(ख) अस्य राजकुलस्या ...................... चण्डिकाऽस्ति।

(ग) ततश्च गूढे तस्मिन् ...................... वीरवरस्त्वरितं गृहमगात्।

(घ) मज्जीवनेन ...................... भवतु।

(ङ) समुद्रगम्भीर ..................... मनस्विनः।

(च) मत्पुत्रो ..................... जीवतु।

(छ) देवि! जन्मान्ते ..................... पतिर्भूयात्।

## ४. वीरवरेण कृतानि देविस्तुतिविषयकाणि सम्बोधनवचनानि कानि इति लिखत -

यथा - जय महिषासुरमर्द्दिनि !, शिवे !।

(क) ------------------------------------

(ख) ------------------------------------

(ग) ------------------------------------

(घ) ------------------------------------

(ङ) ------------------------------------

## ५. अधोलिखितपदानां सन्धिविच्छेदपूर्वकं सन्धिसूत्राणि लिखत -

| | | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|---|
| (क) | देव्यनुग्रहेणैव | ---------- + ---------- | ------------------------- |
| (ख) | देवदेशाच्च | ---------- + ---------- | ------------------------- |
| (ग) | पृथङ्नामग्रहम् | ---------- + ---------- | ------------------------- |
| (घ) | सेवापरिच्छदस्तस्य | ---------- + ---------- | ------------------------- |
| (ङ) | दिनपतावस्तम् | ---------- + ---------- | ------------------------- |
| (च) | तदैव | ---------- + ---------- | ------------------------- |
| (छ) | तृतीयेऽहनि | ---------- + ---------- | ------------------------- |
| (ज) | अत्यवाहयत् | ---------- + ---------- | ------------------------- |
| (झ) | सुप्तोत्थितः | ---------- + ---------- | ------------------------- |
| (ञ) | प्राणांस्त्यजन् | ---------- + ---------- | ------------------------- |

## ६. अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासं लिखत -

| | | समासविग्रहः | समासनाम |
|---|---|---|---|
| (क) | महाप्रतापः | ------------------------- | ------------------------- |
| (ख) | राजदर्शनम् | ------------------------- | ------------------------- |
| (ग) | करुणाप्रचेताः | ------------------------- | ------------------------- |

(घ) नवमेघान्धकारम् ------------------------- -------------------------

(ङ) मत्पुत्रोपहारेण ------------------------- -------------------------

(च) वामस्वरः ------------------------- -------------------------

(छ) जलदपटलः ------------------------- -------------------------

७. अधोलिखितक्रियापदानां धातुलकारपुरुषवचनानि लिखत -

| | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) अस्ति | ---------- | ---------- | ---------- | ---------- |
| (ख) समागात् | ---------- | ---------- | ---------- | ---------- |
| (ग) भाषसे | ---------- | ---------- | ---------- | ---------- |
| (घ) जगाम | ---------- | ---------- | ---------- | ---------- |
| (ङ) वत्स्यामि | ---------- | ---------- | ---------- | ---------- |
| (च) शोचामि | ---------- | ---------- | ---------- | ---------- |
| (छ) जीवति | ---------- | ---------- | ---------- | ---------- |
| (ज) अभ्यनन्दयत् | ---------- | ---------- | ---------- | ---------- |
| (झ) पश्यति | ---------- | ---------- | ---------- | ---------- |
| (ञ) भूयात् | ---------- | ---------- | ---------- | ---------- |
| (ट) शृणु | ---------- | ---------- | ---------- | ---------- |

८. अधः प्रदत्तानां पदानां प्रकृतिप्रत्ययौ पृथक् कुरुत -

| | प्रकृतिः | प्रत्ययः |
|---|---|---|
| (क) अन्वेष्टुम् | ---------- | ---------- |
| (ख) अधिरुह्य | ---------- | ---------- |
| (ग) जिज्ञासमाने | ---------- | ---------- |
| (घ) दृष्ट्वा | ---------- | ---------- |
| (ङ) चलन्तम् | ---------- | ---------- |
| (च) उक्त्वा | ---------- | ---------- |
| (छ) प्रापणीयः | ---------- | ---------- |
| (ज) भर्ता | ---------- | ---------- |
| (झ) दत्तम् | ---------- | ---------- |

(ञ) वृण्वति ---------- ----------

९. अधोलिखितपदानां पर्यायपदानि लिखत -

| | | | | | |
|---|---|---|---|---|---|
| (क) | नृपः | ---------- | (ख) | पुत्रः | ---------- |
| (ग) | कन्या | ---------- | (घ) | भार्य्या | ---------- |
| (ङ) | दया | ---------- | (च) | वसुन्धरा | ---------- |
| (छ) | करवालः | ---------- | (ज) | कलेवरम् | ---------- |

१०. 'क' वर्गे विशेषणपदानि 'ख' वर्गे च विशेष्यपदानि च प्रदत्तानि तानि समुचितं संयोजयत।

| | 'क' वर्गः | 'ख' वर्गः |
|---|---|---|
| (क) | विजृम्भिते | दिनेषु |
| (ख) | गच्छत्सु | तमसि |
| (ग) | जनरहिते | राजनि |
| (घ) | धार्मिकः | नृपतिः |
| (ङ) | तस्मिन् | शूद्रकः |
| (च) | महाप्रतापः | राजमार्गे |

११. वीरवरस्य त्यागविषये राजभक्तिविषये वा स्वभावं सुष्ठु गिरा वर्णयत।

## योग्यताविस्तारः

पठितेयं कथा वेतालपञ्चविंशतिः इत्याख्यकथासङ्ग्रहात् सङ्गृहीता विद्यते। यत्र आश्चर्य-जनिकया मनोरञ्जिकया च घटनया जीवनमूल्यानां स्वकर्तव्यानाञ्च निरूपणं वर्तते। अस्यां कथायां वीरवरो राज्ञः संरक्षणाय सुतकन्यापत्नीश्चोपहाररूपेण देव्यै समर्पयति। धारावर्षे भीषणे तमसि विजृम्भिते निशायां स्वकर्तव्यनिर्वहन् तटस्थो भूत्वा सिंहद्वारमेवावतिष्ठत्। एतादृश्यां परिस्थितौ वीरवरः यं कमपि न दूषयन् देव्याः स्तुतिं कुर्वन् आत्मानं समर्पयितुमिच्छति। अस्य धैर्यं त्यागञ्चानुपमं विद्यते। राजा शूद्रकः प्रजारञ्जनतत्परः येन केन प्रकारेण स्वराज्ये दारिद्य-दुःखादिक्लेशान् दूरीकर्तुं सततं प्रयतमानः स्वस्य शौर्येण सर्वारीन् नाशयन् प्रजाः पोषयति स्म। राष्ट्रे च मम पराभवो नास्ति। न दरिद्रः नापि कश्चित् दुःखितः इत्युक्तगद्यांशेनैव शूद्रकश्च शौर्यं प्रजावात्सल्यं च विज्ञायते। तथा गुणयुक्तः शूद्रकः वीरवरस्य त्यागं विज्ञाय करुणभावेन स्वशिरःसमर्पणं चण्डिकायै न्यवेदयत्। अतः महाप्रतापशालिनः राज्ञः शूद्रकस्यौदार्यं शौर्यं प्रजावत्सलत्वञ्च विज्ञायते। प्रजाराज्ञोः मिथः स्नेहः कथं भवितव्यमिति अनया कथया भोत्स्यते।

# द्वितीयः पाठः

## तन्मे मनः शिवसङ्कल्पमस्तु

### शुक्लयजुर्वेद-माध्यन्दिनशाखा

षण्मन्त्रात्मकस्यास्य सूक्तस्य ऋषिः याज्ञवल्क्यः, मनः देवता, त्रिष्टुप् छन्दश्च।

चत्वारो वेदाः। तेषु यज्ञप्रधानो वेदो यजुर्वेद इति। अस्मिन् यजुर्वेदे चत्वारिंशद् अध्यायाः सन्ति। चत्वारिंशति अध्यायेषु चतुस्त्रिंशत्तमे अध्याये शिवसङ्कल्पसूक्तं वर्तते। सूक्तेऽस्मिन् षण्मन्त्रा विद्यन्ते। अस्य द्रष्टा ऋषिः याज्ञवल्क्यः, देवता मनः, छन्दश्च त्रिष्टुब् वर्तते। अस्मिन् सूक्ते मनसा वाचा कर्मणा च शिवपूर्णः सङ्कल्पो भवतु इतीदृशा विचाराः प्राप्यन्ते।

**यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।**
**दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥ १॥**

**अन्वयः -** यत् जाग्रतः दूरम् उदैति सुप्तस्य तथा एव एति तत् दूरङ्गमं ज्योतिषां ज्योतिः एकं दैवं तत् मे मनः शिवसङ्कल्पम् अस्तु।

यन्मनः जाग्रतः पुरुषस्य जनस्य दूरम् उदैति उद्गच्छति चक्षुः प्रभृतीन्यपेक्ष्य। यच्च दैवं विज्ञानात्मा सः अनेन गृह्यते। यच्च मनः तत् सुप्तस्य तथैव तेनैव प्रकारेण एति। यच्च दूरङ्गमं दूरं गच्छतीति दूरङ्गमम् अतीतानागतवर्तमानव्यवहितविप्रकृष्ट-पदार्थानां ग्राहकम्। ज्योतिषां श्रोत्रादीनां विज्ञाननेतॄणां मध्य एकमेव ज्योतिः। मनः श्रोत्रादीन्द्रियाणामेकमेव ज्योतिः प्रकाशकं प्रवर्तकम्। आत्मा मनसा संयुज्यते मन इन्द्रियेण, इन्द्रियमर्थेन ततः प्रत्यक्षमुत्पद्यते इति न्यायोक्तेः मनः सम्बन्धमन्तरा इन्द्रियाणाम् अप्रवृत्तेः। तत् मे मनः तादृशं मे मनः शिवसङ्कल्पं शान्तसङ्कल्पम् अस्तु। शिवः कल्याणकारी धर्मविषयः सङ्कल्पो यस्य। मन्मनसि सदा धर्म एव भवतु न कदाचित्पापमिति अर्थः।

**येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।**
**यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥ २॥**

**अन्वयः -** येन अपसः मनीषिणः यज्ञे धीराः विदथेषु कर्माणि कृण्वन्ति यत् अपूर्वं प्रजानाम् अन्तः यक्षं तत् मे मनः शिवसङ्कल्पम् अस्तु।

येन मनसा सता अपसः कर्मवतः मेधाविनः यज्ञे कर्माणि कृण्वन्ति कुर्वन्ति विदथेषु विद्यन्ते ज्ञायन्ते इति वेदनेषु ज्ञानेषु यज्ञविधिविधानेषु ज्ञानेषु धीराः धीमन्तः यच्च यक्षं यष्टुं शक्यं, पूज्यं यच्च अन्तर्मध्ये, प्रजायन्ते इति प्रजाः, प्रजानामास्ते तन्मे मनः तादृशं मे मनः शिवसङ्कल्पमस्तु।

**यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।**

**यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥३॥**

**अन्वयः -** यत् प्रज्ञानं चेतः उत धृति च यत् प्रजासु अन्तः अमृतं ज्योतिः यस्मात् ऋते किंचन कर्म न क्रियते तत् मे मनः शिवसङ्कल्पम् अस्तु।

यन्मनः प्रज्ञानम्, विशेषेण ज्ञानजनकम्। यत् मनः चेतयति सम्यक् ज्ञापयति तच्चेतः। सामान्यविशेषज्ञानजनकम्। यच्च मनो धृति धैर्यरूपम्। यच्च मनः प्रजासु जनेषु अन्तर्वर्तमानं सत् ज्योतिः प्रकाशकं सर्वेन्द्रियाणाम्। यच्चामृतम् अमरणधर्मि। आत्मरूपत्वात्। यस्मात् मनसः ऋते यन्मनो विना किंचन किमपि कर्म न क्रियते जनैः। सर्वकर्मसु प्राणिनां मनःपूर्वं प्रवृत्तेः मनःस्वास्थ्यं विना कर्माभावादित्यर्थः। तन्मे मनः तादृशं मे मनः शिवसङ्कल्पमस्तु।

**येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्।**

**येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु॥४॥**

**अन्वयः -** येन अमृतेन इदं भूतं भुवनं भविष्यत् सर्वं परिगृहीतं येन सप्तहोता यज्ञः तायते तत् मे मनः शिवसङ्कल्पम् अस्तु।

येन मनसा इदं सर्वं परिगृहीतं परितः सर्वतो ज्ञातम्। भूतं भूतकालिकम्। भुवनं वर्तमानकालिकं भविष्यत्कालिकं च वस्तु सर्वं ज्ञातम्। त्रिकालसम्बद्धेषु वस्तुषु मनः प्रवर्तते इत्यर्थः। कीदृशेन अमृतेन शाश्वतेन। मुक्तिपर्यन्तं श्रोत्रादीनि नश्यन्ति मनस्त्वनश्वरम्। येन मनसा होतृमैत्रावरुणादिसप्तहोतृकः अग्निष्टोमादिः यज्ञः तायते विस्तार्यते, तन्मे मनः तादृशं मे मनः शिवसङ्कल्पमस्तु।

**यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः।**

**यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिव सङ्कल्पमस्तु॥५॥**

**अन्वयः -** यस्मिन् ऋचः यस्मिन् साम यजूंषि रथनाभौ आराः इव प्रतिष्ठिता यस्मिन् प्रजानां सर्वं चित्तम् ओतं तत् मे मनः शिवसङ्कल्पम् अस्तु।

यस्मिन् मनसि ऋचः प्रतिष्ठिताः, यस्मिन् मनसि सामानि प्रतिष्ठितानि, यस्मिन् मनसि यजूंषि प्रतिष्ठितानि। मनसः स्वास्थ्ये एव वेदत्रयीस्फूर्तेः मनसि शब्दमात्रस्य प्रतिष्ठितत्वम्। अन्नमयं हि सौम्य मनः इति छान्दोग्ये। मनसः एव स्वास्थ्ये वेदोच्चारणशक्तिः प्रतिपादिता। तत्र दृष्टान्तः - रथनाभौ आराः इव। यथा आराः रथचक्रनाभौ मध्ये प्रतिष्ठिताः तद्वच्छब्दजालं मनसि। किञ्च प्रजानां सर्वं चित्तं सर्वपदार्थविषयि ज्ञानं यस्मिन् मनसि तं प्रोतं निक्षिप्तं तन्तिसन्ततिः पटे इव सर्वं ज्ञानं मनसि निहितम्। मनस्स्वास्थ्ये एव ज्ञानोत्पत्तिः, मनोवैयग्र्ये च ज्ञानाभावः। तन्मे मनः तादृशं मे मनः शिवसङ्कल्पं शान्तव्यापारमस्तु।

**सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।**
**हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु॥ ६ ॥**

**अन्वयः -** यत् मनुष्यान् सुषारथिः अश्वानिव नेनीयते अभीशुभिः वाजिन इव यत् हृत्प्रतिष्ठम् अजिरं जविष्ठं तत् मे मनः शिवसङ्कल्पम् अस्तु।

सुषारथिः अश्वानिव शोभनः सारथिर्यन्ता यथा कशया अश्वान् नेनीयते अत्यर्थं जनान् इतस्ततो नयति। मनः प्रेरिता एव प्राणिनः प्रवर्तन्ते कार्ये। मनुष्यान् इति प्राणिमात्रस्य बोधनार्थम्। अभीशुभिः वाजिन इव। यथा सुषारथिः प्रग्रहैः अश्वान् नेनीयते। रज्जुभिः नेनीयते। अत्रोपमाद्वयम्। प्रथमायां नयनं, द्वितीयायां नियमनम्। यच्च मनः हृत्प्रतिष्ठम्। हृदि प्रतिष्ठा स्थितिर्यस्य तत्। हृदि एव मनः उपलभ्यते। यच्च मनः अजरम्, जरारहितम्। यच्च मनः जविष्ठम्, अतिवेगवत्, अतिशयेन गन्तृ। तन्मे मनः तादृशं मे मनः शिवसङ्कल्पं शान्तव्यापारमस्तु।

## शब्दार्थाः

| | |
|---|---|
| दूरङ्गम् | दूरं गच्छति यत् |
| शिवसङ्कल्पम् | शिवः (कल्याणं) सङ्कल्पः यस्य तत् (मनः) |
| दैवम् | प्रकाशरूपात्मा |
| सुषारथिः | प्रवीणः सारथिः। ऋक्प्रातिशाख्यानुसारं (१.६५) |

| | |
|---|---|
| | ऋकारादिदशनामिस्वरा भवन्ति। ऋ, ॠ, इ, ई, उ, ऊ, ए, ऐ, ओ तथा औ। नामिस्वरानन्तरम् आगतस्य 'सकारस्य' षकारादेशो |
| नेनीयते | पौनःपुन्येन नयति |
| अभीशुभिः | प्रग्रहैः |
| वाजिनः | घोटकाः/अश्वाः |
| हृत्प्रतिष्ठम् | हृदि प्रतिष्ठा यस्य तत् |
| जविष्ठम् | वेगवत् |
| ओतम् | परितः |
| विदथेषु | विपश्चित्सु |
| धीराः | धीमन्तः |
| तायते | तनोति |
| रथनाभौ | रथचक्रस्य मध्ये |
| आराः | चर्मभेदिका |

## अभ्यासः

१. **संस्कृतभाषया उत्तरत -**

(क) शिवसङ्कल्पसूक्तं कस्मिन् वेदेऽस्ति ?

(क) ज्योतिषां ज्योतिः किं कथ्यते ?

(ग) मनसि ऋचः साम यजूंषि कथमिव प्रतिष्ठिताः ?

(घ) केन इदं भूतं भुवनं भविष्यत् सर्वं परिगृहीतम् ?

(ङ) कुत्र ऋचः प्रतिष्ठिताः ?

(च) हृत्प्रतिष्ठम् अजिरं जविष्ठं तन्मे मनः मनुष्यान् कथं नेनीयते ?

(छ) के यज्ञे विदथेषु मनसा कर्माणि कृण्वन्ति ?

२. **अधोलिखितक्रियापदैः सह कर्तृपदानि योजयत -**

(क) मे ........................ शिवसङ्कल्पम् अस्तु। (मनः/आत्मा)

(ख) ........................ यज्ञे कृण्वन्ति। (पण्डिताः/मनीषिणः)

(ग) ........................ जाग्रतः पुरुषस्य जनस्य दूरम् उदैति। (मनः/श्रोत्रम्)

(घ) ......................... सप्तहोता यज्ञः तायते। (केन/येन)

(ङ) ......................... मनुष्यान् सुषारथिः अश्वानिव नेनीयते। (मनसा/वचसा)

### ३. रिक्तस्थानानि पूरयत -

(क) यज्जाग्रतो दूरमुदैति ......................... तथैवैति।

(ख) ......................... कृण्वन्ति विदथेषु धीराः।

(ग) यस्मान्न ऋते कर्म .........................।

(घ) येनेदं भूतं ......................... सर्वम्।

(ङ) हृत्प्रतिष्ठं ......................... शिवसङ्कल्पमस्तु।

### ४. यथायोग्यं समायोजयत -

| | |
|---|---|
| (क) तन्मे मनः | कर्म क्रियते |
| (ख) तदु सुप्तस्य | मनीषिणः |
| (ग) येन कर्माण्यपसो | एकं ज्योतिः |
| (घ) मनः ज्योतिषाम् | तथैवैति |
| (ङ) यस्मान्न ऋते किञ्चन | शिवसङ्कल्पमस्तु |

### ५. रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत -

(क) मनः जाग्रतः दूरङ्गमुदैति।

(ख) प्रज्ञानां मनः अन्तःस्थितम्।

(ग) मनसः ऋते न किञ्चन कर्म क्रियते।

(घ) मनसा सप्तहोता यज्ञः तायते।

(ङ) मनसि प्रज्ञानां सर्वं ज्ञानम् ओतम्।

### ६. एकवचनात् बहुवचने बहुवचनात् एकवचने च परिवर्तयत -

| | | | | | |
|---|---|---|---|---|---|
| (क) | यज्ञे | ---------- | (ख) | मनीषिणः | ---------- |
| (ग) | ऋक् | ---------- | (घ) | कर्माणि | ---------- |
| (ङ) | रथनाभौ | ---------- | (च) | यजूंसि | ---------- |
| (छ) | आराः | ---------- | (ज) | वाजिनः | ---------- |
| (झ) | प्रज्ञानाम् | ---------- | | | |

## ७. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनिर्देशः कार्यः।

| | | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|---|
| (क) | तथैवैति | ---------- + ---------- | ------------------------ |
| (ख) | यज्जाग्रतः | ---------- + ---------- | ------------------------ |
| (ग) | कर्माण्यपसः | ---------- + ---------- | ------------------------ |
| (घ) | तन्मे | ---------- + ---------- | ------------------------ |
| (ङ) | धृतिश्च | ---------- + ---------- | ------------------------ |
| (च) | यस्मिन्नृचः | ---------- + ---------- | ------------------------ |
| (छ) | नेनीयतेऽभीशुभिर्वाजिनः | ---------- + ---------- | ------------------------ |

## ८. प्रकृतिप्रत्ययविभागः क्रियताम् -

| | | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | तायते | ---------- | ---------- |
| (ख) | भविष्यत् | ---------- | ---------- |
| (ग) | नेनीयते | ---------- | ---------- |
| (घ) | जाग्रतः | ---------- | ---------- |
| (ङ) | उदैति | ---------- | ---------- |
| (च) | अपसः | ---------- | ---------- |

## ९. अधोलिखितपदानां भावार्थं संस्कृतभाषया मातृभाषया वा स्पष्टीकुरुत।

| | | संस्कृतभाषया | मातृभाषया |
|---|---|---|---|
| (क) | जाग्रतः | ------------------------ | ------------------------ |
| (ख) | उदैति | ------------------------ | ------------------------ |
| (ग) | कर्माण्यपसः | ------------------------ | ------------------------ |
| (घ) | चेतः | ------------------------ | ------------------------ |
| (ङ) | सप्तहोता | ------------------------ | ------------------------ |
| (च) | ऋचः | ------------------------ | ------------------------ |
| (छ) | अश्वानिव | ------------------------ | ------------------------ |

## १०. वेदेषु प्रकल्पितस्य समाजस्य आदर्शस्वरूपं पञ्चदशवाक्यैः चित्रयत।

११. समूहे एकाकी वा मन्त्राणां सस्वरं पारायणं क्रियताम्।

## योग्यता-विस्तारः

शुक्लयजुर्वेदस्य प्रमुखो विषयः कर्मकाण्डं वर्तते। अत्र कर्मकाण्डेन सह दार्शनिकविषयाः अपि वर्णिताः वर्तन्ते। मानवजीवनेन सह सम्बद्धानां बहुविधानां तत्त्वानां दर्शनं शुक्लयजुर्वेदे प्राप्यते। समग्रराष्ट्रस्य कृतेऽपि विवरणम् इह वर्तते। कौटिल्यस्य अर्थशास्त्रस्य स्रोतः अपि यजुर्वेदो वर्तते। शुल्बसूत्राणां बीजम् अत्र अवलोक्यते। प्रत्येकं वेदे ज्ञान-कर्म-उपासन-आसनानाम् अन्यतमं महत्त्वमस्ति। यजुर्वेदः कर्मप्रधानः। "यज्ञो वै श्रेष्ठतमं कर्म" इति श्रुतिवचनम्। "दशपूर्णमासाभ्यां यजेत स्वर्गकामः" इति श्रुतिवचनेन यज्ञद्वारा धर्मार्थकामप्राप्तिर्भवति इति सूच्यते। "अग्ने नय सुपथा" इति श्रुतिवचनेन यज्ञद्वारा मोक्षः सुलभः इति ज्ञायते। यज्ञसम्पादने यजुर्वेदस्य भूमिका अपरिहार्या। यजुर्वेदे वर्णानुसारं यज्ञस्य विभाजनं कृतम्। ब्राह्मणानां कृते वाजपेयिनां, क्षत्रियाणां कृते अश्वमेध-वाजपेयादीनां, सर्वजनहिताय सर्वमेधादियज्ञानां च वर्णनं विद्यते। इत्थं यजुर्वेदः सामाजिक-समरसतां शिक्षयति। यजुर्वेदे रुद्र-विष्णु-प्रजापतीनां महत्त्वम् अधिकं वर्तते। इतिहासस्य, राजनीतेः काव्यशास्त्रस्य, भूगोलस्य चापि ज्ञानम् अस्मिन् वेदे विकीर्णम् अस्ति। चतुस्त्रिंशत्तमाध्यायस्य आरम्भे शिवसङ्कल्पसूक्तस्य षण्णां मन्त्राणां सङ्ग्रहो वर्तते।

# तृतीयः पाठः

## अभिज्ञानशाकुन्तलम्

संस्कृतसाहित्ये महाकविकालिदासविरचितस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य महत्त्वपूर्णं स्थानं वरीवर्त्ति। अस्य सप्त कृतयो विद्यन्ते। तत्र - १. अभिज्ञानशाकुन्तलम्। २. मालविकाग्निमित्रम्। ३. विक्रमोर्वशीयम्। एतानि नाटकानि। १. रघुवंशम्। २. कुमारसम्भवम्। इत्येते द्वे काव्ये। १. मेघदूतम्। २. ऋतुसंहारम्। इति गीतिकाव्यद्वयम्। एतेषु अभिज्ञानशाकुन्तलं कालिदासस्य सर्वस्वम् इति प्रसिद्धिः। नाटकेऽस्मिन् सप्त अङ्का वर्तन्ते। अभिज्ञानशाकुन्तले चतुर्थेऽङ्के कविः कण्वरूपेण उपस्थितोऽस्ति। अत एव "चतुर्थाङ्कः शाकुन्तलस्य हृदयम्" इति समालोचकैरङ्गीक्रियते। लोकश्रुतिः अस्ति काव्येषु नाटकं रम्यम्, तत्र रम्या शकुन्तला। उक्तञ्च -

**काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।**
**तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम्॥**

अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के लौकिकालौकिकप्रवृत्तिमतां मानवानां विशिष्टः समन्वयोऽस्ति। वनौकसोऽपि वयं लौकिकज्ञा एव इति महर्षिकण्वस्य वचनेन चतुर्थाङ्कस्य वैशिष्ट्यं स्फुटितं भवति। तस्माद् अङ्कोऽयं विशिष्टं स्थानं भजते।

**मूलपाठः**

(तत प्रविशतः कुसुमावचयं नाटयन्तौ सख्यौ)

**अनसूया -** प्रियंवदे ! यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा शकुन्तलानुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयं तथाप्येतावच्चिन्तनीयम्।

**प्रियंवदा -** कथमिव ?

**अनसूया -** अद्य स राजर्षिरिष्टं परिसमाप्यर्षिभिर्विसर्जित आत्मनो नगरं प्रविश्यान्तःपुरसभागत इतोगतं वृत्तान्तं स्मरति वा न वेति।

**प्रियंवदा -** विस्रब्धा भव। न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति। तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति।

**अनसूया -** यथाहं पश्यामि, तथा तस्यानुमतं भवेत्।

**प्रियंवदा -** कथमिव ?

**अनसूया -** गुणवते कन्यका प्रतिपादनीयेत्ययं तावत्प्रथमः सङ्कल्पः। तं यदि दैवमेव सम्पादयति नन्वप्रयासेन कृतार्थो गुरुजनः।

**प्रियंवदा -** (पुष्पभाजनं विलोक्य) सखि! अवचितानि बलिकर्मपर्याप्तानि कुसुमानि।

**अनसूया -** ननु सख्याः शकुन्तलायाः सौभाग्यदेवताऽर्चनीया।

**प्रियंवदा -** युज्यते (इति तदेव कर्माभिनयतः)

(नेपथ्ये) अयमहं भोः!

**अनसूया -** (कर्णं दत्वा) सखि! अतिथीनामिव निवेदितम्।

**प्रियंवदा -** ननूटजसन्निहिता शकुन्तला (आत्मगतम्)

**अनसूया -** अद्य पुनर्हृदयेनासन्निहिता। अलमेतावद्भिः कुसुमैः।

(इति प्रस्थिते)

(नेपथ्ये)

आः अतिथिपरिभाविनि !

**विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।**
**स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव॥ १॥**

**प्रियंवदा -** हा धिक्! हा धिक्! अप्रियमेव संवृत्तम्। कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला (पुरोऽवलोक्य) न खलु यस्मिन्कस्मिन्नपि। एष दुर्वासाः सुलभकोपो महर्षिः। तथा शप्त्वा वेगबलोत्फुल्लया दुर्वारया गत्या प्रतिनिवृत्तः।

**अनसूया -** कोऽन्यो हुतवहाद् दग्धुं प्रभवति। गच्छ! पादयोः प्रणम्य निवर्तयैनं यावदहमर्घोदकमुपकल्पयामि।

**प्रियंवदा -** तथा (इति निष्क्रान्ता)।

**अनसूया -** (पदान्तरे स्खलितं निरूप्य) अहो! आवेगस्खलितया गत्या प्रभ्रष्टं ममाग्रहस्तात्पुष्पभाजनम् (इति पुष्पोच्चयं रूपयति)।

(प्रविश्य)

**प्रियंवदा -** सखि! प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति? किमपि पुनः सानुक्रोशः कृतः।

**अनसूया -** (सस्मितम्) तस्मिन्बह्वेतदपि। कथय।

**प्रियंवदा -** यदा निवर्तितुं नेच्छति तदा विज्ञापितो मया। भगवन् ! प्रथम इति प्रेक्ष्याऽविज्ञाततपः प्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्षयितव्य इति।

**अनसूया -** ततस्ततः।

**प्रियंवदा -** ततो न मे वचनमन्यथा भवितुमर्हति। किंत्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यत इति मन्त्रयमाण एवान्तर्हितः।

**अनसूया -** शक्यमिदानीमाश्वसितुम्। अस्ति तेन राजर्षिणा सम्प्रस्थितेन स्वनामधेयाङ्कित-मङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम्। तस्मिन् स्वाधीनोपाया शकुन्तला भविष्यति।

**प्रियंवदा -** सखि! एहि। देवकार्यं तावत् निर्वर्तयावः। (इति परिक्रामतः)।

**प्रियंवदा -** (विलोक्य) अनुसूये! पश्य तावत्। वामहस्तोपहितवदनाऽलिखितेव प्रियसखी। भर्तृगतया चिन्तयात्मानमपि नैषा विभावयति। किं पुनरागन्तुकम्।

**अनसूया -** प्रियंवदे! द्वयोरेव नौ मुख एष वृत्तान्तस्तिष्ठतु। रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी।

**प्रियंवदा -** कोऽनामोष्णदकेन नवमालिकां सिञ्चति। (इत्युभे निष्क्रान्ते)।

(विष्कम्भकः)

(ततः प्रविशति सुप्तोत्थितः शिष्यः)

**शिष्यः -** वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन काश्यपेन। प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति। (परिक्रम्य अवलोक्य च) हन्त ! प्रभातम्। तथा हि -

**यात्येकतोऽस्तशिखरं पतिरोषधिनाम्**
**आविष्कृतोऽरुणपुरः सर एकतोऽर्कः।**
**तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां**
**लोको नियम्यत इवात्मदशान्तरेषु॥ २॥** अपि च
**अन्तर्हिते शशिनि सैव कुमुद्वती मे**
**दृष्टिं न नन्दयति संस्मरणीयशोभा।**
**इष्टप्रवासजनितान्यबलाजनस्य**
**दुःखानि नूनमतिमात्रसुदुःसहानि॥ ३॥**

(प्रविश्यापटीक्षेपेण)

अनसूया - यद्यपि नाम विषयपराङ्मुखस्यापि जनस्यैतन्न विदितं तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम्।

शिष्यः - यावदुपस्थितां होमवेलां गुरवे निवेदयामि।

(इति निष्क्रान्तः)

अनसूया - प्रतिबुद्धापि किं करिष्ये। न मे उचितेष्वपि निजकार्येषु हस्तपादं प्रसरति। काम इदानीं सकामो भवतु। येनासत्यसन्धे जने शुद्धहृदया सखी पदं कारिता। अथवा दुर्वाससः कोप एष विकारयति। अन्यथा कथं स राजर्षिस्तादृशानि मन्त्रयित्वैतावत्कालस्य लेखमात्रमपि न विसृजति। तदितोऽभिज्ञानमङ्गुलीयकं तस्य विसृजावः। दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम्। ननु सखीगामी दोष इति व्यवसितापि न पारयामि प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य दुष्यन्तपरिणीतामापन्नसत्त्वां शकुन्तलां निवेदयितुम्। इत्थं गतेऽस्माभिः किं करणीयम्।

(प्रविश्य)

**प्रियंवदा -** (सहर्षम्) सखि! त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम्।

**अनसूया -** सखि! कथमेतत्।

**प्रियंवदा -** शृणु। इदानीं सुखशयितप्रच्छिका शकुन्तलासकाशं गताऽस्मि।

**अनसूया -** ततस्ततः।

**प्रियंवदा -** तावदेनां लज्जावनतमुखीं परिष्वज्य तात काश्यपेनैवमभिनन्दितम्। दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता। वत्से सुशिष्यपरिदत्ता विद्येवाशोचनीयाऽसि संवृत्ता। अद्यैव ऋषिरक्षितां त्वां भर्तुः सकाशं विसर्जयामीति।

**अनसूया -** अथ केन सूचितस्तातकाश्यपस्य वृत्तान्तः।

**प्रियंवदा -** अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाण्या।

**अनसूया -** (सविस्मयम्) कथमिव।

**प्रियंवदा -** (संस्कृतमाश्रित्य)

**दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।**
**अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥४॥**

अनसूया - (प्रियंवदामाश्लिष्य) सखि प्रियं मे।किंत्वद्यैव शकुन्तला नीयत इत्युत्कण्ठासाधारणं परितोषमनुभवामि।

प्रियंवदा - सखि, आवां तावदुत्कण्ठां विनोदयिष्यावः। सा तपस्विनी निर्वृता भवतु।

अनसूया - तेन ह्येतस्मिंश्चूतशाखावलम्बिते नारिकेलरसमुद्गक एतन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केसरमालिका। तदिमां हस्तसन्निहितां कुरु। यावदहमपि तस्यै मृगगोरोचनां तीर्थमृत्तिकां दूर्वाकिसलयानीति मङ्गलसमालम्भनानि विरचयामि।

प्रियंवदा - तथा क्रियताम्। (अनसूया निष्क्रान्ता। प्रियंवदा नाट्येन सुमनसो गृह्णाति)

(नेपथ्ये)

गौतमि, आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय।

प्रियंवदा - (कर्णं दत्त्वा) अनसूये! त्वरस्व त्वरस्व एते खलु हस्तिनापुरगामिन ऋषय शब्दायन्ते।

(प्रविश्य समालम्भनहस्तावृषिकुमारकौ)

अनसूया - सखि, एहि, गच्छावः। (इति परिक्रामतः)

प्रियंवदा - (विलोक्य) एषा सूर्योदय एव शिखामज्जिता प्रतिष्ठितनीवारहस्ताभिः स्वस्तिवाचनिकाभिस्तापसीभिरभिनन्द्यमाना शकुन्तला तिष्ठति। उपसर्पाव एनाम्। (इत्युपसर्पतः) (ततः प्रविशति यथोदिष्टव्यापारानस्था शकुन्तला)

तापसीनामन्यतमा - (शकुन्तलां प्रति) जाते, भर्तुर्बहुमानसूचकं महादेवीशब्दं लभस्व।

द्वितीया - वत्से, वीरप्रसविनी भव।

तृतीया - वत्से, भर्तुर्बहुमता भव। (इत्याशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः)

सख्यौ - (उपसृत्य) सखि, सुखमज्जनं ते भवतु।

शकुन्तला - स्वागतं मे सख्योः। इतो निषीदतम्।

उभे - (मङ्गलपात्राण्यादाय। उपविश्य) हला, सज्जा भव। यावन्मङ्गलसमालम्भनं विरचयावः।

शकुन्तला - इदमपि बहुमन्तव्यम्। दुर्लभमिदानीं मे सखीमण्डनं भविष्यतीति। (इति वाष्पं विसृजति।)

उभे - उचितं न ते मङ्गलकाले रोदितुम्। (इत्यश्रूणि प्रमृज्य नाट्येन प्रसाधयतः।)

प्रियंवदा - आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्यते। (प्रविश्योपायनहस्तौ)

ऋषिकुमारकौ - इदमलङ्करणम्। अलंक्रियतामत्रभवती। (सर्वा विलोक्य विस्मिताः)

गौतमी - वत्स नारद, कुत एतत् ?

प्रथमः - तातकाश्यपप्रभावात्।

गौतमी - किं मानसी सिद्धिः ?

द्वितीयः - न खलु, श्रूयताम्। तत्र भवता वयमाज्ञप्ताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति। तत इदानीम् -

**क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतम्**

**निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित्।**

**अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-**

**र्दत्तान्याभरणानि तत्किसलयोद्भेद प्रतिद्वन्द्विभिः॥५॥**

प्रियंवदा - (शकुन्तलां विलोक्य) हला, अनयाऽभ्युपपत्य सूचिता ते भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीः। (शकुन्तला व्रीडां रूपयति)।

प्रथमः - गौतम, एह्येहि। अभिषेकोत्तीर्णाय काश्यपाय वनस्पतिसेवां निवेदयावः।

द्वितीयाः - (तथा इति निष्क्रान्तौ)

सख्यौ - अये, अनुपयुक्तभूषणोऽयं जनः। चित्रकर्मपरिचयेनाङ्गेषु त आभरणविनियोगं कुर्वः।

शकुन्तला - जाने वां नैपुण्यम्। (उभे नाट्यनालङ्कुरुतः)।

(ततः प्रविशति स्नानोत्तीर्णः काश्यपः)

काश्यपः - **यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**

**कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।**

**वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः**

**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥६॥**

(इति परिक्रामति)

सख्यौ - हला शकुन्तले, अवसितमण्डनाऽसि। परिधत्स्व साम्प्रतं क्षौमयुगलम्।

(शकुन्तलोत्थाय परिधत्ते)

गौतमी - जाते एष त आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः। आचारं तावत् प्रतिपद्यस्व।

शकुन्तला - (सव्रीडम्) तात, वन्दे।

काश्यपः - वत्से,

**ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।**

**सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि॥७॥**

गौतमी - भगवन्, वरः खल्वेषः। नाशीः।

काश्यप - वत्से, इतः सद्योहुताग्नीन्प्रदक्षिणीकुरुष्व। (सर्वे परिक्रामन्ति)

काश्यपः - (ऋक्छन्दसाऽस्ते) वत्से

**अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः।**
**अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु॥८॥**

प्रतिष्ठस्वेदानीम्। (सदृष्टिक्षेपम्) क्व ते शार्ङ्गरवमिश्राः ?

(प्रविश्य)

शिष्यः - भगवन्, इमे स्मः।

काश्यपः - भगिन्यास्ते मार्गमादेशय।

शार्ङ्गरवः - इत इतो भवती।

(सर्वे परिक्रामन्ति)

काश्यपः - भो भोः! संनिहितास्तपोवनतरवः।

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥९॥**

(कोकिलरवं सूचयित्वा)

**अनमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।**
**परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम्॥१०॥**

(आकाशे)

**रम्यान्तरः कमलिनीहरितैः सरोभिश्छायाद्रुमैर्नियमितार्कमयूखतापः।**
**भूयात्कुशेशयरजोमृदुरेणुरस्याः शान्तानुकूलपवनश्च शिवश्च पन्थाः॥११॥**

(सर्वे विस्मयमाकर्णयन्ति)

गौतमी - जाते, ज्ञातिजनस्निग्धाभिरनुज्ञातगमनासि तपोवनदेवताभिः। प्रणम भगवतीः।

शकुन्तला - (सप्रमाणं परिक्रम्य जनान्तिकम्) हला प्रियंवदे, आर्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तेते।

प्रियंवदा - न केवलं तपोवनविरहकातरा सख्येव। त्वयोपस्थितवियोगस्य तपोवनस्यापि तावत्समवस्था दृश्यते।

**उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।**
**अपसृतपाण्डुपुत्रा मुञ्चन्त्यश्रूणीव लताः॥१२॥**

शकुन्तला - (स्मृत्वा) तात, लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये।

काश्यपः - अवैमि ते तस्यां सोदर्यस्नेहम्। इयं तावद्दक्षिणेन।

शकुन्तला - (उपेत्य लतामालिङ्ग्य) वनज्योत्स्ने, चूतसंगतापि मां प्रत्यालिङ्गेतो गताभिः शाखाबहुभिः। अद्यप्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि।

काश्यपः - **संकल्पितं प्रथममेव मया तवार्थे**
**भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।**
**चूतेन संश्रितवती नवमालिकेयम-**
**स्यामहं त्वयि संप्रति वीतचिन्तः॥**

इतः पन्थानं प्रतिपद्यस्व।

शकुन्तला - (सख्यौ प्रति) हला, एषा द्वयोर्युवयोर्हस्ते निक्षेपः।

सख्यौ - अयं जनः कस्य हस्ते समर्पितः।

काश्यपः - अनसूये, अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला।

(सर्वे परिक्रामन्ति)

शकुन्तला - तात, एषोटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदानघप्रसवा भवति तदा मह्यं कमपि प्रियनिवेदयितृकं विसर्जयिष्यथ।

काश्यपः - नेदं विस्मरिष्यामि।

शकुन्तला - (गतिभङ्गं रूपयित्वा) को नु खल्वेष निवसने मे सज्जते ? (इति परावर्तते)

काश्यपः - वत्से,

**यस्य त्वया व्रणविरोपणमिङ्गुदीनां**
**तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।**
**श्यामाकमुष्टिपरिवर्धितको जहाति**
**सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥१४॥**

शकुन्तला - वत्स, किं सहवासपरित्यागिनीं मामनुसरसि। अचिरप्रसूतया जनन्या विना वर्धित एव। इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति। निवर्तस्व तावत्। (इति रुदित प्रस्थिता।)

काश्यपः - **उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं वाष्पं कुरु स्थिरतया विहतानुबन्धम्।**
**अस्मिन्नलक्षितनतोन्नतभूमिभागे मार्गे पदानि खलु ते विषमीभवन्ति॥ १५॥**

शार्ङ्गरवः - भगवन्, ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र सन्दिश्य प्रतिगन्तुमर्हसि।

काश्यपः - तेन हीमां क्षीरवृक्षच्छायामाश्रयामः।

(सर्वे परिक्रम्य स्थिताः)

काश्यपः - (आत्मगतम्) किं न खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः सन्देष्टव्यम् ?

(इति चिन्तयति)

शकुन्तला - (जनान्तिकम्) हल, पश्य, नलिनीपत्रान्तरितमपि सहचरमपश्यन्त्यातुरा चक्रवाक्यारौति दुष्करमहं करोमीति तर्कयामि।

**अनसूया -** सखि, मैवं मन्त्रयस्व।

**एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्।**
**गुर्वपि विरहदुःखमाशाबन्धः साहयति॥ १६॥**

**काश्यपः -** शार्ङ्गरव, इति त्वया मद्वचनात्स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः।

**शार्ङ्गरवः -** आज्ञापयतु भवान्।

**काश्यपः -** **अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-**
**स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।**
**सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया**
**भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥ १७॥**

शार्ङ्गरवः - गृहीतः सन्देशः।

काश्यपः - वत्से, त्वमिदानीमनुशासनीयासि। वनौकसौऽपि सन्तो लौकिकज्ञा वयम्।

शार्ङ्गरवः - न खलु धीमतां कश्चिदविषयो नाम।

काश्यपः - सा त्वमितः पतिकुलं प्राप्य -

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने**

**भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥१८॥**

कथं वा गौतमी मन्यते।

गौतमी - एतावान्वधूजनस्योपदेशः। जाते एतत्खलु सर्वमवधारय।

काश्यपः - वत्से! परिष्वजस्व मां सखीजनं च।

शकुन्तला - तात, इत एव किं प्रियंवदाऽनसूये सख्यौ निवर्तिष्येते।

काश्यपः - वत्से, इमे अपि प्रदेये। न युक्तमनयोस्तत्र गन्तुम्। त्वया सह गौतमी यास्यति।

शकुन्तला - (पितरमाश्लिष्य) कथमिदानीं तातस्यङ्कात्परिभ्रष्टा मलयतरून्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्ये ?

काश्यपः - वत्से, किमेवं कातरासि?

**अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे**
**विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।**
**तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं**
**मम विरहजां न त्वं वत्से, शुचं गणयिष्यसि॥१९॥**

(शकुन्तला पितुः पादयोः पतति)

काश्यपः - यदिच्छामि ते तदस्तु।

शकुन्तला - (सख्यावुपेत्य) हला, द्वे अपि मां सममेव परिष्वजेथाम्।

सख्यौ - (तथा कृत्वा) सखि, यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत्ततस्तस्मा इदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय।

शकुन्तला - अनेन सन्देहेन वामाकम्पितास्मि।

सख्यौ - मा भैषीः। अतिस्नेहः पापशङ्की।

शार्ङ्गरवः - युगान्तरमारूढः सविता। त्वरतामत्रभवती।

शकुन्तला - (आश्रमाभिमुखी स्थित्वा) तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये।

काश्यपः - श्रूयताम्।

**भूत्वा चिराय चतुरान्तमहीसपत्नी**
**दौष्यन्तिमप्रतिरथं तनयं निवेश्य।**

**भर्त्रा तदर्पितकुटुम्बभरेण सार्धं**
**शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्॥**

गौतमी - जाते, परिहीयते गमनवेला। निवर्तय पितरम्। अथवा चिरेणापि पुनः पुनरेषैवं मन्त्रयिष्यते। निवर्ततां भवान्।

काश्यपः - वत्से, उपरुध्यते तपोऽनुष्ठानम्।

शकुन्तला - (भूयः पितरमाश्लिष्य) तपश्चरणपीडितं तातशरीरम्। तन्मातिमात्रं मम कृत उत्कण्ठस्व।

काश्यपः - (सनिःश्वासम्)

**शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम्।**
**उटजद्वारविरूढनीवारबलिं विलोकयत॥ २१॥**

गच्छ, शिवास्ते पन्थानः सन्तु।

(निष्क्रान्ता शकुन्तला सहयायिनश्च)

सख्यौ - (शकुन्तलां विलोक्य) हा धिक् ! हा धिक् ! अन्तर्हिता शकुन्तला वनराज्या।

काश्यपः - (सनिःश्वासम्) अनसूये ! गतवती वां सहचारिणी। निगृह्य शोकमनुगच्छतं मां प्रस्थितम्।

उभे - तात ! शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः ?

काश्यपः - स्नेहप्रवृत्तिरेवंदर्शिनी। (सविमर्शं परिक्रम्य) हन्त भोः।

शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम्। कुतः -

**अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।**
**जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥ २२॥**

(इति सर्वे निष्क्रान्ताः)

## शब्दार्थाः

| | |
|---|---|
| इष्टिम् | यज्ञकार्यम् |
| विस्रब्धा | निश्चिन्ता |
| प्रतिपत्स्यते | करिष्यति |
| बलिकर्म | पूजाकार्यम् |
| उटजसन्निहिता | पर्णकुटीरे स्थिता |

| | |
|---|---|
| अतिथिपरिभाविनि | अतिथीनां तिरस्कारिणी |
| अनन्यमानसा | एकाग्रचित्ता |
| वेत्सि | जानासि |
| उपकल्पयामि | प्रस्तौमि |
| प्रभ्रष्टम् | पतितम् |
| प्रकृतिवक्रः | स्वभावेन वक्रः |
| सानुक्रोशः | दयायुक्तः |
| मर्षयितव्यः | क्षन्तव्यः |
| निर्वर्तयावः | सम्पादयावः |
| प्रकृतिपेलवा | प्रकृत्या कोमला |
| वेलोपलक्षणार्थम् | समयज्ञानार्थम् |
| उपावृत्तेन | प्रत्यागतेन |
| युगपद् | एककाले |
| आत्मदशान्तरेषु | स्वविशेषदशायाम् |
| त्वरस्व | शीघ्रतां कुरु |
| परिष्वज्य | आलिङ्ग्य |
| अग्निशरणम् | यज्ञशालायाम् |
| भूतये | कल्याणाय |
| अवेहि | जानीहि |
| क्षौमम् | अतसीवस्त्रम् |
| इन्दुपाण्डु | चन्द्र इव शुभ्रम् |
| किसलयम् | नूतनं पल्लवम् |
| अरण्यौकसः | वनवासिनः |
| तनयाविश्लेषः | पुत्र्याः वियोगः |
| हला | सखी |
| मयूखः | किरणः |
| भाग्यायत्तम् | भाग्याधीनम् |

| | |
|---|---|
| शुश्रूषस्व | सेवां कुरु |
| सपत्नीजने | समानपतिकायाम् |
| अनुत्सेकिनी | निरहङ्कारा/अहङ्काररहिता |
| वामाः | विपरीतस्वभावाः |
| आधयः | मनोव्यथाः |

## अभ्यासः

### १. सर्वे प्रश्नाः समाधेयाः।

(क) नाटकेषु रम्यं किम् ?

(ख) अभिज्ञानशाकुन्तले कति अङ्काः सन्ति ?

(ग) शकुन्तलायाः सख्योः नाम किम् ?

(घ) को नामोष्णोदकेन नवमालिकां सिञ्चति ?

(ङ) सुलभकोपो कः?

(च) "कोऽन्यो हुतवहाद् दग्धुं प्रभवति" इति कस्याः उक्तिः?

(छ) शकुन्तला कस्य पालितपुत्री आसीत्?

### २. पूर्णवाक्येन उत्तरत -

(क) शकुन्तलादुष्यन्तयोः कीदृशः परिणयः आसीत् ?

(ख) अभिज्ञानशाकुन्तलस्य रम्यः अङ्कः कः ?

(ग) कस्याः अनुनयेन विनयेन वा सन्तुष्टः दुर्वासाः शकुन्तलायाः शापनिवृत्तोपायं वक्ति?

(घ) पुष्पचयं के कुरुतः ?

(ङ) "अर्थो हि कन्या परकीय एव" इति कस्य उक्तिः ?

### ३. रिक्तस्थानानि पूरयत -

(क) गुणवते कन्यका ...................................... सङ्कल्पः।

(ख) ............................................... मामुपस्थितम्।

(ग) स्मरिष्यति त्वां ............................................ ।

(घ) .................................... यावदहमर्घोदकमुपकल्पयामि।

(ङ) अग्निशरणं प्रविष्टस्य .................................................. ।

(च) दुष्यन्तेनाहितं ............................................. शमीमिव॥

(छ) शार्ङ्गरव ....................................................... वक्तव्यः।

(ज) अर्थो हि कन्या ..................................... इवान्तरात्मा॥

४. अधोलिखितानां पदानां यथायोग्यं मेलनं क्रियताम् -

| | |
|---|---|
| (क) न तादृशा आकृतिविशेषा | कुसुमानि |
| (ख) अवचितानि बलिकर्मपर्याप्तानि | आदिष्टोऽस्मि |
| (ग) तपोधनं वेत्सि | इवात्मदशान्तरेषु |
| (घ) वेलोपलक्षणार्थम् | गुणविरोधिनो भवन्ति |
| (ङ) लोको नियम्यत | सर्वैरनुज्ञायताम् |
| (च) याति शकुन्तला पतिगृहं | न मामुपस्थितम् |

५. अधोलिखितानां शब्दानां प्रकृतिप्रत्ययौ विभजत -

| | प्रकृतिः | प्रत्ययः |
|---|---|---|
| (क) सन्निहिता | ---------- | ---------- |
| (ख) निरूप्य | ---------- | ---------- |
| (ग) विलोक्य | ---------- | ---------- |
| (घ) अर्चनीया | ---------- | ---------- |
| (ङ) विचिन्तयन्ती | ---------- | ---------- |
| (च) बोधितः | ---------- | ---------- |
| (छ) मर्षयितव्यः | ---------- | ---------- |
| (ज) दर्शनम् | ---------- | ---------- |
| (झ) पातुम् | ---------- | ---------- |

६. अधोलिखितानां पदानां समासनिर्देशपुरस्सरं विग्रहवाक्यं लिखत।

| | समासविग्रहः | समासनाम |
|---|---|---|
| (क) तपोधनम् | ------------------------- | ------------------------- |
| (ख) अनन्यमानसा | ------------------------- | ------------------------- |
| (ग) परिजने | ------------------------- | ------------------------- |
| (घ) प्रत्यर्पितन्यासः | ------------------------- | ------------------------- |

(ङ) अरण्यौकसः ------------------------- -------------------------

(च) तपोधनम् ------------------------- -------------------------

७. अधोलिखितानां शब्दानां सन्धिनिर्देशपूर्वकं सन्धिविच्छेदं कुरुत -

| | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|
| (क) प्रत्यर्पितः | ---------- + ---------- | ------------------------- |
| (ख) इवान्तरात्मा | ---------- + ---------- | ------------------------- |
| (ग) शिवास्ते | ---------- + ---------- | ------------------------- |
| (घ) वधूजनस्योपदेशः | ---------- + ---------- | ------------------------- |
| (ङ) पुरस्कृत्य | ---------- + ---------- | ------------------------- |
| (च) बोधितोऽपि | ---------- + ---------- | ------------------------- |
| (छ) यात्येकतः | ---------- + ---------- | ------------------------- |
| (ज) दुष्यन्तेनाहितम् | ---------- + ---------- | ------------------------- |
| (झ) सेयम् | ---------- + ---------- | ------------------------- |
| (ञ) कश्चिद् | ---------- + ---------- | ------------------------- |
| (ट) कश्चिद्विषयः | ---------- + ---------- | ------------------------- |
| (ठ) कुलस्याधयः | ---------- + ---------- | ------------------------- |
| (ड) संप्रेष्य | ---------- + ---------- | ------------------------- |

८. रेखाङ्कितपदान्याश्रित्य कारकविभक्ती निर्णयत।

(क) अप्रयासेन कृतार्थौ गुरुजनः।

(ख) स्मरिष्यति त्वां न स बोधितोऽपि सन्।

(ग) दुहितृजनस्य भगवतैकोऽपराधो मर्षयितव्यः।

(घ) आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय।

(ङ) द्वयोरेव नौ मुखे एष वृत्तान्तस्तिष्ठतु।

९. अधस्तनश्लोकानां छन्दोऽलङ्कारनिर्देशपुरस्सरं संस्कृतभाषया भावार्थं लिखत।

(क) यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः,
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥

(ख) यात्येकतोऽस्तशिखरं पतिरोषधीनाम् आविष्कृतोऽरुणपुरः सर एकतोऽर्कः।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु॥

(ग) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥

१०. **अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य कथासारांशं सरलसंस्कृतभाषया स्वकीयैः वाक्यैः विशदयत।**

## योग्यता-विस्तारः




नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश॥

*(साहित्यदर्पणम् ६/३)*

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।
दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम्॥

*(साहित्यदर्पणम् ६/९)*

**मङ्गलाचरणम् - वस्तुनिर्देशात्मकम्।**

या सृष्टिः स्त्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी यत्र विश्वं भवत्येकनीडम्

# चतुर्थः पाठः

## हिरण्यगर्भसूक्तम्

**ऋग्वेदे - १०-१२१, कृष्णयजुर्वेदे - ४.१.८, शुक्लयजुर्वेदे - १३.४२३.१,२५.१०, अथर्ववेदे - ४.२.१-८**

वेदो हि सर्वेषां ज्ञानानां मूलाधारो वर्तते। सृष्टिपरकविचारा दार्शनिसिद्धान्ताश्च वेदेषु प्राप्यन्ते। एतादृशा विचाराः चतुर्षु वेदेषु अभिहिताः। तत्र वेदे पुरुषहिरण्यगर्भादिसूक्तेषु एते विचाराः प्राप्यन्ते। तन्मध्ये तु सृष्टिविषयकचिन्तने हिरण्यगर्भसूक्तस्य प्रामुख्यं वर्तते। हिरण्यगर्भसूक्तम् ऋग्वेदस्य दशममण्डलस्य एकविंशत्यधिकैकशततमं सूक्तं वर्तते। अस्य सूक्तस्य द्रष्टा ऋषिः प्रजापतिपुत्रः हिरण्यगर्भः, देवता प्रजापतिः, छन्दश्च त्रिष्टुब् विद्यते।

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ १॥**

**अन्वयः -** हिरण्यगर्भः अग्रे समवर्तत, जातः भूतस्य एकः पतिः आसीत्। स इमां पृथिवीम् उत द्यां दाधार, कस्मै देवाय हविषा विधेम।

हिरणमयस्याण्डस्य गर्भभूतः प्रजापतिः हिरण्यगर्भः। यद्यपि परमात्मैव हिरण्यगर्भः तथापि तदुपाधिभूतानां वियदादीनां ब्रह्मण उत्पत्तेः तदुपहितः अपि उत्पन्नः इत्युच्यते। स च जातः जातमात्र एव एकः अद्वितीयः सन् भूतस्य विकारजातस्य ब्रह्माण्डादेः सर्वस्य जगतः पतिः ईश्वरः आसीत्। स हिरण्यगर्भः पृथिवीं विस्तीर्णां दिवं च दाधार धारयति। कस्मै इति किंशब्दः अनिर्ज्ञातस्वरूपत्वात् प्रजापतौ वर्तते। सृष्ट्यर्थं कामयते इति कः। कमेर्डः। कं प्रजापतिं देवं दानादिगुणयुक्तं हविषा पुरोडाशेन वयं विधेम परिचरेम।

**य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।**
**यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम॥ २॥**

**अन्वयः -** य आत्मदा बलदा यस्य प्रशिषं विश्वे उपासते, यस्य देवाः यस्य अमृतं, मृत्युः यस्य छाया कस्मै देवाय हविषा विधेम।

यः प्रजापतिः आत्मनां दाता। आत्मानो हि सर्वे तस्मात् परमात्मनः उत्पद्यन्ते। आत्मानं शोधयिता वा। दैप् शोधने। बलस्य दाता शोधयिता। यस्य प्रशिषं प्रकृष्टं शासनम् आज्ञां विश्वे सर्वे प्राणिनः उपासते प्रार्थयन्ते सेवन्ते वा। अमृतत्वम् अमृतं

वा यमश्च यस्य प्रजापतेः छाया इव भवति। कं प्रजापतिं देवं दानादिगुणयुक्तं हविषा पुरोडाशेन विधेम परिचरेम।

**यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।**
**य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥३॥**

**अन्वयः -** यः प्राणतः निमिषतः महित्वा एकः इत् राजा बभूव। यः अस्य द्विपदः चतुष्पद ईशे। कस्मै देवाय हविषा विधेम।

हिरण्यगर्भः प्राणतः प्रश्वसतः निमिषतः अक्षिपक्ष्मचलनं कुर्वतः जगतः जङ्गमस्य प्राणिजातस्य महित्वा महत्त्वेन माहात्म्येन एक इत् द्वितीयो वा सन् राजा बभूव, ईश्वरो भवति। अस्य परिदृश्यमानस्य द्विपदः पादद्वययुक्तस्य मनुष्यादेः चतुष्पदः गवाश्वादेश्च प्रजापतिः ईशे ईष्टे। कं प्रजापतिं देवं दानादिगुणयुक्तं हविषा पुरोडाशेन वयं विधेम परिचरेम।

**यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः।**
**यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥४॥**

**अन्वयः -** इमे हिमवन्तः यस्य महित्वा रसया सह समुद्रं यस्य आहुः यस्य इमाः प्रदिशः यस्य बाहू, कस्मै देवाय हविषा विधेम।

हिमा अस्मिन् सन्तीति हिमवान्। बहुवचनान्तेन सर्वे पर्वता लक्ष्यन्ते। हिमवदुपलक्षिताः इमे दृश्यमानाः सर्वे पर्वताः प्रजापतेः महित्त्वा महत्त्वं माहात्म्यम् ऐश्वर्यम् आहुः। रसः जलम्। रसा नदी। रसाभिः नदीभिः सह । सर्वान् समुद्रान् प्रजापतेः महाभाग्यम् इति कथयन्ति सृष्ट्यभिज्ञाः। इमाः प्रदिशः प्राच्यारम्भा आग्नेय्याद्याः कोणदिशः ईशितव्याः। बाहवः, भुजाः। भुजवत्प्राधान्ययुक्ताः प्रदिशश्च प्रजापतेः महाभाग्यरूपाः विराजन्ते। कं प्रजापतिं देवं दानादिगुणयुक्तं हविषा पुरोडाशेन वयं विधेम परिचरेम।

**येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः।**
**यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम॥५॥**

**अन्वयः -** येन द्यौः उग्रा च पृथिवी दृळ्हा, येन स्वः स्तभितं येन नाकः य अन्तरिक्षे रजसः विमानः कस्मै देवाय हविषा विधेम।

येन प्रजापतिना द्यौः अन्तरिक्षम् उग्रा उद्गूर्णं विशे, गहनरूपं वा, भूमिः च दृळ्हा स्थिरीकृता। स्वः स्वर्गश्च येन स्तम्भितम्। यथाधो न पतति तथा उपरि अवस्थापितम्। तथा नाकः आदित्यश्च यो न अन्तरिक्षे स्तम्भितः। यः अन्तरिक्षे रजसः उदकस्य विमानः निर्माता। कं प्रजापतिं देवं दानादिगुणयुक्तं हविषा पुरोडाशेन वयं विधेम परिचरेम।

**यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने।**
**यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम॥६॥**

**अन्वयः -** रेजमाने क्रन्दसी अवसा तस्तभाने यं मनसा अभि ऐक्षेताम्, यत्र अधिसूरः उदितः विभाति, कस्मै देवाय हविषा विधेम।

क्रन्दसी द्यावापृथिव्यौ अवसा रक्षणेन हेतुना लोकस्य रक्षणार्थं तस्तभाने प्रजापतिना सृष्टे लब्धस्थैर्ये सत्यौ यं प्रजापतिं मनसा बुद्ध्या अभ्यैक्षेताम्। आवयोर्महत्त्वं प्रजापतिना दत्तम् इति रेजमाने दीप्यमाने द्यावापृथिव्यौ ईक्षेताम्। कं प्रजापतिं देवं दानादिगुणयुक्तं हविषा पुरोडाशेन वयं विधेम परिचरेम।

**आपो ह यद् बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।**
**ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥७॥**

**अन्वयः -** बृहती अग्निं जनयन्तीः गर्भं दधानाः यत् आपः ह विश्वम् आयन् ततः देवानां कः असुः समवर्तत, कस्मै देवाय हविषा विधेम।

बृहतीः बृहत्यः महत्यः अग्न्युपलक्षितं सर्वं वियदादिभूतजातं जनयन्तीः जनयन्त्यः तदर्थं गर्भं हिरण्मयाण्डस्य गर्भभूतं प्रजापतिं दधानाः धारयन्त्यः आपो ह वा विश्वम् आयन्। सर्वं जगत् व्याप्नुवन्। यत् यस्मात् ततः तस्माद्धेतोः देवानां देवादीनां सर्वेषां प्राणिनाम् असुः प्राणभूतः एकः प्रजापतिः समवर्तत। समजायत। या आपः विश्वमावृत्य स्थिताः ततः ताभ्यः अद्भ्यः सकाशादेकः अद्वितीयः असुः प्राणात्मकः प्रजापतिः समवर्तत निश्चक्राम। कं प्रजापतिं देवं दानादिगुणयुक्तं हविषा पुरोडाशेन वयं विधेम परिचरेम।

**यश्चिदापो महिना पर्यपश्यद् दक्षं दधाना जनयन्तीर्यज्ञम्।**
**यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम॥८॥**

**अन्वयः -** यः चित् यज्ञं जनयन्ती दक्षं दधानाः आपः महिना पर्यपश्यन्। यः देवेषु एकः अधिदेवः आसीत्। कस्मै देवाय हविषा विधेम।

यज्ञं यज्ञोपलक्षितं विकारजातं जनयन्तीः उत्पादयन्तीः, तदर्थं प्रपञ्चात्मना वर्धिष्णुं प्रजापतिम् आत्मनि धारयित्रीः आपः महिना महिम्ना स्वमाहात्म्येन यश्च प्रजापतिः पर्यपश्यत्, स प्रजापतिः एकः अद्वितीयः देवानामधीश्वरः भवति। कं प्रजापतिं देवं दानादिगुणयुक्तं हविषा पुरोडाशेन वयं विधेम परिचरेम।

**मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिव सत्यधर्मा जजान।**
**यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥९॥**

**अन्वयः -** नः मा हिंसीत्, यः पृथिव्याः जनिता, यः वा सत्यधर्मा दिवं जजान, सः चन्द्राः बृहतीः आपः जजान, कस्मै देवाय हविषा विधेम।

सः प्रजापतिः नः अस्मान् मा हिंसीत्। मा बाधताम्। यः पृथिव्याः भूमेः जनिता जनयिता स्रष्टा। यो वा यश्च सत्यधर्मा सत्यमवितथं धर्म जगतो धारणं यस्य स तादृशः प्रजापतिः दिवम् अन्तरिक्षोपलक्षितान् सर्वान् लोकान् जजान जनयामास। यश्च बृहतीः महतीः चन्द्राः आह्लादिनीः अपः उदकानि जजान जनयामास। कं प्रजापतिं देवं दानादिगुणयुक्तं हविषा पुरोडाशेन वयं विधेम परिचरेम।

**प्रजापते! न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।**
**यत् कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्॥१०॥**

अन्वयः - प्रजापते! त्वत अन्यः एतानि विश्वा जातानि ता न परिबभूव, यत्कामाः ते जुहुमः तत् नः अस्तु। वयं रयीणां पतयः स्याम।

हे प्रजापते त्वत त्वत्तः अन्यः कश्चित एतानि इदानीं वर्तमानानि विश्वा विश्वानि सर्वाणि जातानि ता तानि सर्वाणि भतजातानि न परि बभव न परिगह्णाति न व्याप्नोति। त्वमेव एतानि परिगह्य स्रष्टं शक्नोषि इति भावः। वयं च यत्कामाः यत्फलं कामयमानाः ते तभ्यं जहमः हवींषि प्रयच्छामः। तत् फलं नः अस्माकम् अस्तु। तथा वयं रयीणां धनानां पतयः ईश्वराः स्याम भवेम।

## शब्दार्थाः

| | |
|---|---|
| दाधार | अधारयत् |
| आत्मदा | आत्मानं ददाति यः |

| | |
|---|---|
| बलदा | बलं ददाति यः |
| उपासते | पूजयति |
| महित्वा | महत्त्वम् |
| नाकः | आदित्यः |
| स्तभितः | स्तब्धं कृतम् |
| रजसः | जलस्य |
| विमानः | निर्माता |
| क्रन्दसी | द्यावापृथिव्यौ |
| तस्तभाने | प्रजापतिना सृष्टे लब्धस्थैर्ये |
| रेजमाने | दीप्यमाने |
| मा नो हिंसीत् | अस्मान् न हिंस्यात् |
| समवर्तत | समजायत |
| जजान | जनयामास |
| रयीणाम् | धनानाम् |
| जुहुमः | हवींषि प्रयच्छामः |
| बृहतीर्महतीश्चन्द्राः | आह्लादिनीः अपः |

## अभ्यासः

१. **सर्वान् प्रश्नान् समाधत्त -**

(क) अग्रे कः समवर्तत ?

(ख) 'य आत्मदा बलदा यस्य' इत्यत्र य इति पदस्य अर्थ कः ?

(ग) हिरण्यगर्भसूक्तस्य कः ऋषिः किं छन्दः का च देवता ?

(घ) इमाः प्रदिशः प्रजापतेः किम् ?

(ङ) अन्तरिक्षे उदकस्य निर्माता कः ?

२. **पूर्णवाक्येन उत्तरत -**

(क) देवानाम् असुः कः समवर्तत ?

(ख) सः प्रजापतिः एकः अद्वितीयः अन्यत् किं भवति ?

(ग) "मा नो हिंसीत्" इत्यत्र हिंसीत् इति पदस्य अर्थः कः ?

(घ) वयं च यत्कामाः यत्फलं कामयमानाः कं जुहुमः ?

(ङ) ‘कस्मै देवाय हविषा विधेम’ इत्यत्र विभक्तिं क्रियाञ्च निर्दिशत।

## ३. समुचितं मेलयत -

| | |
|---|---|
| (क) पतिरेकः | बलदा यस्य विश्व |
| (ख) य आत्मदा | प्रदिशो यस्य बाहू |
| (ग) इद्राजा | आसीत् |
| (घ) यस्येमाः | हविषा विधेम |
| (ङ) कस्मै देवाय | जगतो बभूव |

## ४. रिक्तस्थानं पूरयत -

(क) कस्मै देवाय ......................... विधेम।

(ख) अस्तु वयं ......................... रयीणाम्।

(ग) भूतस्य जातः ......................... आसीत्।

(घ) यस्य छाया ......................... मृत्युः।

(ङ) यस्य समुद्रं ......................... सहाहुः।

## ५. अधोलिखितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा सन्धेः नाम लिख्यताम् -

| | सन्धिविच्छेदः | सन्धेर्नाम |
|---|---|---|
| (क) महित्वैकः | ---------- + ---------- | ------------------------ |
| (ख) यस्य + इमे | ------------------------ | ------------------------ |
| (ग) रजसो विमानः | ---------- + ---------- | ------------------------ |
| (घ) यः + चित् | ------------------------ | ------------------------ |
| (ङ) अभ्यैक्षेताम् | ---------- + ---------- | ------------------------ |
| (च) यत्र + अधिसूरः | ------------------------ | ------------------------ |

## ६. अधोलिखितमन्त्रौ पूरयित्वा अर्थौ लेखनीयः -

(क) हिरण्यगर्भः समवर्तताग्रे .........................।

................................................ विधेम॥

(ख) य आत्मदा ............................. यस्य देवाः।

यस्य छायाः .................................. विधेम॥

७. अधोलिखितक्रियापदानां धातु-लकार-पुरुष-वचननिर्देशं कुरुत -

| | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) विधेम | ---------- | ---------- | ---------- | ---------- |
| (ख) उपासते | ---------- | ---------- | ---------- | ---------- |
| (ग) बभूव | ---------- | ---------- | ---------- | ---------- |
| (घ) आहुः | ---------- | ---------- | ---------- | ---------- |
| (ङ) ऐक्षेताम् | ---------- | ---------- | ---------- | ---------- |
| (च) जुहुमः | ---------- | ---------- | ---------- | ---------- |
| (छ) स्याम | ---------- | ---------- | ---------- | ---------- |
| (ज) आसीत् | ---------- | ---------- | ---------- | ---------- |

८. हिरण्यगर्भः समवर्तताग्रे .............................. कस्मै देवाय हविषा विधेम इति मन्त्रं पूरयित्वा अस्य भावं विशदयत।

९. पाठे आगतान् मन्त्रान् कण्ठस्थान् कुरुत।

## योग्यता-विस्तारः

निखिलेऽस्मिन् विश्वस्मिन् ज्ञानस्याद्यं स्रोतो वेदराशिरिति विपश्चितः आमनन्ति। तादृशवेदस्य मूलतत्त्वम् उपनिषत्सु निहितमस्ति। उपनिषदां ब्रह्मविद्या, ज्ञानकाण्डम्, वेदान्तः, इत्येतानि नामान्तराणि दरीदृश्यन्ते। उपगुरु उपविश्याध्यात्मविद्याऽऽदानं भवतीत्यपि कारणाद् उपनिषदिति पदं सार्थकं भवति।

ऋषिभिस्तपसा दिव्यचक्षुर्भ्यां यज्ज्ञानमवाप्तं यो शब्दराशिरधिगतः स वेदः। इन्द्रियाणां वैकल्यवशाद् इन्द्रियजन्यज्ञाने भ्रमप्रमादिकं सञ्जायते। किन्तु इन्द्रियातीतं ज्ञानं न केनापि अनिगृहीतेनेन्द्रियेण भवति। अतस्तज्ज्ञानं भ्रमप्रमादादिदोषवर्जितमेव भवति। अत एव वैदिकज्ञानमद्यापि भ्रमहीनं विद्यते। इदमेवाश्चर्यं यत् कथन्ते ऋषयः पुरा ज्ञानमिदमलभन्त। चतुर्षु भेदेषु भिन्नो वेदः ऋग् यजुः साम अथर्वश्चेति। तेषु ऋग्वेदे देवतास्तुतिः विद्यते। तस्यैवांशभूतमिदं हिरणगर्भसूक्तमत्रोपादीयते।

# पञ्चमः पाठः

## भोजप्रबन्धः

### नैकेनापि समं गता वसुमती नूनं त्वया यास्यति

स्वस्ति श्रीमहाराजाधिराजस्य भोजराजस्य प्रबन्धः कथ्यते। आदौ धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वृद्धत्वे भोज इति पुत्रस्समजनि। स यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूय अनुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं वीक्ष्य विचारयामास। यदाहं राज्यलक्ष्मीभारधारणसमर्थं सोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथवा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति। तदा दत्तमपि राज्यं वृथा। पुत्रहानिर्वंशोच्छेदश्च।

**लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च।**
**द्वेषक्रोधादिजनको लोभः पापस्य कारणम्॥ १॥**
**लोभात्क्रोधः प्रभवति, क्रोधाद्द्रोहः प्रवर्तते।**
**द्रोहेण नरकं याति, शास्त्रज्ञोऽपि विचक्षणः॥ २॥**
**मातरं पितरं पुत्रं भ्रातरं वा सुहृत्तमम्।**
**लोभाविष्टो नरो हन्ति स्वामिनं वा सहोदरम्॥ ३॥**

इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मजं मुमोच। ततः क्रमात् राजनि दिवं गते संप्राप्तराज्यसंपत्तिर्मुखो मुख्यामात्यं बुद्धिसागरनामानं व्यापारमुद्रया दूरीकृत्य तत्पदे अन्यं स्थापयामास। ततो गुरुभ्यः क्षितिपालपुत्रं वाचयति। ततः क्रमेण सभायां ज्योतिश्शास्त्रपारङ्गतः सकलविद्याचातुर्यवान् ब्राह्मणः समागम्य राज्ञे स्वस्ति इत्युक्त्वोपविष्टः। स चाह - देव ! लोकोऽयं मां सर्वज्ञं वक्ति, तत्किमपि पृच्छ।

**कण्ठस्था या भवेद्विद्या सा प्रकाश्या सदा बुधैः।**
**या गुरौ पुस्तके विद्या तया मूढः प्रतार्यते॥४॥**

इति राजानं प्राह। ततो राजापि विप्रस्याहंभावमुद्रया चमत्कृतां तद्वार्तां श्रुत्वा अस्माकं जन्मत आरभ्यैतत्क्षणपर्यन्तं यद्यन्मयाचरितं यद्यत्कृतं तत्सर्वं वदसि यदि भवान् सर्वज्ञ एवेत्युवाच। ततो ब्राह्मणोऽपि राज्ञा यद्यत्कृतं तत्तत्सर्वमुवाच गूढव्यापरमपि। ततो राजापि

सर्वाण्यप्यभिज्ञानानि ज्ञात्वा तुतोष। पुनश्च पञ्चषद्वदानि गत्वा पादयोः पतित्वा इन्द्रनीलपुष्परागमरकतवैडूर्यखचितसिंहासने उपविश्य राजा प्राह -

**मातेव रक्षति, पितेव हिते नियुङ्क्ते कान्तेव चाभिरमयत्यपनीय खेदम्।**

**कीर्तिं च दिक्षु विमलां वितनोति लक्ष्मीं किं किन्न साधयति कल्पलतेव विद्या॥५॥**

ततो विप्रवराय दशाश्वानाजानेयान् ददौ। ततः सभायामासीनो बुद्धिसागरः प्राह राजानम् - देव ! भोजस्य जन्मपत्रिकां ब्राह्मणं पृच्छेति। ततो मुञ्जः प्राह - भोजस्य जन्मपत्रिकां विधेहीति। ततोऽसौ ब्राह्मण उवाच - अध्ययनशालायाः भोज आनेतव्य इति। मुञ्जोऽपि ततः कौतुकादध्ययनशालामलङ्कुर्वाणं भोजं भटैरानाययामास। ततः साक्षात्पितरमिव राजानमानम्य सविनयं तस्थौ। ततस्तद्रूपलावण्यमोहिते राजकुमारमण्डले प्रभृतसौभाग्यं महीमण्डलमागतं महेन्द्रमिव, साकारं मन्मथमिव, मूर्तिमत्सौभाग्यमिव, भोजं निरूप्य राजानं प्राह दैवज्ञः – राजन् ! भोजस्य भाग्योदयं वक्तुं विरिञ्चिरपि नालम्। कोऽहमुदरम्भरिर्ब्राह्मणः। किञ्चित्तथापि वदामि स्वमत्यनुसारेण। भोजमितोऽध्ययनशालायां प्रेषय। ततो राजाज्ञया भोजे ह्यध्ययनशालां गते विप्रः प्राह -

**पञ्चाशत्पञ्चवर्षाणि सप्तमासदिनत्रयम्।**

**भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः॥६॥**

इति तत्तदाकर्ण्य राजा चातुर्यादपहसन्निव सुमुखोऽपि विच्छायवदनोऽभूत्। ततो राजा ब्राह्मणं प्रेषयित्वा निशीथे स्वशयनमासाद्य एकाकी सन् व्यचिन्तयत्। यदि राजलक्ष्मीर्भोजकुमारं गमिष्यति तदाहं जीवन्नपि मृतः।

ततश्चैवं विचिन्तयन्नभुक्ते एव दिनस्य तृतीये यामे एक एव मन्त्रयित्वा वङ्गदेशाधीश्वरस्य महाबलस्य वत्सराजस्याकारणाय स्वमङ्गरक्षकं प्राहिणोत्। स चाङ्गरक्षको वत्सराजमुपेत्य प्राह। राजा त्वामाकारयतीति। ततः स्वरथमारुह्य परिवारेण परिवृतस्समागतो रथादवतीर्य राजानमवलोक्य प्रणिपत्योपविष्टः। राजा च सौधं निर्जनं विधाय वत्सराजं प्राह -

**राजा तुष्टोपि भृत्यानां मानमात्रं प्रयच्छति।**

**ते तु सम्मानितास्तस्य प्राणैरप्युपकुर्वते॥ १७॥**

ततस्त्वया भोजो भुवनेश्वरीविपिने हन्तव्यः प्रथमयामे निशायाः। शिरश्चान्ते पुरमानेतव्यमिति। स चोत्थाय नृपं नत्वाह। देवादेशाः प्रमाणम्। तथापि भवल्लालनात् किमपि वक्तुकामोऽस्मि। ततस्सापराधमपि मे वचः क्षन्तव्यम्।

**भोजे द्रव्यं न सेना वा परिवारो बलान्वितः।**
**परं पोत इवास्तेऽद्य स हन्तव्यः कथं प्रभो॥ १८॥**

ततो राजा सर्वं प्रातः सभायां प्रवृत्तं वृत्तमकथयत्। स च श्रुत्वा हसन्नाह -

**त्रैलोक्यनाथो रामोऽस्ति वसिष्ठो ब्रह्मपुत्रकः।**
**तेन राज्याभिषेके तु मुहूर्तः कथिताभवत्॥ २०॥**
**तन्मुहूर्तेन रामोऽपि वनं नीतोऽवनीं विना।**
**सीतापहारोऽप्यभवद्विरिञ्चिवचनं वृथा॥ २१॥**
**जातः कोयं नृपश्रेष्ठ किञ्चिज्ज्ञ उदरम्भरिः।**
**यदुक्त्या मन्मथाकारं कुमारं हन्तुमिच्छसि॥ २२॥**

किञ्च - **किन्नु मे स्यादिदं कृत्वा किन्नु मे स्यादकुर्वतः?**
**इति सञ्चिन्त्य मनसा प्राज्ञः कुर्वीत वा न वा॥ २३॥**

किञ्च - अस्मिन्हते वृद्धस्य राज्ञस्सिन्धुलस्य परमप्रीतिपात्राणि महावीरास्तवैवानुमते स्थिताः। ते त्वन्नगरमुल्लोलकल्लोलाः पयोधरा इव प्लावयिष्यन्ति। चिराद्बद्धमूलेऽपि त्वयि प्रायः पौराः भोजं भुवो भर्तारं भावयन्ति। देव ! पुत्रवधः क्वापि न हिताय। इत्युक्तं वत्सराजवचनमाकर्ण्य राजा कुपितः प्राह - त्वमेव राज्याधिपतिः, न तु सेवक इति।

ततो वत्सराजः कालोचितमालोचनीयम् इति मत्वा तूष्णीं बभूव। अथ लम्बमाने दिवाकरे उत्तुङ्गसौधोत्सङ्गादवतरन्तं कुपितमिव कृतान्तं वत्सराजं वीक्ष्य समेता अपि विविधेन मिषेण स्वभवनानि प्रापुर्भीताः सभासदः। ततः स्वसेवकान्स्वागारपरित्राणार्थं प्रेषयित्वा रथं भुवनेश्वरीभवनाभिमुखं विधाय भोजकुमारोपाध्यायाकारणाय प्राहिणोदेकं वत्सराजः। स चाह पण्डितम्। तात ! त्वामाकारयति वत्सराज इति। सोऽपि तदाकर्ण्य वज्राहत इव भूताविष्ट इव ग्रहग्रस्त इव तेन सेवकेन करेण धृत्वानीतः पण्डितः। तं च बुद्धिमान् वत्सराजः सप्रणाममित्याह। पण्डित तात ! उपविश राजकुमारं जयन्तमध्ययनशालाया आनयेति। आयान्तं जयन्तं कुमारं किमप्यधीतं पृष्ट्वानैषीत्। पुनः प्राह पण्डितम् - विप्र ! भोजकुमारमानयेति। ततो विदितवृत्तान्तो भोजः कुपितो ज्वलन्निव शोणितेक्षणः समेत्याह। आः पाप राज्ञो मुख्यकुमारम् एकाकीनं मां राजभवनाद् बहिरानेतुं तव का नाम शक्तिरिति वामचरणपादुकामादाय भोजेन तालुदेशे हतो वत्सराजः। ततो वत्सराजः प्राह - भोज ! वयं राजादेशकारिण इति बालं रथे निवेश्य खड्गमपकोशं कृत्वा जगामाशु महामायाभवनम्।

ततो गृहीते भोजे लोकाः कोलाहलं चक्रुः। हुंभावश्च प्रवृत्तः। किं किमिति ब्रुवाणा भटा विक्रोशन्त आगत्य सहसा भोजं वधाय नीतं ज्ञात्वा हस्तिशालामुष्ट्रशालां वाजिशालां रथशालां प्रविश्य सर्वाञ्जघ्नुः।

ततः सावित्रीसंज्ञा भोजस्य जननी विश्वजननीव स्थिता दासीमुखात् स्वपुत्रस्थितिमाकर्ण्य कराभ्यां नेत्रे पिधाय रुदती प्राह - पुत्र ! पितृव्येन कां दशां गमितोऽसि। ये मया नियमा उपवासाश्च त्वत्कृते कृताः तेऽद्य मे विफला जाताः। दशापि दिशामुखानि शून्यानि। पुत्र ! देवेन सर्वज्ञेन सर्वशक्तिना मृष्टाः श्रियः। पुत्र ! एनं दासीवर्गं सहसा विच्छिन्नशिरसं पश्येत्युक्त्वा भूमावपतत्। ततः प्रदीप्ते वैश्वानरे समुद्भूतधूमस्तोमेनेव मलीमसे नभसि पापत्रासादिव पश्चिमपयोनिधौ मग्ने मार्तण्डमण्डले महामायाभवनमासाद्य प्राह भोजं वत्सराजः - कुमार ! भृत्यानां दैवत, ज्योतिश्शास्त्रविशारदेन केनचित् ब्राह्मणेन तव राज्यप्राप्तावुदीरितायां राज्ञा भवद्वधो व्यादिष्ट इति। भोजः प्राह -

**रामे प्रव्रजनं बलेर्नियमनं पाण्डोः सुतानां वनं**
**वृष्णीनां निधनं नलस्य नृपते राज्यात् परिभ्रंशनम्।**
**कारागारनिषेवणं च मरणं सञ्चिन्त्य लङ्केश्वरे**
**सर्वः कालवशेन नश्यति नरः को वा परित्रायते? ॥२८॥**

ततो वटवृक्षस्य पत्रे आदायैकं पुटीकृत्य जङ्घां छुरिकया छित्त्वा तत्र पुटके रक्तमारोप्य तृणेनैकस्मिन् पत्रे कञ्चन श्लोकं लिखित्वा वत्सं प्राह। महाभाग ! एतत्पत्रं नृपाय दातव्यम्। त्वमपि राजाज्ञां विधेहीति। ततो वत्सराजस्यानुजो भ्राता भोजस्य प्राणपरित्यागसमये दीप्यमान-मुखश्रियमवलोक्य प्राह।

**एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।**
**शरीरेण समं नाशं सर्वमन्यत्तु गच्छति॥३२॥**
**न ततो हि सहायार्थे माता भार्या च तिष्ठति।**
**न पुत्रमित्रे न ज्ञातिर्धर्मस्तिष्ठति केवलः॥३३॥**
**तुल्यजातिवयोरूपान् हृतान् पश्यत मृत्युना।**
**नहि तत्रास्ति ते त्रासो वज्रवद्धृदयं तव॥३७॥**

ततो वैराग्यमापन्नो वत्सराजो भोजं क्षमस्व इत्युक्त्वा प्रणम्य तं रथे निवेश्य नगराद् बहिर्घने तमसि गृहमागमय्य भूमिगृहान्तरे निक्षिप्य भोजं ररक्ष। स्वयमेव कृत्रिम-विद्याविद्भिः सुकुण्डलं

स्फुरद्वक्त्रं निमीलितनेत्रं भोजकुमारमस्तकं कारयित्वा तच्चादाय कनिष्ठो राजभवनं गत्वा राजानं नत्वा प्राह। श्रीमता यदादिष्टं तत्साधितमिति। ततो राजा च पुत्रवधं ज्ञात्वा तमाह - वत्सराज ! खड्गप्रहारसमये तेन पुत्रेण किमुक्तमिति। वत्सस्तत्पत्रमदात्। राजा स्वभार्याकरेण दीपमानीय तानि पत्राक्षराणि वाचयति -

**मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः**
**सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।**
**अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते**
**नैकेनापि समं गता वसुमती नूनं त्वया यास्यति॥३८॥**

राजा च तदर्थं ज्ञात्वा शय्यातो भूमौ पपात॥

## शब्दार्थाः

| | |
|---|---|
| पर्यपालयत् | परिपालितवान् |
| समजनि | अजायत |
| जराम् | व्याधिम् |
| वीक्ष्य | दृष्ट्वा |
| विचारयामास | विचारितवान्/चिन्तितवान् |
| अपहाय | त्यक्त्वा |
| लोभाविष्टः | लोभग्रस्तः |
| मुमोच | अमुञ्चत्/मुक्तवान् |
| आत्मजम् | पुत्रम् |
| सम्प्राप्तराज्यसम्पत्तिः | यः राज्यसम्पत्तिं प्राप्तवान् |
| दूरीकृत्य | निष्कास्य |
| स्थापयामास | नियोजितवान् |
| क्षितिपालपुत्रम् | राजपुत्रम् |
| ज्योतिःशास्त्रपारङ्गतः | ज्योतिश्शास्त्रे निपुणः |
| बुधैः | विद्वद्भिः, पण्डितैः |
| प्रकाश्या | प्रकटनीया |

| | |
|---|---|
| तुतोष | सन्तुष्टः अभूत् |
| अपनीय | शमयित्वा, दूरीकृत्य |
| आनाययामास | आनीतवान्/आनाययत् |
| आनम्य | प्रणम्य |
| तस्थौ | स्थितवान्/अतिष्ठत् |
| विरिञ्चिः | विधाता |
| उदरम्भरिः | स्वोदरमात्रपोषकः |
| विच्छायवदनः | छायारहितं मुखं यस्य/कान्तिरहितम् |
| प्राहिणोत् | गतवान् |
| विपिने | वने |
| पोतः | पुत्रः |
| आकारणाय | आह्वानाय/आह्वातुम् |
| विक्रोशन्तः | चित्कारं कुर्वन्तः |
| आकारयामास | आह्वायितवान् |
| अनैषीत् | नीतवान् |
| चक्रुः | कृतवन्तः |
| जघ्नुः | हतवन्तः/मारितवन्तः |
| मलीमसे | मलिने |
| नभसि | आकाशे |
| स्तोमेन | समूहेन |
| पुटके | पर्णे |
| ररक्ष | रक्षितवान् |

## अभ्यासः

१. **सर्वान् प्रश्नान् समाधत्त -**

(क) धाराराज्ये किं नाम राजा प्रजाः पर्यपालयत् ?

(ख) सिन्धुलसंज्ञो राजा कस्मै राज्यभारम् अददात् ?

(ग) ब्राह्मणः कस्मिन् शास्त्रे पारङ्गतः आसीत् ?

(घ) वत्सराजः सेवकेन कम् आकारयामास ?

(ङ) पौराः कं भुवः भर्तारं भावयन्ति ?

(च) भोजं कः ररक्ष ?

## २. रिक्तस्थानं पूरयत -

(क) मान्धाता च महीपतिः .................... गतः।

(ख) शरीरेण समं .................... सर्वमन्यत्तु गच्छति।

(ग) ततो गृहीते भोजे लोकाः .................... चक्रुः।

(घ) देव ! .................... क्वापि न हिताय।

(ङ) ततो विप्रवराय दशा .................... ददौ।

(च) तस्य वृद्धत्वे .................... इति पुत्रः समजनि।

## ३. समुचितं मेलयत -

| | |
|---|---|
| (क) लोभः प्रतिष्ठा पापस्य | व्यादिष्टः |
| (ख) भोजमात्मजं | ब्राह्मणं पृच्छ |
| (ग) वैराग्यमापन्नो | देवादेशाः प्रमाणम् |
| (घ) राजा भवद्वधः | वत्सराजः |
| ङ) नृपं नत्वा आह | मुमोच |
| (च) जन्मपत्रिकां | प्रसूतिर्लोभ एव च |

## ४. कोष्ठकाच्चित्वा रिक्तस्थानं पूरयत -

| |
|---|
| विप्रः, भूमौ, वत्सराजः, सापराधमपि, भोजे, सोदरमपहाय |

क) ततः .................... मे वचः क्षन्तव्यम्।

ख) .................... कालोचितमालोचनीयम् इति मत्वा तूष्णीं बभूव।

ग) राजा च तदर्थं ज्ञात्वा शय्यातो .................... पपात।

घ) ततो राजाज्ञया .................... ह्यध्ययनशालां गते .................... प्राह।

ङ) राज्यलक्ष्मीभारधारणसमर्थं .................... राज्यं पुत्राय प्रयच्छति।

५. **अधोलिखितानां पदानां ससूत्रं सन्धिविच्छेदः कार्यः -**

| | | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|---|
| (क) | ह्यात्मनः | ---------- + ---------- | ------------------------- |
| (ख) | मुख्यामात्यानाहूय | ---------- + ---------- | ------------------------- |
| (ग) | वंशोच्छेदश्च | ---------- + ---------- | ------------------------- |
| (घ) | राज्ञस्सिन्धुलस्य | ---------- + ---------- | ------------------------- |
| (ङ) | भूमावपतत् | ---------- + ---------- | ------------------------- |
| (च) | समं गता | ---------- + ---------- | ------------------------- |
| (छ) | ततोऽसौ | ---------- + ---------- | ------------------------- |
| (ज) | पृच्छेति | ---------- + ---------- | ------------------------- |
| (झ) | ततश्चैवम् | ---------- + ---------- | ------------------------- |
| (ञ) | विचिन्तयन्नभुक्ते | ---------- + ---------- | ------------------------- |

६. **कोष्ठके प्रदत्तान् शब्दान् चित्वा रिक्तस्थानं भरत -**

| दत्त्वा, वीक्ष्य, जीवन्, वक्तुम्, आनेतव्यः, मृतः, अध्ययनम्, तुतोष, कुर्वाणम्, विधेहि। |
|---|

(क) वि-ईक्ष् + ल्यप् = ........................

(ख) दा+क्त्वा = ........................

(ग) तुष्+णल् = ........................

(घ) आ-नी+तव्यत् = ........................

(ङ) वि-धा+सि = ........................

(च) अधि-इ+ल्युट् = ........................

(छ) कृ+शानच् = ........................

(ज) मृ+क्त = ........................

(झ) जीव+शतृ = ........................

(ञ) वच्+तुमुन् = ........................

७. **रेखाङ्कितपदान्याधृत्य कारकविभक्ती निर्णयत -**

(क) भोजराजस्य प्रबन्धः कथ्यते।

(ख) राज्यं पुत्राय प्रयच्छामि।

(ग) कण्ठस्था या भवेद्विद्या सा प्रकाश्या बुधैः।

(घ) कीर्तिं च दिक्षु विमलां वितनोति लक्ष्मीम्।

(ङ) अध्ययनशालाया भोज आनेतव्यः।

(च) भोजस्य जन्मपत्रिकां विधेहीति।

(छ) भोजं भटैः आनाययामास।

### ८. अधोलिखितपदानां विग्रहवाक्यं विलिख्य समासनाम निर्दिशत -

| | | समासविग्रहः | समासनाम |
|---|---|---|---|
| (क) | विच्छायवदनः | ------------------------- | ------------------------- |
| (ख) | सम्प्राप्तराज्यसम्पत्तिः | ------------------------- | ------------------------- |
| (ग) | क्षितिपालपुत्रः | ------------------------- | ------------------------- |
| (घ) | ज्योतिःशास्त्रपारङ्गतः | ------------------------- | ------------------------- |
| (ङ) | भुवनेश्वरीविपिने | ------------------------- | ------------------------- |
| (च) | वत्सराजः | ------------------------- | ------------------------- |
| (छ) | सप्रणामम् | ------------------------- | ------------------------- |
| (ज) | विदितवृत्तान्तः | ------------------------- | ------------------------- |
| (झ) | राजादेशकारिणः | ------------------------- | ------------------------- |

### ९. भोजप्रबन्धकथायाः सारं स्वकीयैः वचोभिः विशदयत।

## योग्यता-विस्तारः

समजनि - 'सम्' उपसर्गपूर्वकात् 'जनी प्रादुर्भावे' धातोः लुङि प्रथम पुरुषैकवचने रूपम् (सम् + जन् + चिण् + त)

महाबलम् - महत् (उत्कृष्टं) बलं यस्य सः, तम् (बहुब्रीहिसमासः, द्वितीया-एकवचनम्)

विचारयामास - वि-पूर्वात् 'चर गतौ भक्षणे च' इत्यस्मात् णिचि लिटि प्रथमपुरुषैकवचनम्।

राज्यलक्ष्मीभारधारणसमर्थम् - राज्यमेव लक्ष्मीः, राज्यलक्ष्मीः (अवधारणे कर्मधारयः), राज्यलक्ष्म्याः भारः राज्यलक्ष्मीभारः (षष्ठीतत्पुरुषः)

| | | |
|---|---|---|
| | | राज्यलक्ष्मीभारस्य धारणम् (षष्ठीतत्पुरुषः) राज्यलक्ष्मी-भारधारणे समर्थः (सप्तमीतत्पुरुषः) राज्यलक्ष्मीभार-धारणसमर्थः, तम् (द्वितीयैकवचनम्) |
| सम्प्राप्तराज्यसम्पत्तिः | - | राज्यस्य सम्पत्तिः (षष्ठीतत्पुरुषः), राज्यसम्पत्तिः, सम्प्राप्ता राज्यसम्पत्तिः येन सः (बहुब्रीहिः) |
| तुतोष | - | 'तुष प्रीतौ' धातोः लिटि प्रथमपुरुषैकवचनम्। |
| उदरम्भरिः | - | उदरं बिभर्त्ति इति (उदर + भृ + इन् + मुम् च, निपातसिद्धः) |
| आकारयामास | - | आ + कृ + णिच् + ति (लिटि प्र. एक.) |
| समुद्भूतधूमस्तोमेन | - | समुद्भूतश्च असौ धूमः, समुद्भूतधूमः (कर्मधारयः), समुद्भूतधूमस्य स्तोमः (षष्ठीतत्पुरुषः), तेन समुद्भूतधूमस्तोमेन (तृतीयविभक्तिः) |
| ररक्ष | - | रक्ष् + लिट् प्रथमपुरुष-एकवचने रूपम् (रक्ष पालने) |
| अदात् | - | दा + लुङ् प्रथमपुरुष-एकवचनम् (डुदाञ् दाने) |
| पपात | - | पत् + लिट् प्रथमपुरुषैकवचनम् (पत्लृ गतौ) |

# षष्ठः पाठः

## सांमनस्यसूक्तम्

अथर्ववेदसंहितायाः तृतीयकाण्डस्य (३), त्रिंशत्तमसूक्तस्य (३०) अथर्वा ऋषिः, चन्द्रमाः सांमनस्यं च देवते, अनुष्टुब्-विराड्-जगती-प्रस्तारपङ्क्ति-त्रिष्टुप्-छन्दांसि। सांमनस्यसूक्तमिदं परमसत्तायाः प्रतिनिधित्वकर्तृ अस्ति। सूक्तेऽस्मिन् सद्भावविषये उपदेशः प्रदत्तोऽस्ति। भ्रातरः सहोदरैश्च सह कथमाचरेयुः, माता पुत्रैः पत्या च कथं व्यवहरेत्, पुत्राश्च पितृभ्यां सह कथमाचरेयुः इत्यादिविषयः सूक्तेऽस्मिन् सम्यग् उपन्यस्तोऽस्ति।

**सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।**
**अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या॥१॥**

हे विवदमाना जनाः वः, युष्माकम् अविद्वेषम् अविद्वेषभावोपलक्षितं सांमनस्यं सहृदयं समानहृदयैरुपेतं समानचित्तवृत्त्युपेतं कृणोमि करोमि। समानचित्तवृत्त्युपेतत्वं सांमनस्यं भवति। मिथः प्रीतियुक्ता मनुष्याः संमनुष्याः तैः निर्वर्तितं सांमनुष्यम्। अहन्तव्या गौः जातं वत्सम् इव यूयं जना अपि मिथः परस्परम् आभिमुख्येन कामयध्वम्।

**अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।**
**जाया पत्ये मधुमतीं वाचं वदतु शन्तिवान्॥२॥**

तनयः पितुः अनुव्रतः अनुकूलकर्मा भवतु। यत् पिता कामयते तत्कर्मकारी भवतु। माता च पित्रादिभिः सह संमनाः समानमनस्का भवतु। जाया भार्या पत्ये भर्त्रे मधुमतीं माधुर्यवतीं वाचं, शान्तिवां - सुखयुक्तां वाचं वदतु ब्रवीतु।

**मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।**
**सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया॥३॥**

भ्राता सोदरः भ्रातरं मा द्विष्यात्। दायभागादिनिमित्तेन भ्रातृविषयम् अप्रियं मा कुर्यात्। स्वसारं सहोदरां स्वसा सहोदरा न द्विष्यात्। ते सर्वे भ्रात्रादयः सम्यञ्चः समानगतयः समानमनस्काः समानकर्माणः भूत्वा भद्रया कल्याण्या वाचा वागिन्द्रियेण वाचं वदतु।

**येन देवा न वियन्ति नो च विद्विषते मिथः।**
**तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः॥४॥**

येन ब्रह्मणा देवा इन्द्रादयः न वियन्ति, विमतिं न प्राप्नुवन्ति परस्परं विमतिं विद्वेषं न कुर्वते, तत् संज्ञानं समानज्ञाननिमित्तम् ऐक्यमत्यापादकं ब्रह्म मन्त्रात्मकं सांमनस्यं वः युष्माकं गृहे पुरुषेभ्यः जनेभ्यः करोमि।

**ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः।**

**अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान् वः संमनसस्कृणोमि॥५॥**

ज्यायस्त्वगुणोपेताः ज्येष्ठकनिष्ठभावेन परस्परम् अनुसरन्तः चितितिनः समानमनस्काः संराधयन्तः समानसंसिद्धिकाः समानकार्याः सधुराः समानकार्योद्वहनाः यूयं मा वियौष्ट मा पृथक् भूत। वियुक्ता न भवत। अन्योन्यस्मै वल्गु शोभनं प्रियवाक्यं वदन्तः भाषमाणा यूयम् ऐत आगच्छत। अहमपि हे जनाः वः युष्मान् सध्रीचीनान् सहाञ्चतः कार्येषु सह प्रवृत्तान् संमनसः समानमनस्कान् कृणोमि।

**समानी प्रपा सह वोऽन्नभागः समानो योक्त्रे सह वो युनज्मि।**

**सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः॥६॥**

हे सांमनस्यकामाः वः युष्माकं समानी एका प्रपा पानीयशाला भवतु। अन्नभागश्च सहैव भवतु। परस्परानुरागवशेन एकत्रावस्थितम् अन्नपानादिकं युष्माभिरुपभुज्यताम्। तदर्थम् अहं मन्त्रद्वारा वः युष्मान् समाने योक्त्रे एकस्मिन् बन्धने स्नेहपाशे युनज्मि बध्नामि। अपि च एकफलार्थिनो भूत्वा समानज्ञानाः सन्तः अग्निं सपर्यत पूजयत। आरा नाभिमिव अभितः। रथचक्रस्य मध्यच्छिद्रं नाभिः। तस्या अभितो वर्तमाना आराः चक्रावयवाः चक्रम् इव यूयं एकम् अग्निं परितो वर्तमानाः परिचरत।

**सध्रीचीनान् वः संमनसस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान्।**

**देवा इवामृतं रक्षमाणाः सायंप्रातः सौमनसो वो अस्तु॥७॥**

सध्रीचीनान् सह प्रवर्तमानान् एककार्यकरणे सहोद्युक्तान् संमनसः समानमनस्कान् वः युष्मान् कृणोमि करोमि। तथा युष्माकम् एकविधं श्नुष्टिम् एकविधं व्यापनम् एकविधस्यान्नस्य भुक्तिं वा करोमि। संवननेन मनसः वशीकरणेन सांमनस्यकर्मणा युष्मान् सर्वान् वशे स्थापयामि। देवलोकस्थाः इन्द्रादयः देवाः अमरत्वप्रापकम् अमृतं सायंप्रातः सदा रक्षमाणाः यथा सौमनसः सन्ति ऐकमत्येन सौमनस्ययुक्ताः सन्ति तथा युष्माकमपि सदाकालं सौमनस्यम् अस्तु भवतु, यूयं सर्वे सौमनस्ययुक्ता भवन्तु।

# शब्दार्थाः

| | |
|---|---|
| सहृदयम् | हृदयेन अन्तःकरणेन सह वर्त्तमानम् |
| अविद्वेषम् | द्वेषरहितम् |
| कृणोमि | करोमि |
| अभिहर्यत | व्यवहरत |
| अन्यो अन्यम् | परस्परम् |
| वत्सम् | गोशिशुम् |
| अघ्न्या | अवध्या |
| अनुव्रतः | अनुकुलम् आचरणं यस्य |
| संमनाः | समानं मनः यस्य सः |
| शान्तिवाम् | शान्तिः अस्याः अस्ति इति मत्वर्थीयः वः प्रत्ययः |
| द्विक्षन्मा | द्वेषं मा कुर्यात् |
| सम्यञ्चः | समञ्चन्ति सङ्गच्छन्ते इति |
| सव्रताः | व्रतेन सह वर्तमानाः, समानकर्माणः |
| वियन्ति | विमतिं प्राप्नुवन्ति |
| विद्विषते | विद्वेषं कुर्वन्ति, हिंसां कुर्वन्ति |
| मिथः | अन्योऽन्यम् |
| कृण्मः | कुर्मः |
| संज्ञानम् | समानज्ञानसम्पादकम् |
| ज्यायस्सु | ज्येष्ठेषु, ज्येष्ठकनिष्ठभावेन |
| चित्तिनः | समानमनस्काः |
| मा वियौष्ट | पृथक् न भवत, वियुक्ताः मा भूत |

| | |
|---|---|
| संराधयन्तः | समानसंसाधकाः |
| सधुराः | समानकार्यवाहकाः |
| प्रपा | पानीयशाला |
| सपर्यत | पूजयत |
| संवननेन | मनसः वशीकरणेन |

## अभ्यासः

१. **सर्वे प्रश्नाः समाधेयाः -**

(क) भार्या पत्ये कीदृशीं वाचं वदेत् ?

(ख) भ्राता दायभागनिमित्तेन किं न कुर्यात् ?

(ग) के न वियन्ति ?

(घ) 'वियौष्ट' इत्यस्य कोऽर्थः ?

(ङ) भ्रात्रादयः कथं वाचं वदेयुः ?

२. **रिक्तस्थानं पूरयत -**

(क) सहृदयं .................... कृणोमि वः।

(ख) अहन्तव्या गौः ..............यं जना अपि मिथः परस्परम् आभिमुख्येन कामयध्वम्।

(ग) पुत्रः पितुः .................... भवतु।

(घ) माता च पित्रादिभिः सह .................... भवतु।

(ङ) ज्यायस्वन्तश्चित्तिनो .................... संराध्यन्तः सधुराश्चरन्तः।

(च) वः .................... कृणोमि।

३. **समुचितं मेलयत -**

| | |
|---|---|
| (क) अहन्तव्या गौः | पितुः |
| (ख) अनुव्रतः | न वियन्ति |
| (ग) स्वसारमुत | स्वसा |
| (घ) येन देवा | सह वो युनज्मि |
| (ङ) समाने योक्त्रे | जातं वत्समिव |

४. **कोष्ठकात् चित्वा रिक्तस्थानं पूरयत -**

| कृणोमि, सहैव, न द्विष्यात्, भद्रया, नाभिमिवाभितः |
|---|

(क) सम्यञ्चोऽग्निं सपर्यतारा .................... ।
(ख) अन्नभागश्च .................... भवतु।
(ग) समानमनस्कान् .................... ।
(घ) स्वसारं स्वसा .................... ।
(ङ) सव्रता भूत्वा वाचं वदत ....................।

५. **अधोलिखितकर्तृपदैः सह क्रियापदानि योजयत -**

(क) स्वसारं स्वसा न ............। (कृणोमि/द्विष्यात्)
(ख) तनयः पितुः अनुकूलकर्मा ...........। (भवतु/वदतु)
(ग) जाया पत्ये मधुमतीं वाचं ...........। (वदतु/ब्रुवन्तु)
(घ) समानकार्योद्वहनाः यूयं मा ...........। (वियुङ्क्त/वियौष्ट)
(ङ) समानी योक्त्रे सह वा ...........। (युनज्मि/भुनज्मि)

६. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिख्यताम् -**

| | | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|---|
| (क) | देव्यनुग्रहेणैव | ---------- + ---------- | ------------------------- |
| (क) | पुत्रो मात्रा | ---------- + ---------- | ------------------------- |
| (ख) | वाचं वदतु | ---------- + ---------- | ------------------------- |
| (ग) | सधुराश्चरन्तः | ---------- + ---------- | ------------------------- |
| (घ) | संमनसस्कृणोमि | ---------- + ---------- | ------------------------- |
| (ङ) | वोऽन्नभागः | ---------- + ---------- | ------------------------- |
| (च) | ज्यायस्वन्तः | ---------- + ---------- | ------------------------- |

७. **अधोलिखितपदानां विग्रहवाक्यं प्रदर्श्य समासनाम लिखत -**

| | | समासविग्रहः | समासनाम |
|---|---|---|---|
| (क) | सहृदयम् | ------------------------- | ------------------------- |

(ख) अविद्वेषम् ------------------------- -------------------------

(ग) समानमनस्काः ------------------------- -------------------------

(घ) वागिन्द्रियम् ------------------------- -------------------------

(ङ) अप्रीतिः ------------------------- -------------------------

### ८. रेखाङ्कितपदान्याधृत्य कारकविभक्ती निर्णयत -

(क) सांमनस्यमविद्वेषं कृणोमि वः।

(ख) जाया पत्ये मधुमतीं वाचं वदतु।

(ग) पुत्रो मात्रा भवतु संमनाः।

(घ) भ्राता भ्रातरं मा द्विष्यात्।

(ङ) येन देवा न वियन्ति।

## योग्यता-विस्तारः

**व्याकरणांशः -**

**शान्तिवाम्** - कंशम्भ्याम् इति शम्-शब्दात् तिप्रत्ययः ततो मत्वर्थीयो वः प्रत्ययः।

**कृण्मः** - "कृवि हिंसाकरणयोश्च" इति धातुः। लटि उत्तमपुरुषबहुवचने रूपम्।

**विद्विषते** - "द्विष अप्रीतौ" इति धातुः। लटि प्रथमपुरुषबहुवचने रूपम्।

**सधुराः** - "ऋक्-पूरब्धूःपथामानक्षे" इति समासान्तः अकारः। पुंसि प्रथमाबहुवचने रूपम्।

**वियौष्ट** - "युज् बन्धने" इति धातोः लुङि मध्यमपुरुषबहुवचनम्। माङ् योगात् न अट्। **सध्रीचीनान्** - सह अञ्चति इति "सहस्य सध्रिः" इति सध्रिः आदेशः।

**सपर्यत** - "पर्य पूजायाम्" इति धातुः। कण्ड्वादिः।

**अविद्वेषम्** - अविद्यमानो विद्वेषः यस्मिन् तदिति बहुव्रीहिः। नञस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः इति वार्तिकेन बहुव्रीहिसमासः

**अभिहर्यत** - "हर्य गतिकान्तयोः" इति धातोः परस्मैपदे लोटि मध्यमपुरुषे बहुवचने वचनम्।

**अनुव्रतः** - 'अनु' पूर्वकात् "वृञ् वरणे" इत्यस्मात् धातोः बाहुलकात् अतच् प्रत्यये रूपम्।

**सम्यञ्चः** - सम् + अञ्च + क्विन्। 'समः समि' इत्यनेन समिः आदेशः। मनोज्ञाः, सङ्गताः इत्यर्थः।

**वियन्ति** - वि-पूर्वात् "इण् गतौ" इति धातोः लटि प्रथमपुरुषबहुवचने रूपम्।

# सप्तमः पाठः

# कादम्बरी

## चन्द्रापीडस्य शिक्षाव्यवस्था

महाकविः बाणभट्टप्रणीतः कादम्बरी अस्त्येको लब्धप्रतिष्ठः कथाग्रन्थः। हर्षचरितमित्याख्यायिका अस्यैव प्रसिद्धा कृतिः। सर्वविदितमेव यद् महाकविबाणभट्टः संस्कृतगद्यवाङ्मये दण्डिसुबन्ध्वोरनन्तरं लब्धख्यातिः कविर्वर्तते। स वात्स्यायनगोत्रीयब्राह्मणवंशे जनिमलभत। बाणभट्टो हर्षवर्द्धनस्य (६०६-६४७ ई. यावत्) सभापण्डितो बभूव। कादम्बर्यामुक्ता कथा गुणाढ्यविरचितायाः बृहत्कथायाः सङ्गृहीता। बृहत्कथातः राजसुमनसः साधारणीं कथामाश्रित्य बाणभट्टः स्वीयकाव्यकल्पनाकलानैपुण्येन तस्यां विशिष्टतत्त्वजन्यप्रयोगान्विधाय कादम्बरीं विरचयामास। ग्रन्थेऽस्मिन् नायकः चन्द्रापीडः (शूद्रकः), नायिका च कादम्बरी। अत्र जन्मत्रयस्य विशिष्टं वृत्तान्तमस्ति। अस्यां पूर्वार्धम् उत्तरार्धञ्चेति भागद्वयं विद्यते। उत्तरार्धभागं बाणभट्टस्य पुत्रः भूषणभट्टः अलिखत्।

अतः साधु भण्यते 'गद्यं कवीनां निकषं वदन्ति' इति। प्रौढकवित्वदर्शनात् कल्हनेनोक्तं यत् बाणभट्टः 'कवीनामिह चक्रवर्ती' इति। वर्णनानां व्यापकत्वात् सर्वाङ्गणत्वात् सूक्ष्मतमविवरणसमन्वितत्वाच्च 'बाणोच्छिष्टं जगत्सर्वम्' इति भूयो भूयो व्यपदिश्यते। बाणस्य वर्णनशैली तथा सुमधुरा रसप्रधाना च। यथा एकदा कादम्बरीपठने संलग्नाय सहृदयाय स्वाहारोऽपि न रोचते। उक्तञ्च - कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते। प्रस्तुतोऽयं पाठ्यांशः कथामुखस्य पूर्वभागस्य "चन्द्रापीडस्य शिक्षाव्यवस्था" इत्यस्माद् भागात् सङ्गृहीतोऽस्ति।

तारापीडः क्रीडाव्यासङ्गविघातार्थं बहिर्नगरादनुसिप्रमर्धक्रोशमात्रायामम्, अतिमहता तुहिनगिरिशिखरमालानुकारिणा सुधाधवलितेन प्राकारमण्डलेन परिवृतम्, अनुप्राकारमाहितेन महता परिखावलयेन परिवेष्टितम्, अतिदृढकपाटसंपुटम्, उद्घाटितैकद्वारप्रवेशम्, एकान्तोपरचिततुरगवाह्यालीविभागम्, अधःकल्पितव्यायामशालम्, अमरागाराकारं विद्यामन्दिरमकारयत्। सर्वविद्याचार्याणां च संग्रहे यत्नमतिमहान्तमन्वतिष्ठत्।

तत्रस्थं च तं केशरिकिशोरकमिव, पञ्जरगतं कृत्वा प्रतिषिद्धनिर्गमम्, आचार्यकुलपुत्रप्रायपरिजनपरिवारम्, अपनीताशेषशिशुजनक्रीडाव्यासङ्गम्, अनन्यमनसम्, अखिलविद्योपादानार्थमाचार्येभ्यश्चन्द्रापीडं शोभने दिवसे वैशम्पायनद्वितीयमर्पयाम्बभूव।

प्रतिदिनञ्चोत्थायोत्थाय सह विलासवत्या विरलपरिजनस्तत्रैव गत्वैनमालोकयामास राजा।

चन्द्रापीडोऽप्यनन्यहृदयतया तथानियन्त्रितो राज्ञाऽचिरेणैव यथास्वमात्मकौशलं प्रकटयद्भिः पात्रवशादुपजातोत्साहैराचार्यैरुपदिश्यमानः सर्वा विद्या जग्राह। मणिदर्पण इवातिनिर्मले तस्मिन् संचक्राम सकलः कलाकलापः। तथा हि - पदे, वाक्ये, प्रमाणे, धर्मशास्त्रे, राजनीतिषु, व्यायामविद्यासु, चापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषु सर्वेष्वायुध-विशेषेषु, रथचर्यासु, गजपृष्ठेषु, तुरङ्गमेषु, वीणा-वेणुमुरजकांस्यतालदर्दुरपुट-प्रभृतिषु वाद्येषु, भरतादिप्रणीतेषु नृत्तशास्त्रेषु, नारदीयप्रभृतिषु गान्धर्ववेदविशेषेषु, हस्तिशिक्षायाम्, तुरगवयोज्ञाने, पुरुषलक्षणे, चित्रकर्मणि, पत्रच्छेद्ये, पुस्तकव्यापारे, लेख्यकर्मणि, सर्वासु द्यूतकलासु, गन्धशास्त्रेषु, शकुनिरुतज्ञाने, ग्रहगणिते, रत्नपरीक्षासु, दारुकर्मणि, दन्तव्यापारे, वास्तुविद्यासु, आयुर्वेदे, यन्त्रमन्त्रप्रयोगे, विषापहरणे, सुरङ्गोपभेदे, तरणे, लङ्घने, प्लुतिषु, इन्द्रजाले, कथासु, नाटकेषु, आख्यायिकासु, काव्येषु, महाभारतपुराणेतिहासरामायणेषु, सर्वलिपिषु, सर्वदेशभाषासु, सर्वसंज्ञासु, सर्वशिल्पेषु, छन्दस्सु, अन्येष्वपि कलाविशेषेषु परं सर्वकौशलमवाप।

## शब्दार्थाः

| | |
|---|---|
| क्रीडाव्यासङ्गविघातार्थम् | क्रीडाविषयकासक्तेः दूरीकरणार्थम् |
| अनुसिप्रम् | सिप्रानद्याः समीपम् |
| तुहिनगिरिः | हिमगिरिः |
| शिखरमालानुकारिणा | शृङ्गमालाम् अनुकरोति यः सः, तेन |
| सुधाधवलितेन | श्वेतत्वसम्पादकलेप्यद्रव्यविशेषेण |
| परिवृत्तम् | परिवेष्टितम् |
| कपाटम् | द्वारम् |
| अनुप्राकारमाहितेन | प्राचीरस्य समीपे स्थापितेन |
| वाह्याली | शकटादिस्थानकेन्द्रम् |
| व्यायामशाला | मल्लयुद्धाद्यभ्यासस्थानम् |
| अमरागाराकारम् | देवसदनवद् |
| अन्वतिष्ठत् | अकरोत् |
| केशरकिशोरकमिव | सिंहशावकमिव |

| | |
|---|---|
| पञ्जरगतम् | हिंस्रपशुबन्धनसमर्थलौहपञ्जरे विद्यमानम् |
| अर्पयाम्बभूव | अर्पितवान्/प्रेषितवान् |
| जग्राह | स्वीकृतवान्/गृहीतवान् |
| कलाकलापः | चतुष्षष्टिकलासमूहः |
| सञ्चक्राम | सङ्क्रान्तोऽभवत् |
| शकुनिरुतज्ञाने | पक्षिशब्दज्ञाने |
| दारुकर्मणि | काष्ठक्रियायाम् |
| प्लुतिषु | आरोहणावरोहणे/उत्प्लवने |
| अवाप | प्राप्तवान्/लब्धवान् |
| तुरगः | अश्वः/घोटकः/तुरङ्गः/हयः |

## अभ्यासः

**१. सर्वे प्रश्नाः समाधेयाः -**

(क) 'कादम्बरी' ग्रन्थस्य रचयिता कः ?

(ख) प्रतिदिनमुत्थायोत्थाय राजा कया सह गत्वैनमालोकयामास ?

(ग) केशरिकिशोरकमिव कं पञ्जरगतम् अकरोत् ?

(घ) चन्द्रापीडस्य आचार्यस्य नाम किम् ?

(ङ) वैशम्पायनस्य मित्रं कः आसीत् ?

(च) विलासवती का आसीत् ?

**२. पूर्णवाक्येन प्रश्नान् समाधत्त -**

(क) अमरागाराकारं विद्यामन्दिरं कस्याः नद्याः समीपे आसीत् ?

(ख) आचार्यैरुपदिश्यमानः कः सर्वा विद्या जग्राह ?

(ग) शकुनिरुतज्ञाने इत्यस्य तात्पर्यं लिखत।

(घ) विद्यामन्दिरं कीदृशेन प्राकारमण्डलेन परिवृतमासीत् ?

(ङ) राजा प्रतिदिनमुत्थायोत्थाय विलासवत्या सह कं द्रष्टुं गच्छति स्म ?

(च) 'प्लुतिषु' इति शब्दास्यार्थः कः ?

## ३. ससूत्रं सन्धिविच्छेदं कुरुत -

| | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|
| (क) देव्यनुग्रहेणैव | ---------- + ----------- | ------------------------- |
| (क) परिजनस्तत्रैव | ---------- + ----------- | ------------------------- |
| (ख) प्रतिदिनश्चोत्थाय | ---------- + ----------- | ------------------------- |
| (ग) दशमेऽहनि | ---------- + ----------- | ------------------------- |
| (घ) आचार्येभ्यश्चन्द्रापीडम् | ---------- + ----------- | ------------------------- |
| (ङ) नियन्त्रितो राज्ञा | ---------- + ----------- | ------------------------- |
| (च) एकान्तोपरचितः | ---------- + ----------- | ------------------------- |
| (छ) सर्वेष्वायुधविशेषेषु | ---------- + ----------- | ------------------------- |
| (ज) पञ्जरगतं कृत्वा | ---------- + ----------- | ------------------------- |

## ४. अधोलिखितपदानां ससूत्रं विग्रहवाक्यं लिखत -

| | समासविग्रहः | समासनाम |
|---|---|---|
| (क) अनुसिप्रम् | ----------------------- | ----------------------- |
| (ख) उद्घाटितैकद्वारम् | ----------------------- | ----------------------- |
| (ग) प्रतिदिनम् | ----------------------- | ----------------------- |
| (घ) अमरागाराकारम् | ----------------------- | ----------------------- |
| (ङ) पञ्जरगतम् | ----------------------- | ----------------------- |
| (च) अखिलविद्योपादानार्थम् | ----------------------- | ----------------------- |
| (छ) विरलपरिजनः | ------------------------- | ----------------------- |

## ५. यथायोग्यं पदानि मेलयत -

| | |
|---|---|
| (क) गत्वैनम् | ज्योतिषशास्त्रे |
| (ख) आचार्यैरुपदिश्यमानः | पञ्जरगतम् |
| (ग) विरलपरिजनः | प्राकारमण्डलेन |
| (घ) केशरिकिशोरकमिव | राजा |
| (ङ) सुधाधवलितेन | सर्वा विद्या जग्राह |
| (च) ग्रहगणिते | गृहनिर्माणबोधकशास्त्रेषु |

(छ) वास्तुविद्यासु आलोकयामास

७. **रिक्तस्थानानि भरत -**

(क) मणिदर्पण इवातिनिर्मले ......................... कलाकलापः।

(ख) आचार्यैः ............................... विद्या जग्राह।

(ग) महाभारतपुराणेतिहासरामायणेषु .................. अवाप।

(घ) सर्वविद्याचार्याणाम् ...................अन्वतिष्ठत्।

(ङ) अमरागाराकारं ........................... अकारयत्।

८. **रेखाङ्कितपदान्याधृत्य कारकविभक्ती निर्णयत।**

(क) अनुप्राकारमाहितेन महता परिखावलयेन परिवेष्टितम्।

(ख) तारापीडः विद्यामन्दिरम् अकारयत्।

(ग) आचार्येभ्यः चन्द्रापीडं शोभने दिवसे अर्पयाम्बभूव।

(घ) राजा सह विलासवत्या गत्वैनमालोकयामास।

(ङ) मणिदर्पण इव अतिनिर्मले सकलः कलाकलापः सञ्चक्राम।

९. **अतिमहता तुहिनगिरिशिखरमालानुकारिणा सुधाधवलितेन प्राकारमण्डलेन परिवृतम्। अस्य भावं स्पष्टयत।**

१०. **चन्द्रापीडस्य विद्यामन्दिरस्य पाठ्यविषयाणां नामानि लिखत।**

## योग्यता-विस्तारः

विद्यां चाविद्यां च यस्तद्वेदोभयं स ह।
अविद्याया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥ *ईशावास्यम् - मन्त्रसङ्ख्या - ७*

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं-स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥ *मनुस्मृतिः - २.२०*

**प्राचीनविश्वविद्यालयाः -**

तक्षशिलाविश्वविद्यालयः, नालन्दाविश्वविद्यालयः, विक्रमशीलाविश्वविद्यालयः, वलभी-विश्वविद्यालयः, पुष्पगिरिविश्वविद्यालयः, ओदन्तपुरीविश्वविद्यालयः, सोमपुरविश्वविद्यालयः, श्रीपतिविश्वविद्यालयः, काञ्चीविश्वविद्यालयः इत्येतादृशाः भूरिशः विश्वविद्यालया अधिभारतं

राराज्यन्ते स्म। तत्र च विद्यामधिजिगांसवः शिक्षार्थिनः चीन-तिब्बत–नेपाल–थाईदेश–एशिया-ताष्केण्टप्रभृतिभ्यः नानादेशेभ्यः समायान्ति स्म। तत्र छात्रेषु लौकिक्यः अलौकिक्यश्च विद्याः संक्राम्यन्ते स्म इति ऐतिहासिकप्रामाण्य-चिन्तनेन उपलभामहे। तत्र हि तारापीडः पुत्रस्य चन्द्रापीडस्य विद्याग्रहणाय विद्यामन्दिरमकारयत्। तत्र च अधिकसहस्रा विद्याः शिक्ष्यन्ते स्म। तच्च वयं कादम्बर्याः सुष्ठु अध्ययनेन प्रत्येतुं शक्नुमः।

रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः॥
जयन्ति वाणासुरमौलिलालिता दशास्यचूडामणिचक्रचुम्बिनः।
सुरासुराधीशशिखान्तशायिनी भवच्छिदस्त्र्यम्बकपादपांसवः॥
जयत्युपेन्द्रः स चकार दूरतो बिभित्सया यः क्षणलब्ध लक्ष्यया।
दृशैव कोपारुणया रिपोरुरः स्वयं भयाद्भिन्नमिवास्रपाटलम्॥
नमामि भत्सो श्चरणाम्बुजद्वयं सशेखरैर्मौखरिभिः कृतार्चनम्।
समस्तसामन्तकिरीटवेदिकाविटङ्कपीठोल्लुठितारुणाङ्गुलि॥
अकारणाविष्कृतवैरदारुणादसज्जनात्कस्य भयं न जायते।
विषं महाहेरिव यस्य दुर्वचः सुदुःसहं सन्निहितं सदा मुखे॥

# अष्टमः पाठः

## नीतिश्लोकाः

**पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।**
**नादन्ति तस्य खलु वारिवाहाः परोपकाराय सतां विभूतयः॥ १॥**

**भावार्थः -** नद्यः स्वस्य जलं स्वयं न पिबन्ति। तरवः स्वस्य फलानि, स्वयं न खादन्ति। मेघाः शस्यतृणपर्णफलादिकं न भक्षयन्ति खलु। तथैव सज्जनानां सम्पदः अन्येषाम् उपकाराय कल्पन्ते।

**सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबुद्धिरेषा।**
**करोमीति वृथाभिमानः स्वकर्म सूत्रग्रथितो हि लोकः॥ २॥**

**भावार्थः -** सन्तोषस्य कष्टस्य च कश्चिदपि दाता न भवति। अन्यः यच्छति, इति ईदृशीं निन्द्यमतिम् अहं न करोमि। स्वयं सम्पादयामि इति अहङ्कारः निरर्थकः। यतोहि जनस्तु स्वकर्म स्वीयकर्मसूत्रेण बद्धः।

**मनीषिणः सन्ति न ते हितैषिणः हितैषिणः सन्ति न ते मनीषिणः।**
**सुहृच्च विद्वानपि दुर्लभो नृणां यथौषधं स्वादु हितं च दुर्लभम्॥ ३॥**

**भावार्थः -** प्राज्ञाः वर्तन्ते न तु हितैषिणः। हितेच्छवः न प्राज्ञाः भवन्ति। मानवानां स्नेहगुण-युक्तः बान्धवः सन्नपि विद्यावान् मनुष्यो दुर्लभः। हितकारि मधुरं च भेषजम्, प्राप्तुं कष्टसाध्यम्।

**अनेकशास्त्रं बहु वेदितव्यम् अल्पश्च कालो बहवश्च विघ्नाः।**
**यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुमध्यात्॥ ४॥**

**भावार्थः -** मनुष्यः यथाशक्ति अधिकाधिकम् अध्ययनं कुर्यात्। कारणं स्पष्टम् एव अस्ति यत् शास्त्राणां संख्या अत्यधिका वर्तते। परन्तु एतदर्थं प्राप्तः समयः न्यूनः अस्ति विघ्नाः च बहवः सन्ति। पठितुं ज्ञातुं वा सामग्री अपि अधिका अस्ति अतः शास्त्राध्ययनसमये यत्किञ्चित् सारभूतं महत्त्वपूर्णं च भवति, तत् तथैव स्वीकरणीयं, यथा हंसः जलमिश्रितदुग्धाद् दुग्धमेव स्वीकरोति जलञ्च त्यजति।

**यौवनं धनम्पत्तिः प्रभुत्वमविवेकिता।**

**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥५॥**

**भावार्थः -** युवावस्था, द्रव्यवैभवम्, स्वामित्वम्, विचाररहितत्वम्, एतेषु एकैकमपि पृथक् पृथक् अनर्थमेव जनयति। यस्मिन् पुरुषे पुनश्चतुष्टयमेकत्रितं भवति तत्र किं वा वक्तव्यम्। तादृशः पुरुषस्तु अनर्थानामाकर एव भवति।

**अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च।**

**वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन्॥६॥**

**भावार्थः -** हे राजन् ! निरन्तरं धनप्राप्तिः निरोगिता च, जाया प्रिया मधुरभाषिणी च, आज्ञापालकः सुतः तथा धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयप्रदा विद्या इमानि षडेव संसारिणो जनस्य सुखप्रदायकानि विद्यन्ते।

**अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम्।**

**विषं सभा दरिद्रस्य वृद्धस्य तरुणी विषम्॥७॥**

**भावार्थः -** श्रुत्यादेः विद्याया निरन्तरम् अभ्यासः न क्रियते चेत् सा विद्या विषेण तुल्या भवति। भोजने अजीर्णे सति पुनः भोजनं क्रियते चेत् तद् विषमिव भवति। निर्धनानां सभाऽपि विषमिव भवति। तथैव जडावस्थायां युवत्यामासक्तिः विषं भवति।

**आयुः कर्म च वित्तं च विद्या निधनमेव च।**

**पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः॥८॥**

**भावार्थः -** जीवनकालः, पूर्वजन्मकृतसुकृतदुष्कृतजन्यसुखदुःखादिभोगः, धनञ्च विद्या च मरणञ्च इमानि पञ्चापि मातृगर्भस्थितस्यैव प्राणिनः निर्धार्यन्ते।

**गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।**

**सुस्वादुतोयाः प्रभवन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः॥९॥**

**भावार्थः -** गुणिषु जनेषु गुणा, गुणा एव तिष्ठन्ति। त एव गुणा दुर्जनानवाप्य दोषत्वेन परिणमन्ते। यथा नद्यः सुस्वादुवारियुताः प्रवहन्ति, किन्तु वारिधिं सम्प्राप्य तत्सलिलमपेयं भवति।

**यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं**

**तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।**

**यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं**

**तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥१०॥**

**भावार्थः -** यदा अहं किञ्चिद् जानामि स्म तदा अहं मदमत्तगज इव मदान्धऽजाये। तदा अहं 'सर्वविद् अस्मि' इति मदीयं मनः गर्वप्राप्तमभवत्। किन्तु यदा अहं विद्वद्भ्यः किञ्चित् किञ्चिद् ज्ञानमवाप्तवान् तदा अहं 'मूढोऽस्मि' इति विचिन्त्य ज्वर इव मे प्रमादोऽपगतः।

**सत्याऽनृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि चार्थपरा वदान्या।**
**नित्यव्यया प्रचुरनित्यधनागमा च वाराङ्गनेव नृपनीतिरनेक रूपा॥११॥**

**भावार्थः -** राज्ञां नीतिः गणिकेव। क्वचित् यथार्था क्वचित् मृषा क्वचित् निष्ठुरा च। क्वचित् मधुरभाषिषी च। क्वचित् हननशीला च। क्वचित् कृपावती। क्वचित् धनपरायणा। क्वचित् वदान्या। क्वचित् निरन्तरम् अर्थापगमा च। क्वचित् प्रचुरनित्यधनागमा च। अनेकरूपा भवति इयं राजनीतिः।

## शब्दार्थाः

| | | |
|---|---|---|
| अम्भः | सलिलम् | जल |
| वारिवाहाः | पयोमुक् | बादल |
| सताम् | सज्जानानां | सज्जनों का |
| विभूतिः | वैभवम् | सम्पद् |
| अम्बु | वारि | जल |
| अविवेकिता | विचारशून्यत्वम् | अविचारता |
| अर्थागमो | धनप्राप्तिः | धनका लाभ |
| वश्यः | आज्ञावाहः | आज्ञाकारी |
| अर्थकरी | धनोपार्जिका | धनका लाभ कराने वाली |
| अजीर्णे | अपाके | अपथ्य होने पर |

# अभ्यासः

१. **सर्वे प्रश्नाः समाधेयाः -**

(क) सुस्वादुजलं कदा अपेयं भवति ?

(ख) कदा विद्या विषं भवति ?

(ग) जीवलोकस्य षट् सुखानि लिखत।

(घ) कीदृशम् औषधं दुर्लभं भवति ?

(ङ) वृथा अभिमानं कः करोति ?

२. **पूर्णवाक्येन उत्तरत -**

(क) राजनीतेः दश भेदान् लिखत।

(ख) कदा मे प्रमादः व्यपगतः ?

(ग) गर्भस्थस्य देहिनः कानि सृज्यन्ते ?

(घ) कदा अहं द्विप इव मदान्धोऽभवम्?

(ङ) केषां विभूतयः परोपकाराय भवन्ति?

३. **वैकल्पिकाः प्रश्नाः -**

(क) नद्यः किं न पिबन्ति ?

(अ) दुग्धम् (आ) स्वयमेव नाम्भः

(इ) वायुः (ई) किमपि न

(ख) कीदृशं भोजनं विषम् ?

(अ) जीर्णे (आ) बुभुक्षायाम्

(इ) अजीर्णे घ) अल्पहारे

(ग) कं प्राप्य गुणा भवन्ति दोषाः ?

(अ) निर्गुणम् (आ) गुणम्

(इ) पयः (ई) ज्ञानम्

(घ) भार्या किदृशी भवेत् ?

(अ) कटुवादिनी (आ) प्रियवादिनी

(इ) कलहकारिणी (ई) अतिवादिनी

(ङ) क्षीरमिवाम्बुमध्यात् कः ग्रहणं करोति ?

(अ) काकः (आ) वकः

(इ) चटकः (ई) हंसः

(च) कस्मिन् काले बहवः विघ्नाः भवन्ति ?

(अ) अल्पकाले (आ) दीर्घकाले

(इ) प्रातःकाले (ई) सायं काले

## ४. रिक्तस्थानानि पूरयत -

(क) मनीषिणः सन्ति ...................................... स्वादु हितं च दुर्लभम्।

(ख) अनेकशास्त्रं ........................................ क्षीरमिवाम्बुमध्यात्।

(ग) पिबन्ति नद्यः .......................................... फलानि वृक्षाः।

(घ) सुखस्य ........................................ कोऽपि दाता।

(ङ) यौवनं ............................................... प्रभुत्वमविवेकिता।

(च) प्रिया च .................................................... वादिनी च।

(छ) अजीर्णे .................................................... विषम्।

## ५. यथायोग्यं श्लोकांशान् समायोजयत -

| | |
|---|---|
| (क) एकैकमप्यनर्थाय | विद्या निधनमेव च |
| (ख) वश्यश्च पुत्रोऽर्थकरी च विद्या | ते निर्गुणं प्राप्य भवन्ति दोषाः |
| (ग) अनभ्यासे विषं विद्या | किमु यत्र चतुष्टयम् |
| (घ) आयुः कर्म च वित्तं च | षड् जीवलोकस्य सुखानि राजन् |
| (ङ) गुणा गुणज्ञेषु गुणा भवन्ति | अजीर्णे भोजनं विषम् |
| (च) यत्सारभूतं तदुपासितव्यं | इव मदान्धः समभवं |
| (छ) यदा किञ्चिज्ज्ञोऽहं द्विप | हंसो यथा क्षीरमिवाम्बुमध्यात् |

## ६. अधोलिखितपदानां ससूत्रं सन्धिविच्छेदं कुरुत।

| | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|
| (क) सर्वज्ञोऽस्मीत्यभवदवलिप्तं | ---------- + ---------- | ---------------------- |
| (ख) भवन्त्यपेयाः | ---------- + ---------- | ---------------------- |
| (ग) गर्भस्थस्यैव | ---------- + ---------- | ---------------------- |

| | | | |
|---|---|---|---|
| (घ) | चार्थपरा | ---------- + ----------- | ----------------------- |
| (ङ) | वाराङ्गनेव | ---------- + ----------- | ----------------------- |
| (च) | वश्यश्च | ---------- + ----------- | ----------------------- |
| (छ) | कोऽपि | ---------- + ----------- | ----------------------- |
| (ज) | यथौषधम् | ---------- + ----------- | ----------------------- |
| (झ) | वित्तं च | ---------- + ----------- | ----------------------- |

७. अधोलिखितानां पदानां विग्रहवाक्यं विलिख्य ससूत्रं समासं निर्दिशत।

| | | समासविग्रहः | समासनाम |
|---|---|---|---|
| (क) | नित्यव्यया | ------------------------- | ------------------------- |
| (ख) | प्रचुरनित्यधनागमा | ------------------------- | ------------------------- |
| (ग) | अनेकरूपा | ------------------------- | ------------------------- |
| (घ) | धनागमः | ------------------------- | ------------------------- |
| (ङ) | मदान्धः | ------------------------- | ------------------------- |
| (च) | अविवेकिता | ------------------------- | ------------------------- |
| (छ) | निर्गुणम् | ------------------------- | ------------------------- |

८. सोदाहरणं शिखरिणीवृत्तस्य लक्षणं लिखत।

९. यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं .............॥ इति श्लोकस्य भावार्थं लिखत।

## योग्यता-विस्तारः

मनुष्येषु ज्ञानं हि विशेषः इति आर्योक्तिः। इतरप्राणिभ्यः ज्ञानाधिक्येनैव मानवः गरीयानिति कीर्त्यते। तादृशं ज्ञानं सन्मार्गे प्रयुक्तं सत् लोककल्याणकारकं भवति। अविनीतिमार्गे प्रयुक्तं सत् लोकविनाशकारकं भवति। पूर्वम् ऋषयः कवयः ज्ञानं समाजहिताय कथमुपयोक्तव्यमिति आलोच्य सम्यक् परिशील्य च उत्तमश्लोकरूपेण अस्मभ्यं दत्तवन्तः। तेषु कानिचन श्लोकरत्नानि भवतां पुरतः उपस्थाप्यन्ते तानि पठित्वा नन्दत।

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्॥
एको देवः केशवो वा शिवो वा एकं मित्रं भूपतिर्वा यतिर्वा।

एको वासः पत्तने वा वने वा एका नारी सुन्दरी वा दरी वा॥
एके सत्पुरुषाः परार्थघटकं स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्था विरोधेन ये।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये।
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥
यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापनताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा॥
वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः।
तुषाराद्रेः सूनोरहह! पितरि क्लेशविवशे
न चासौ संपातः पयसि पयसां पत्युरुचितः॥
यदचेतनोऽपि पादैःस्पृष्टः प्रज्वलति सवितुरिनकान्तः।
त्ततेजस्वी पुरुषः परकृतनिकृतिं कथं सहते॥
सिहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः॥

# नवमः पाठः

## णिजन्त-सन्नन्त-यङन्त-यङ्लुगन्त-प्रयोगाः

अस्मिन् पाठे "भूवादयो धातवः" इति "सनाद्यन्त धातवः" इति च सूत्रद्वयविहितधातुसंज्ञकमात्रेभ्यः प्रयोजकव्यापारे णिच् प्रत्ययो विधीयते। प्रयोजकश्च कर्तुः प्रेरकः। यथा लक्ष्मणः अधीते, तं रामः अध्ययनादिक्रियया प्रेरयति, तत्र अध्ययनकर्ता लक्ष्मणः, स प्रयोज्यो णिच् प्रत्ययस्तु प्रेरणादिकर्तृलक्ष्मणव्यापारे भवति। तत्र णिचि जाते गत्याद्यर्थधातूनां प्रयोज्यकर्तुः "स्वतन्त्रः कर्ता" इत्यनेन सूत्रेण प्राप्तां कर्तृसंज्ञां बाधित्वा "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ" इति सूत्रेण कर्मसंज्ञायां "कर्मणि द्वितीया" इति सूत्रेण द्वितीया विधीयते। एवञ्च 'लक्ष्मणं रामः अध्यापयति' इति प्रयोगो भवति। गत्याद्यर्थभिन्नेभ्यः सकर्मकेभ्यो पचिप्रभृतिभ्यः धातुभ्यः ण्यन्ते प्रयोज्यकर्तरि तृतीया, यथा - देवदत्तेन यज्ञदत्तः तण्डुलं पाचयति। पाठेऽस्मिन् प्रयोजकानुसारेणैव प्रथममध्यमोत्तमपुरुषाणां व्यवस्था ज्ञेया। यथा - "णिचश्च" इति सूत्रेण कर्त्रभिप्राये फले आत्मनेपदं भाव्यम्।

### णिजन्तप्रकरणम् -

**हेतुमति च** *(पा.सू. ३.१.२६)* हेतुः स्वतन्त्रस्य कर्तुः प्रयोजकः। तदीयो व्यापारः प्रयोजकव्यापारः प्रेषणादिः। तस्मिन् वाच्ये सर्वेभ्यो धातुभ्यो णिच् प्रत्ययो भवति। यथा - देवदत्तः पचति, यज्ञदत्तः तं प्रेरयति इति यज्ञदत्तः देवदत्तेन पाचयति (पच् + णिच् = पाचि)। देवदत्तः गच्छति, यज्ञदत्तःतं प्रेरयति, इति यज्ञदत्तः देवदत्तं गमयति (गम् + णिच् = गमि)।

**णिचश्च** *(पा.सू १.३.७४)* - णिजन्तेभ्यो धातुभ्यः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति। कटं कारयते। ओदनं पाचयते। परगामिनि कियाफले परस्मैपदं भवति। कटं कारयति परस्य। ओदनं पाचयति अन्यस्य।

**अचो ञ्णिति** *(पा.सू. ७.२.११५)* - ञिति णिति च प्रत्यये परेऽजन्ताङ्गस्य वृद्धिः स्यात्। **यथा** - भू + इ (णिच्) = भौ + इ = भावि + अ (शप्) + ति = भावयति। तथैव - णीञ् - नाययति। कृ - कारयति। धृ - धारयति। चिञ् - चाययति। जि - जाययति।

**अत उपधायाः** *(पा.सू. ७.२.११६)* - उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे। अन्तिमवर्णात् पूर्ववर्णः उपधासंज्ञको भवति। यथा - पठ् + इ (णिच्) = पाठि + अ (शप्) + ति = पाठयति। तथैव - पच् - पाचयति। हस् - हासयति। पत् - पातयति। त्यज् - त्याजयति।

**पुगन्तलघूपधस्य च** *(पा.सू. ७.३.८६)* - पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात् सार्वधातुकार्धधातुकयोः। यथा - लिख् + इ (णिच्) = लेखि + अ (शप्) + ति = लेखयति। तथैव - मिल - मेलयति। रुच् - रोचयति। खिद् - खेदयति। मुच् - मोचयति। सिच् - सेचयति।

**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ** *(पा.सू. ७.३.३६)* - अर्ति ह्री व्ली री क्नूयी क्ष्मायी इत्येतेषाम् अङ्गानाम् आकारान्तानां च पुगागमो भवति णौ परतः। यथा - ऋ + इ (णिच्) = ऋ-प् (पुक्) + इ = अर्पि + अ (शप्) + ति = अर्पयति। तथैव - ह्री - ह्रेपयति। व्ली - व्लेपयति। क्नू - क्नोपयति। दा - दापयति। स्था - स्थापयति। स्ना - स्नापयति। धा - धापयति।

**शाच्छासाह्वाव्यावेपां युक्** *(पा.सू. ७.३.३७)* - शा, छा, सा, ह्वा, वे, पा इत्येतेषाम् अङ्गानां युगागमो भवति णौ परतः। उदाहरणानि - शो तनूकरणे - शाययति। छो छेदने - छाययति। षो अन्तकर्मणि -साययति। ह्वेञ् स्पर्धायां शब्दे च - आह्वाययति। व्येञ् संवरणे - संव्याययति। वेञ् तन्तुसन्ताने - वाययति। पा पाने - पाययति।

**पातेर्लुग् वक्तव्यः (वार्तिकम्)** - 'पा रक्षणे' इति धातोः णिचि परे लुग् आगमो भवति। यथा - पालयति।

**क्रीङ्जीनां णौ** *(पा.सू. ६.१.४८)* - डुक्रीञ् द्रव्यविनिमये, इङ् अध्ययने, जि जये इत्येतेषां धातूनाम् एचः स्थाने णौ परतः आकारादेशो भवति। यथा - क्री - क्रापयति। इङ् - अध्यापयति। जि - जापयति।

**मितां ह्रस्वः** *(पा.सू. ६.४.९२)* - घटादीनां ज्ञपादीनां चोपधाया ह्रस्वः स्याण्णौ। यथा - घटयति। गम् - गमयति। शम् - शमयति। जन् - जनयति। नम् - नमयति/नामयति। ज्वल् - ज्वलयति/ज्वालयति।

**णिजन्तानि उदाहरणानि**

१. बालको लेखं लिखति। गुरुः बालकेन लेखं लेखयति।

२. भृत्यः कार्यं करोति। स्वामी भृत्येन कार्यं कारयति।

३. शत्रवः दाम्यन्ति। राजा शत्रून् दमयति।

४. श्रीकृष्णः गोकुलं गच्छति। वसुदेवः श्रीकृष्णं गोकुलं गमयति।

५. पुस्तकम् आधानिकायां तिष्ठति। शिष्यः पुस्तकम् आधानिकायां स्थापयति।

## सन्नन्तप्रकरणम् -

**धातोः कर्मणः समानकर्तृकादिच्छायां वा** *(पा.सू. ३.१.७)* - इच्छासमानकर्तृकत्वे सति इच्छाकर्मीभूतो यो व्यापारः तद्वाचकाद् धातोरिच्छायां सन् वा स्यात्। यथा - पठितुम् इच्छति पिपठिषति। अत्र यः कर्ता इषिधातोः स एव कर्ता इच्छाकर्मीभूतव्यापारस्य पठनस्यापि। अतः इच्छाकर्मीभूतव्यापारवाचकाद् धातोः सन् भवति। तथैव - गन्तुमिच्छति - जिगमिषति। खादितुमिच्छति - चिखादिषति। कर्तुमिच्छति - चिकीर्षति। लेखितुमिच्छति - लिलेखिषति। ज्ञातुमिच्छति - जिज्ञासते। श्रोतुमिच्छति - शुश्रूषते। स्मर्तुमिच्छति - सुस्मूर्षते। द्रष्टुमिच्छति - दिदृक्षते। भवितुमिच्छति - बुभूषति। अत्तुमिच्छति - जिघत्सति। अध्येतुमिच्छति - अधिजिगांसते। दातुमिच्छति - दित्सति। क्रेतुमिच्छति - चिक्रीषति। हन्तुमिच्छति - जिघांसति। अध्येतुमिच्छति - अधिजिगांसते।

**सन्नन्तानि उदाहरणानि -**

१. अन्तेवासिनः अध्येतुमिच्छन्ति। अन्तेवासिनः अधिजागांसन्ते।
२. माता भिक्षुकेभ्यः भोजनं दातुमिच्छति। माता भिक्षुकेभ्यो भोजनं दित्सति।
३. अहं भोजनम् अद्मि। अहं जिघत्सामि।
४. यूयं भ्रमितुमिच्छथ। यूयं बिभ्रमिषथ।
५. शिष्यौ मन्त्रान् स्मर्तुमिच्छतः। शिष्यौ मन्त्रान् सुस्मूर्षेते।

## यङ्लुगन्तप्रकरणम् -

**धातोरेकाचो हलादेः क्रियासमभिहारे यङ्** *(पा.सू. ३.१.२२)* - एकाज् यो धातुर्हलादिः क्रियासमभिहारे वर्तते, तस्माद् यङ् प्रत्ययो भवति। अयमेकाज्भ्यो हलादिभ्यो धातुभ्यो भवति। अनेकाज्भ्यो न भवति। अजादिभ्यो न भवति। पौनःपुन्यं, भृशार्थो वा क्रियासमभिहारः। पुनः पुनः पचति पापच्यते। भृशं ज्वलति जाज्वल्यते। देदीप्यते।

**यङोऽचि च** *(पा.सू २.४.७४)* - यङोऽच्प्रत्यये लुग् भवति। चकारात् तं विनाऽपि भवति। अतोऽनैमित्तिकोऽयं लुक् सर्वेभ्यो धातुभ्यो विहितस्य यङ्प्रत्ययस्य भवति।

**यङ्लुगन्तोदाहरणानि -**

१. बालकः अतिशयेन क्रीडति। बालकः चेक्रीड्यते।
२. शिष्यः गुरुं पौनःपुन्येन प्रश्नं पृच्छति। शिष्यः गुरुं प्रश्नं परीपृच्छ्यते।
३. शिशवः भृशं रुदन्ति। शिशवः रोरुद्यन्ते।

४. वयम् अतिशयेन भोजनं पचामः। वयं भोजनं पापच्यामहे।

५. युवां पौनःपुन्येन गीतां पठथः। युवां गीतां पापठ्येथे।

६. सः मां पौनःपुन्येन पश्यति। सः मां दरीदर्ष्टि/दरीदर्शीति।

७. वेदेषु भृशमलौकिकं ज्ञानं वर्तते। वेदेषु अलौकिकं ज्ञानं वरीवर्ति/वरीवरीति।

८. कुम्भकर्णः अतिशयेन शेते। कुम्भकर्णः शिशेति/शिशयीति।

९. भीमः अत्यधिकं खादति। भीमः चाखात्ति/चाखादीति।

१०. गायिकाः पौनःपुन्येन गीतं गायन्ति। गायिकाः गीतं जागति।

बोधसौकर्याय णिजन्तादीनि रूपाणि प्रदत्तानि।

| धातुः | ण्यन्तरूपम् | सन्नन्तरूपम् | यङन्तरूपम् | यङ्लुगन्तरूपम् |
|---|---|---|---|---|
| गम्लृँ गतौ | गमयति | जिगमिषति | जङ्गम्यते | जङ्गन्ति/जङ्गमीति |
| श्रु श्रवणे | श्रावयति | शुश्रूषते | शोश्रूयते | शोश्रोति/शोश्रवीति |
| ज्ञा अवबोधने | ज्ञापयति | जिज्ञासते | जाज्ञायते | जाज्ञाति/जाज्ञेति |
| डुकृञ् करणे | कारयति | चिकीर्षति | चेक्रीयते | चर्कर्ति/चर्करीति |
| लिखँ अक्षरविन्यासे | लेखयति | लिलेखिषति | लेलिख्यते | लेलेक्ति/लेलेखीति |
| डुक्रीञ् द्रव्यविनिमये | क्रापयति | चिक्रीषति | चेक्रीयते | चेक्रेति/चेक्रयीति |
| पठँ व्यक्तायां वाचि | पाठयति | पिपठिषति | पापठ्यते | पापट्टि/पापठीति |
| स्मृ चिन्तायाम् | स्मारयति | सुस्मूर्षते | सास्मर्यते | सरीस्मर्ति/सरीस्मरीति |
| डुदाञ् दाने | दापयति | दित्सति | देदीयते | दादाति/दादेति |
| णीञ् प्रापणे | नाययति | निनीषति | नेनीयते | नेनेति/नेनयीति |
| वदँ व्यक्तायां वाचि | वादयति | विवदिषति | वावद्यते | वावत्ति/वावदीति |
| त्यजँ हानौ | त्याजयति | तित्यक्षति | तात्यज्यते | तात्यक्ति/तात्यजीति |
| ह्वेञ् स्पर्धायां शब्दे च | आह्वाययति | आजुहूषति | आजाह्वायते | आजाह्वाति/आजाह्वेति |
| भू सत्तायाम् | भावयति | बुभूषति | बोभूयते | बोभोति/बोभवीति |
| इङ् अध्ययने | अध्यापयति | अधिजिगांसते | --- | --- |

| | | | | |
|---|---|---|---|---|
| पत्लृँ गतौ | पातयति | पिपतिषति | पनीपत्यते | पनीपत्ति/पनीपतीति |
| ग्रहँ उपादाने | ग्राहयति | जिघृक्षति | जरीगृह्यते | जरीगर्ढ्ढि/जरीगर्हीति |
| प्रच्छँ ज्ञीप्सायाम् | प्रच्छयति | पिपृच्छिषति | परीपृच्छ्यते | परीपृष्टि/परीपृच्छीति |
| हसँ हसने | हासयति | जिहसिषति | जाहस्यते | जाहस्ति/जाहसीति |
| ष्ठा गतिनिवृत्तौ | स्थापयति | तिष्ठासति | तेष्ठीयते | तास्थाति/तास्थेति |
| विशँ प्रवेशने | उपवेशयति | उपविविक्षति | उपवेविश्यते | उपवेवेष्टि/उपवेवेशीति |

## अभ्यासः

### १. अधोलिखितान् सर्वान् प्रश्नान् समाधत्त -

(क) णिच् प्रत्ययः कस्मिन्नर्थे भवति ?

(ख) णिचि परे उपधाभूतस्य अतो वृद्धिः केन सूत्रेण भवति ?

(ग) "णिचश्च" इति सूत्रेण किं भवति ?

(घ) उपविशति इत्यस्य सनि किं रूपम् ?

(ङ) सन् प्रत्ययः कस्मिन्नर्थे भवति ?

### २. पूर्णवाक्येन उत्तरत -

(क) सन् प्रत्ययविधायकं सूत्रं किम् ?

(ख) "हेतुमति च" इति सूत्रस्यार्थः कः ?

(ग) करोतेः यङि किं रूपं भवति ?

(घ) यङ् प्रत्ययः कस्मिन्नर्थे भवति ?

(ङ) 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ' इति सूत्रेण किं विधीयते ?

### ३. उदाहरणानुसारं वाक्यानि लिखत -

यथा - पिता पुत्रं चन्द्रं ............ (दृश्)

पिता पुत्रं चन्द्रं दर्शयति।

(क) हरिः देवान् अमृतं ................................। (भुज्)

(ख) माता पुत्रं सत्यं ....................................। (भाष्)

(ग) सः मित्रं वार्त्तां ....................................। (श्रु)

(घ) माता बालं पाठशालां .......................................। (गम्)

## ४. रिक्तस्थानानि पूरयत -

(क) धातोः कर्मणः .................... वा।

(ख) ........................... पुङ् णौ।

(ग) ..................................क्रियासमभिहारे यङ्।

(घ) पौनः पुन्येन पठति ......................।

(ङ) खादितुमिच्छति ......................।

## ५. उदाहरणमनुसृत्य रिक्तस्थानानि पूरयत -

यथा – सः पठितुम् इच्छति = पिपठिषति

बालः →

- गन्तुम् इच्छति ............................ ।
- ..................................... बुभूषति।
- पौनःपुन्येन लिखति ...................... ।
- .................................. जिगीषति।
- पचन्तं प्रेरयति ............................ ।
- भृशं रोदिति .............................. ।
- .......................................... शुश्रूषते।

## ६. अधोनिर्दिष्टरूपाणां धातुं लकारं प्रत्ययञ्च लिखित।

| रूपम् | धातुः | प्रत्ययः | लकारः |
|---|---|---|---|
| पिपठिषतु | ---------- | ---------- | ---------- |
| अबुभूषत् | ---------- | ---------- | ---------- |
| भावयेयुः | ---------- | ---------- | ---------- |
| अश्रावयाम | ---------- | ---------- | ---------- |
| कारयिता | ---------- | ---------- | ---------- |
| चिकीर्षतु | ---------- | ---------- | ---------- |
| जिघत्सिता | ---------- | ---------- | ---------- |
| पिपठिषेत् | ---------- | ---------- | ---------- |

| | | | |
|---|---|---|---|
| भावयथः | ---------- | ---------- | ---------- |
| अपाठयः | ---------- | ---------- | ---------- |

७. अधः प्रदत्तानि पदानि स्वीकृत्य वाक्यानि रचयत -

(क) पिपठिषति .......................................।

(ख) स्थापयति .......................................।

(ग) परीपृच्छ्यते .................................।

(घ) दादाति ....................................।

(ङ) चिकीर्षति .................................।

## योग्यता-विस्तारः

**धातवो द्विविधाः -**

**औपदेशिकधातवः** - पाणिनीयधातुपाठे पठिताः १९३० धातवो धातुपाठे उपदिष्टत्वादौपदेशिकाः। एतेषां "भूवादयो धातवः" इत्यनेन धातुसंज्ञा भवति।

**आतिदेशिकधातवः** - सन्, क्यच्, काम्यच्, क्यष्, क्यङ्, क्विप्, णिङ्, ईयङ्, णिच्, यक्, आय, यङ्, एते द्वादश सनादयः प्रत्ययाः सन्ति। एते सनादयोऽन्ते येषां ते सनाद्यन्ताः समुदायाः "सनाद्यन्ता धातवः" इत्यनेन सूत्रेण धातुसंज्ञका भवन्ति।

# दशमः पाठः

# दर्शनपरिचयः

दृश्यते अनेन इति दर्शनम्, दृश्यते यथार्थतया ज्ञायते, अवगम्यते वा पदार्थतत्त्वमनधिगत-विषयोऽपूर्वो वा अनेन तद् दर्शनम्। एवं हि करणेऽर्थे ल्युट् प्रत्यये तत्त्वज्ञानस्य साधनभूतं दर्शनशास्त्रं भवति। दर्शनम् इति शब्दे दृशि धातुः केवलं चाक्षुषज्ञानविषयकं न अपितु सामान्य-ज्ञानार्थेऽपि प्रयुज्यते, अस्य सामान्यज्ञानार्थे प्रयोगः "अदर्शनं लोपः" इत्यस्मिन् सूत्रे पाणिनिः स्वीकृतवान्, अतः बाह्यपदार्थानां चाक्षुष-घ्राणज-रासन-श्रौत्र-त्वाच-मानसादिसर्वविधज्ञानाय आत्मतत्त्वबोधाय च साधनभूतः पन्था विचारधारा दर्शनम् इति ज्ञायते। यदि दर्शनपदस्य सङ्क्षेपार्थः क्रियते चेत् प्रमाणप्रमेयविचारकं शास्त्रं दर्शनम्। तार्किकानां वैविध्यात् दर्शनानामपि वैविध्यं दरीदृश्यते। भारतीयदर्शने भेदद्वयं स्वीकृतम्। यथा -




## आस्तिकदर्शनम्

वेदेषु विश्वसन्ति ये ते आस्तिकाः तेषां दर्शनम् आस्तिकदर्शनम्, एतेषु आस्तिकदर्शनेषु षड्-दर्शनानि भारतीयसंस्कृतेः स्तम्भभूतानि सन्ति, ये वेदमनुकुर्वन्ति- यथोक्तम् -

**वेद-प्रमाणाकानीह, प्रोच्युर्ये दर्शनानि षट्।**

**न्यायवैशेषिकादीनि, स्मृतास्ते आस्तिकाभिधाः॥**

तेषु प्रथमं तावत् **सांख्यदर्शनम् -**

अस्य दर्शनस्य प्रवर्तकः महर्षिः कपिलः, दर्शनेऽस्मिन् ईश्वरस्योल्लेखो नास्ति। चेतनतत्त्वरूपेण पुरुष एव प्रतिष्ठितः, यत् प्रतिशरीरभिन्नमनेकः, नित्यः, निर्गुणः इष्टा साक्षी, चास्ति।

**आधारग्रन्थः** - सांख्यसूत्रम्

**प्रकरणग्रन्थः** - सांख्यकारिका

**पदार्थाः** - पुरुषः, प्रकृतिः, महद्, अहङ्कारः, एकादशेन्द्रियाणि (पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनश्च), पञ्चतन्मात्राणि, पञ्चमहाभूतानि। (पञ्चविंशतिः तत्त्वानि)

**प्रमाणानि** - प्रत्यक्षम्, अनुमानम्, शब्दश्च।

**सृष्टि-प्रक्रिया** - अत्र प्रकृतिपुरुषयोः संयोगात् सृष्टिः।

**प्रकृतेर्महांस्ततोऽहङ्कारः तस्माद्गणश्च षोडशकः।**
**तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥**

**मोक्षः/कैवल्यम्** - **सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ।**
**तिष्ठति संस्कारवशात् चक्रभ्रमिवद् धृतशरीरः॥**

## योगदर्शनम्

अस्य दर्शनस्य प्रवर्तकः महर्षिः पतञ्जलिः। क्लेश-कर्म-विपाकाशयैः अपरामृष्टः पुरुषविशेषः ईश्वरः। पुरुष एव प्रतिशरीरे चैतन्यशक्तिः। परिणामवादः सत्कार्यवादश्च सिद्धान्तौ द्वौ वर्तेते। आधारग्रन्थः - योगसूत्रम्

'योगश्चित्तवृत्तिनिरोधः' इति योगदर्शनस्य प्रथमं सूत्रम्। तत्र 'प्रमाणविपर्ययविकल्पनिद्रास्मृतयः' पञ्च वृत्तयः।

**प्रमाणम्** - प्रत्यक्षानुमानागमाः प्रमाणानि।

**विपर्ययः** - विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठितम्।

**विकल्पः** - शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः।

**निद्रा** - अभावप्रत्ययालम्बनावृत्तिर्निद्रा।

**स्मृतिः** - अनुभूतविषयासम्प्रमोषः स्मृतिः।

**निरोधः** - अभ्यासवैराग्याभ्यां तन्निरोधः।

**अभ्यासः** - तत्र स्थितौ यत्नोऽभ्यासः।

योगाभ्यासबलेन तु शारीरिकः मानसिकः बौद्धिकः त्रिविधः स्वास्थ्यलाभपूर्वकं विविध-सिद्धयः प्राप्यन्ते। चित्तवृत्ति-निरोधाख्यस्य योगस्य यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिरूपाणि अष्टौ अङ्गानि भवन्ति। यथा -

**१. यमः** - अहिंसासत्याऽस्तेयब्रह्मचर्यापरिग्रहाः यमाः।

(क) **अहिंसा** - अहिंसा-प्रतिष्ठायां तत्सन्निधौ वैरत्यागः।

(ख) **सत्यम्** - सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्।

(ग) **अस्तेयम्** - अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्।

(घ) **ब्रह्मचर्यम्** - ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः।

(ङ) **अपरिग्रहः** - अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः।

२. **नियमः** - शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।

(क) **शौचम्** - शौचात्स्वङ्गजुगुप्सा परैरसंसर्गः।

(ख) **सन्तोषः** - सन्तोषादनुत्तमसुखलाभः।

(ग) **तपः** - कार्येन्द्रियसिद्धिरशुद्धिक्षयात्तपसः।

(घ) **स्वाध्यायः** - स्वाध्यायादिष्टदेवतासम्प्रयोगः।

(ङ) **ईश्वरप्रणिधानम्** - समाधिसिद्धिरीश्वरप्रणिधानात्।

३. **आसनम्** - स्थिरसुखमासनम्।

४. **प्राणायामः** - तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः।

५. **प्रत्याहारः** - स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः।

६. **धारणा** - देशबन्धश्चित्तस्य धारणा।

७. **ध्यानम्** - तत्र प्रत्ययैकतानता ध्यानम्।

८. **समाधिः** - तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।

**पदार्थाः** - ईश्वरः, पुरुषः, प्रकृतिः, महत्, अहङ्कारः, एकादशेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चमहाभूतानि। (षड्विंशतिः तत्त्वानि)

**प्रमाणानि** - प्रत्यक्षम्, अनुमानम्, आगमश्च (शब्दः)।

**सृष्टिप्रक्रिया** - ईश्वरेच्छया प्रकृति-पुरुष-संयोगात् सृष्टिः।
प्रकृतेर्महांस्ततोऽहङ्कारः तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥

**मोक्षः/कैवल्यम्** - समाधिलाभेन विवेकज्ञानेन वा कर्मक्षयपूर्वकं चित्तवृत्ति-निरोधात् मोक्षप्राप्तिः। तद्वैराग्यादपि दोष-बीजक्षये कैवल्यम्/मोक्षः।

## न्यायदर्शनम्

दर्शनस्यास्य प्रवर्तकः महर्षिः गौतमः। ज्ञानाधिकरणमात्मा। तद्विविधम् - जीवात्मा, परमात्मा च। ईश्वरः सृष्टिकर्ता नित्यः सर्वज्ञः कर्मफलप्रदाता। अस्य दर्शनस्याधारभूतग्रन्थः - न्यायदर्शनम्, न्यायसूत्रम् (गौतमाचार्यप्रणीतम्)।

**आधारग्रन्थः** - न्यायसूत्रम्

**प्रकरणग्रन्थः** - तर्कभाषा

**पदार्थाः** - प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थाननामानः।

**प्रमाणानि** - प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः।

**सृष्टिप्रक्रिया** - अत्र ईश्वरेच्छया क्रियाशीलस्य परमाणुतत्त्वस्य परस्परसंयोगात् सृष्टिः। संयोगस्य नाशः विनाशः।

**मोक्षः/कैवल्यम्** - प्रमाणप्रमेयसंशयादितत्त्वज्ञानान्निःश्रेयसाधिगमः। सत्कर्मानुष्ठानैः ज्ञानाज्ञानविरहितस्य जडीभूतस्य आत्मतत्त्वस्य अवस्थाविशेषः मोक्षः/कैवल्यम्।

## वैशेषिकदर्शनम्

अस्य दर्शनस्य प्रवर्तकः महर्षिः कणादः/उलूकः। वैशेषिकदर्शनसूत्राणि आधारग्रन्थः, तर्कसंग्रहः प्रकरणग्रन्थः। ज्ञानाधिकरणमात्मा। तद्विविधः जीवात्मा परमात्मा च ईश्वरः नित्यः सर्वज्ञः सृष्टिकर्ता कर्मफलप्रदातास्ति; विशेषपदार्थस्य स्वीकरणाद्वैशेषिकः इति नाम्ना प्रसिद्धः -

**आधारग्रन्थः** - वैशेषिकदर्शनसूत्रम्

**प्रकरणग्रन्थः** - तर्कसंग्रहः

**पदार्थाः** - द्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, समवायः, अभावः।

**प्रमाणानि** - प्रत्यक्षम्, अनुमानम्।

**सृष्टिप्रक्रिया** - दर्शनेऽस्मिन् ईश्वरेच्छया क्रियाशीलस्य परमाणुतत्त्वस्य परस्पर-संयोगात् सृष्टिः। संयोगनाशः विनाशः।

**मोक्षः/कैवल्यम्** - सत्कर्मानुष्ठानैः ज्ञानाज्ञानविरहितस्य जडीभूतस्य आत्मतत्त्वस्य अवस्थाविशेष एव मोक्षः।

## मीमांशादर्शनम् (कर्ममीमांसा/पूर्वमीमांसा)

अस्य दर्शनस्य प्रवर्तकः महर्षि जैमिनिः। चोदनालक्षणोऽर्थो धर्मः। वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः। मीमांसासूत्राणि। द्वादशलक्षणी इत्याधारग्रन्थः। मीमांसादर्शनमेव पूर्वमीमांसा इत्यभिधीयते। उत्तरमीमांसा वेदान्तदर्शनत्वेन प्रसिद्धा। पूर्वमीमांसा यज्ञविषयं प्रतिपादयति। अतः वैदिककर्मकाण्डविधिषु दृश्यमानविरोधपरिहारो मीमांसाशास्त्रस्य सर्वप्रधानम् उद्देश्यम्। अत्र यज्ञानां सविस्तरं विवेचनं निर्दिष्टमस्ति। आचार्यजैमिनिमतानुसारं यज्ञा एव पुण्यापुण्यद्वारेण अनुपूर्वेण फलजनका भवन्ति।

**आधारग्रन्थः** - द्वादशलक्षणी।

**प्रकरणग्रन्थः** - अर्थसंग्रहः, मीमांसापरिभाषा।

**पदार्थाः** - ब्रह्म, अज्ञानमविद्या, माया, अदृष्टं च।

**प्रमाणानि** - प्रत्यक्षम्, अनुमानम्, उपमानम्, अभावः, अर्थापत्तिः, शब्दः च।

**सृष्टिप्रक्रिया** - अदृष्टवशात् शुभाशुभकर्मानुसारेण जन्म-मृत्यु-बन्ध-मोक्षादयः सम्भवन्ति।

**मोक्षः/कैवल्यम्** - बन्ध-मोक्षादिकं-सर्वमदृष्टवशात् एव संभवति। तस्य निर्देशकः नियोजकश्च वेद एव।

**धर्मलक्षणम्** - यागादिरेव धर्मः। तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म इति। प्रयोजने अतिव्याप्तिवारणाय प्रयोजनवद् इति। भोजनादौ अतिव्याप्तिवारणाय वेदप्रतिपाद्यः इति। अनर्थफलकत्वात् अनर्थभूते श्येनादौ अतिव्याप्तिवारणार्थः इति।

**वेदलक्षणं विभागश्च** - अथ को वेदः इति चेदुच्यते - अपौरुषेयं वाक्यं वेदः। स च विधि-मन्त्र-नामधेय-निषेध-अर्थवादभेदात् पञ्चविधः।

## वेदान्तदर्शनम्

दर्शनस्यास्य प्रवर्तकः कृष्णद्वैपायनः बादरायणः। अध्यासः विवर्तवादः अनिर्वचनीयख्यातिर्वा सिद्धान्तः। जीव-ईश्वरब्रह्मभेदेन त्रिविधं चैतन्यमल्पज्ञ-सर्वज्ञ-तुरीयश्च।

**आधारभूतग्रन्थः** - वेदान्तदर्शनम् (ब्रह्मसूत्राणि/बादरायणसूत्राणि)।

**प्रकरणग्रन्थः** - वेदान्तसारः।

**पदार्थाः** - ब्रह्म, अज्ञानमविद्याऽध्यासः माया वा।

**प्रमाणानि** - प्रत्यक्षम्, अनुमानम्, उपमानम्, अभावः अर्थापत्तिः शब्दः।

**सृष्टिप्रक्रिया** - जगदिदं ब्रह्मणः विवर्त एव अज्ञानोपहितचैतन्य एव विविधरूपेणावभासते, यथा असर्पभूतायां रज्जौ सर्पप्रतीतिः। सृष्टिस्तु ईश्वर-विलासमात्रम्।

**मोक्षः** - आत्मज्ञानेन अहं ब्रह्मास्मि इत्यनुभूतिरेव मोक्षः अथवा जीवात्मपरमात्मनोः भेदाभावरूपः अंशांशी भावज्ञानमेव मोक्षः, अयमात्मा ब्रह्म इति प्रतीतिरेव मोक्षः।

## नास्तिकदर्शनानि

वेदस्य प्रामाण्यं नाङ्गीकुर्वन्ति यानि दर्शनानि तानि नास्तिकदर्शनानीत्युच्यन्ते ते च यथा -

**चार्वाकदर्शनम्** - दर्शनस्यास्य प्रवर्तकः चार्वाकः विद्यते, नास्तिकशिरोमणिः दर्शनमिदं चार्वाकमित्युच्यते। लोकायतमिति अस्य दर्शनस्य नामान्तरम्, ईश्वरस्य आत्मतत्त्वस्य वा पृथक् सत्ता नास्ति इत्यवधारणम्।

**जैनदर्शनम्** - ऋषभदेवः अस्य दर्शनस्य प्रवर्तकः। वेदेश्वरयोः अङ्गीकारः प्रामाण्यं वा नास्ति। जिना एव परमात्मस्वरूपाः, स्याद्वादः अस्य प्रमुखः सिद्धान्तः।

**बौद्धदर्शनम्** - शाक्यमुनिः गौतमबुद्धः अस्य दर्शनस्य प्रवर्तकः। नास्तिकदर्शनेष्व-न्यतमम् इदं दर्शनम्। सौत्रान्तिक-वैभाषिक-योगाचार-माध्यमिकाः, इति अस्मिन् अवान्तर-भेदाः। असत्कार्य-वादार्यसत्ये प्रमुखसिद्धान्तौ वर्तेते।

भारतीय दर्शनचिन्तनपरम्परायां नानाविधानां चिन्तकानां वैविध्याद् विविधदर्शनानां स्थानं वरीवर्ति सर्वविधचिन्तनपरोऽन्तर्दृष्टियुक्तः निगूढतत्त्व-युक्तस्सन् सर्वपन्थानुयायिसमलङ्कृत-दर्शनकारणाद् अस्माकं भारतदेशः विश्वगुरुरिति नाम्ना ख्यापयाञ्चकार।

## अभ्यासः

**१. एकपदेन उत्तरं विलिखत -**

(क) भारतीयदर्शनस्य कति भेदाः सन्ति ?

(ख) प्रत्यक्षानुमानशब्दाः कस्य दर्शनस्य प्रमाणानि ?

(ग) 'संयोगस्य नाशः' विनाशः इति कस्य दर्शनस्य सिद्धान्तः ?

(घ) वेदेषु विश्वसन्ति ते के ?

(ङ) "चोदनालक्षणोऽर्थो धर्मः" इति कस्य दर्शनस्य धर्मलक्षणम् ?

(च) 'अयमात्मा ब्रह्म इति प्रतीतिरेव मोक्षः' कस्य दर्शनस्य विषयोऽयम् ?

## २. अधोल्लिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत -

(क) सांख्यदर्शनस्य प्रवर्तकः कः ?

(ख) योगदर्शनस्य प्रथमं सूत्रं किम् ?

(ग) योगस्य कति अङ्गानि सन्ति ?

(घ) महर्षिः गौतमः कस्य दर्शनस्य प्रवर्तकः ?

(ङ) द्वादशलक्षणी कस्य दर्शनस्य ग्रन्थः वर्तते ?

(च) 'चार्वाकदर्शनम्' आस्तिकनास्तिकयोः कुत्र परिगण्यते ?

## ३. ग्रन्थकर्तृकयोः मेलनं कुरुत -

| | |
|---|---|
| (क) सांख्यदर्शनम् | महर्षिकणादः |
| (ख) योगदर्शनम् | महर्षिः जैमिनिः |
| (ग) न्यायसूत्रम् | ऋषभदेवः |
| (घ) वैशेषिकसूत्राणि | शाक्यमुनिः गौतमबुद्धः |
| (ङ) ब्रह्मसूत्राणि | चार्वाकः |
| (च) जैनदर्शनम् | महर्षिगौतमः |
| (छ) बौद्धदर्शनम् | महर्षिपतञ्जलिः |
| (ज) चार्वाकदर्शनम् | महर्षिकपिलः |

## ४. रिक्तस्थानानि भरत -

(क) अवगम्यते पदार्थतत्त्वमनधिगत ........................ दर्शनम्।

(ख) चाक्षुष-घ्राणज-रासन-श्रौत्र ........................ विचारधारादर्शनम्।

(ग) वेद-प्रमाणकानीह ........................।
........................ अस्तिकाभिधाः॥

(घ) प्रकृतेर्महांस्ततो ........................ षोडशकः।
........................ पञ्चभूतानि॥

(ङ) सम्यग्ज्ञानाधिगमाद् ........................ प्राप्तौ।

......................... धृतशरीरः॥

(च) अहिंसा ......................... यमाः।

५. **‘क’ पङ्क्तौ योगस्याष्टौ अङ्गानि ‘ख’ पङ्क्तौ तेषां परिभाषाः सन्ति। तानि समुचितं योजयत।**

| ‘क’ पङ्क्तिः | ‘ख’ पङ्क्तिः |
|---|---|
| (क) यमः | स्वविषयसंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां |
| (ख) नियमः | स्थिरसुखम् |
| (ग) आसनम् | अहिंसासत्याऽस्तेयब्रह्मचर्यापरिग्रहाः |
| (घ) प्राणायामः | शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि |
| (ङ) प्रत्याहारः | तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः |
| (च) धारणा | तत्र प्रत्ययैकतानता |
| (छ) ध्यानम् | देशबन्धश्चित्तस्य |
| (ज) समाधिः | तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव |

६. **अधोलिखितपदानां मूलशब्दं विभक्तिं वचनं लिङ्गञ्च लिखत।**

| पदानि | मूलशब्दः | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|---|
| (क) अनेन | ............... | ............... | ............... | ............... |
| (ख) तेषाम् | ............... | ............... | ............... | ............... |
| (ग) एतेषु | ............... | ............... | ............... | ............... |
| (घ) अस्मिन् | ............... | ............... | ............... | ............... |
| (ङ) योगस्य | ............... | ............... | ............... | ............... |
| (च) प्रमाणानि | ............... | ............... | ............... | ............... |
| (छ) अनुष्ठानैः | ............... | ............... | ............... | ............... |
| (ज) विनाशः | ............... | ............... | ............... | ............... |

७. **अधः प्रदत्तानां पदानां सन्धिविच्छेदपूर्वकं सन्धिसूत्राणि लिखत।**

| | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|
| (क) दर्शनस्यास्य | ---------- + ----------- | ------------------------- |
| (ख) वेदेश्वरयोः | ---------- + ----------- | ------------------------- |
| (ग) विषयोऽपुर्वः | ---------- + ----------- | ------------------------- |
| (घ) अधिगमाद् | ---------- + ----------- | ------------------------- |
| (ङ) प्रत्ययैकतानता | ---------- + ----------- | ------------------------- |
| (च) वेदोपनिषद् | ---------- + ----------- | ------------------------- |
| (छ) वेदैव | ---------- + ----------- | ------------------------- |

८. **अधोलिखितदर्शनानां पदार्थान् लिखत।**

(क) सांख्यदर्शनम् ........................ ..........................

(ख) योगदर्शनम् ........................ ..........................

(ग) न्यायदर्शनम् ........................ ..........................

(घ) वैशेषिकदर्शनम् ........................ ..........................

(ङ) मीमांसादर्शनम् ........................ ..........................

(च) वेदान्तदर्शनम् ........................ ..........................

९. **सांख्यदर्शनस्य सृष्टिप्रक्रियाविषयं श्लोकमाध्यमेन लिखत।**

प्रकृतेर्महांस्ततोऽहङ्कारः तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥

१०. **वेदन्तदर्शनस्य मोक्षविषयं संस्कृतभाषया लिखत।**

## योग्यता विस्तारः

१. तत्त्वद्वयं स पुरुषः प्रकृतिर्द्वितीया धत्ते गुणानपि च सत्वरजस्तमांसि
सर्वं जगच्चलति तत्परिणमरूपं तत्सांख्यकारकामेह तं कपिलं नमामि॥

२. चित्तस्य वृत्तिमनुरुध्य सुसाधनाभिर्जीवः समाधिमधिगच्छति यन्मतेन।
गोगास्तथा वसुमिता अधियोगशास्त्रं येनाश्रिता मम पतञ्जलये नमोऽस्मै॥

३. निःश्रेयसाधिगतिरत्र तु षोडशानां ज्ञानात्प्रमाणमिह वेत्ति चतुष्टयं यः।

ईशो जगत्सृजति यस्य मते स्वतन्त्रो न्यायपवर्तकमहामुनये नमोऽस्मै॥

४. भावाः षडेव मुनिना विहितास्तदन्ते चान्योऽप्यभाव इति सप्तपदार्थशास्त्रम्।
सामान्यवर्णनपरोऽपि विशेषरूपोऽसौ नित्यमेव जयति प्रथितः कणादः॥

५. ब्रह्मैव सज्जगदिदं तु विवर्तरूपं मायेशशक्तिरखिलं जगदातनोति।
जीवोऽपि माति पृथगत्र तथैव चैकोऽद्वैताश्रितं खलु नमाम्यथ शङ्करं तम्॥

६. वेदोक्तकर्म सरणिः स तु यागरूपो विध्यर्थवादयुगलं परिलम्बमानः।
धर्मो भवेत्किल ततो जननान्तरेषु कर्मैव सर्वमिति जैमिनये नमोस्तु॥

**मङ्गलाचरणम्**

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।**
**बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः॥**

द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः। तत्र द्रव्याणि - पृथिव्यप्तेजो वाय्वाकाश-काल-दिगात्मा-मनांसि नवैव। रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग-परत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः। उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि। परमपरं चेति द्विविधं सामान्यम्। नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव। समवायस्त्वेक एव। अभावश्चतुर्विधः प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावश्चेति। तत्र गन्धवती पृथिवी। सा द्विधा नित्या अनित्या च। नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा - शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ती। विषयो मृत्पाषाणादिः। शीतस्पर्शवत्य आपः। ता द्विविधाः - नित्या अनित्याश्च। नित्याः परमाणुरूपाः। अनित्याः कार्यरूपाः। पुनस्त्रिविधाः - शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। विषयः सरितसमुद्रादिः। उष्णस्पर्शवत्तेजः। तच्च द्विविधम् - नित्यमनित्यञ्च। नित्यं परमाणुरूपम्, अनित्यं कार्यरूपम्। पुनस्त्रिविधम् - शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयश्चतुर्विधः - भौमदिव्योदरीयाकरजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरुदरीयम्। आकरजं सुवर्णादि। रूपरहितस्पर्शवान् वायुः। स द्विविधः - नित्योऽनित्यश्च। नित्यः परमाणुरूपः, अनित्यः कार्यरूपः। सः पुनस्त्रिविधः - शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक्, सर्वशरीरवर्ति। विषयो

वृक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः, स चैकोऽपि उपाधिभेदात् प्राणाऽपानादिसंज्ञां लभते। शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च। अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च। प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च। ज्ञानाधिकरणमात्मा। स द्विविधः - जीवात्मा परमात्मा च। तत्रेश्वरः सर्वज्ञः। परमात्मा एक एव। जीवस्तु प्रतिशरीरभिन्नो विभुर्नित्यश्च। सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च। चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम्। पृथिवीजलतेजो वृत्तिः। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि। रसनाग्राह्यगुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां षड्विधः। जले मधुर एव। घ्राणग्राह्यो गुणो गन्धः। स द्विविधः - सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः। त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः - शीतोष्णानुष्णशीतभेदात्। पृथिव्यप्तेजो वायुवृत्तिः। तत्र शीतो जले, उष्णस्तेजसि, अनुष्णाऽशीतः पृथिवीवाय्वोः। रूपादिचतुष्टयपृथिव्यां पाकजमनित्यं च। अन्यत्राऽपाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। एकत्वादिव्यवहारहेतुः संख्या। सा नवद्रव्यवृत्ति, एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्राऽनित्यमेव। मानव्यवहारसाधारणं कारणं परिमाणम्। नवद्रव्यवृत्तिः। तच्चतुर्विधम् - अणु, महद्, दीर्घं, ह्रस्वं चेति। पृथग्व्यवहाराऽसाधारणं कारणं पृथक्त्वम्। सर्वद्रव्यवृत्तिः। संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः। संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः। पराऽपरव्यवहाराऽसाधारणकारणे परत्वाऽपरत्वे। पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते द्विविधे - दिक्कृते कालकृते च। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्। आद्यपतनाऽसमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्तिः। आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्तिः। तद्द्विविधं सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकं जले, नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं, तेजसि सुवर्णादौ। श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधः - ध्वन्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः। सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्। सा द्विविधा - स्मृतिरनुभवश्च। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। स द्विविधः - यथार्थोऽयथार्थश्च। तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथा - रजते इदं रजतम् इति ज्ञानम्। सैव प्रमेत्युच्यते। तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा - शुक्तौ इदं रजतम् इति ज्ञानम्। सैवाऽप्रमेत्युच्यते। यथार्थोऽनुभवश्चतुर्विधः - प्रत्यक्षाऽनुमित्युपमितिशाब्दभेदात्। तत्करणमपि

चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात्। असाधारणं कारणं करणम्। कार्यनियतपूर्ववृत्तिः कारणम्। कार्यं प्रागभावप्रतियोगि। कारणं त्रिविधम् - समवाय्यसमवायिनिमित्तभेदात्। यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा - तन्तवः पटस्य, पटश्च स्वगतरूपादेः। कार्येण कारणेन वा सैकस्मिन्नर्थे समवेतं यत्कारणं समवायिकारणम्। यथा - तन्तुसंयोगः पटस्य, तन्तुरूः पटरूपस्य। तदुभयभिन्नं कारणं निमित्तकारणम्। यथा - तुरीवेमादिकं पटस्य। तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।

# एकादशः पाठः

# संस्कृतकाव्येषु इतिहासः

## राजतरङ्गिणी

### ग्रन्थपरिचयः -

कल्हणविरचिता राजतरङ्गिणी एकः काव्यग्रन्थोऽस्ति। 'राजतरङ्गिणी' इत्यस्य शाब्दिकार्थः भवति 'राज्ञां नदी' इति। अर्थात् 'राज्ञाम् इतिहासः समयप्रवाहो वा' इति। ग्रन्थेऽस्मिन् कश्मीरप्रदेशस्य इतिहासो वर्णितोऽस्ति, यस्य प्रारम्भो महाभारतकालाद् भवति। विद्वांसः अस्य रचनाकालं ११४७ क्रैस्ताब्दतः ११४९ क्रैस्ताब्दस्य मध्ये मन्यन्ते। एतद्ग्रन्थाभिमतं कश्मीरः पुरा कश्यपमेरुः इति नाम्ना ख्यातः आसीत्। कश्यपमेरुः ब्रह्मणः पौत्रः अर्थात् ऋषेः मरीचेः पुत्रः आसीत्। ग्रन्थेऽस्मिन् अष्टौ तरङ्गाः सन्ति श्लोकाश्च आहत्य षड्विंशत्युत्तर-अष्टशतोत्तर-सप्तसहस्रसंख्यकाः (७८२६) सन्ति। तत्र प्रथमे तरङ्गे उक्तमस्ति यत् - सर्वादौ काश्मीरे पाण्डवानां कनिष्ठः भ्राता सहदेवः एकस्य नगरस्य स्थापनम् अकरोत्। तदा तत्र केवलं वैदिकधर्मस्य आचरणं भवति स्म। तस्मादेतद् वक्तुं शक्यते यद् राजतरङ्गिणी कल्हणस्य एका सर्वोत्कृष्टा ऐतिहासिकी कृतिः अस्ति। कल्हणेनापि राजतरङ्गिण्यामुक्तम् - एकस्य इतिहासलेखकस्य वाणी सर्वदा न्यायाधीश इव रागद्वेषविनिर्मुक्ता भवेत्, तदैव तस्याः वाण्याः प्रशंसा भवितुम् अर्हति -

**श्लाघ्यः स एव गुणवान् रागद्वेषबहिष्कृता।**
**भूतार्थकथने यस्य स्थेयस्येव सरस्वती॥**

ऐतिहासिककविषु अन्यतमः कविः आसीत् कल्हणः।

### कविपरिचयः -

कल्हणः काश्मीरस्य महाराजस्य हर्षदेवस्य महामात्यचम्पकस्य पुत्रः आसीत्। अस्य जन्ममृत्यु च अज्ञातौ स्तः। संस्कृतभाषायां यावन्तः विपश्चितः इतिहासलेखनाय प्रयत्तवन्तः तेषु कल्हणः प्रमुखः आसीत्।

प्रस्तुतोऽयं पाठ्यांशः कल्हणविरचितराजतरङ्गिण्याः प्रथमात्तरङ्गादुद्धृतोऽस्ति।

**पुरा सतीसरः कल्पारम्भात्प्रभृति भूरभूत्।**
**कुक्षौ हिमाद्रेरर्णोभिः पूर्णा मन्वन्तराणि षट्॥२५॥**

**अन्वयः –** पुरा कल्पारम्भात्प्रभृति षट् मन्वन्तराणि हिमाद्रेः कुक्षौ अर्णोभिः पूर्णा सतीसरः भूः अभूत्।

**भावार्थः –** प्राचीनकाले कल्पस्यारम्भात् षड् मन्वन्तराणि पर्यन्तं हिमालयस्य अन्तः जलेन परिपूर्णः सतिसरोनामकः कश्चन महान् सरोवरः आसीत्।

**अथ वैवस्वतीयेऽस्मिन् प्राप्ते मन्वन्तरे सुरान्।**
**द्रुहिणोपेन्द्ररुद्रादीनवतार्य प्रजासृजा॥२६॥**

**अन्वयः –** अथ अस्मिन् वैवस्वतीये मन्वन्तरे प्राप्ते द्रुहिणोपेन्द्ररुद्रादीन् सुरान् अवतार्य प्रजासृजा।

**भावार्थः –** तदनन्तरम् वैवस्वतनामके सप्तमे मन्वन्तरे ब्रह्मविष्णुमहेश्वरादिभिः देवताभिः प्रजासृजा।

**कश्यपेन तदन्तःस्थं घातयित्वा जलोद्भवम्।**
**निर्ममे तत्सरोभूमौ कश्मीरा इति मण्डलम्॥२७॥**

**अन्वयः –** कश्यपेन तदन्तःस्थं जलोद्भवं घातयित्वा तत्सरभूमौ कश्मीरा इति मण्डलं निर्ममे।

**भावार्थः –** महर्षिः कश्यपः तं सरोवरम् अधिवसन्तं जलोद्भवनामकम् असुरं मारयित्वा तत्सरसः भूमौ काश्मीरः इति मण्डलं निर्मितवान्।

**उद्यद्वैतस्तनिः स्यन्ददण्डकुण्डातपत्रिणा।**
**यत्सर्वनागाधीशेन नीलेन परिपाल्यते॥२८॥**

**अन्वयः –** यत् उद्यद्वैतस्तनिः स्यन्ददण्डकुण्डातपत्रिणा सर्वनागाधीशेन नीलेन परिपाल्यते।

**भावार्थः –** वितस्तायाः नद्याः धारारूपं दण्डं तथा कुण्डरूपम् आतपत्रं (छत्रम्) धारितवान् सर्वनागानां राजा नीलनागः अस्य मण्डलस्य परिपालनं करोति।

**गुहोन्मुखी नागमुखापीतभूरिपया रुचिम्।**
**गौरी यत्र वितस्तात्वं याताप्युज्झति नोचिताम्॥२९॥**

**अन्वयः –** यत्र गुहोन्मुखी नागमुखापीतभूरिपया गौरी वितस्तात्वं याता अपि उचितां रुचिं न उज्झति।

**भावार्थः –** कार्तिकेयस्य आश्रयदात्री गणेशस्य दुग्धपायिका गुहाश्रयत्वात् गुहाश्रिता एवं सर्पाणां जलपानत्वात् नागपीतपया वितस्तारूपधारिणी पार्वती स्वौचित्यं न

अत्यजत्। यथा पार्वत्यां गुहाश्रितत्वं नागपीतपयस्त्वञ्च इति धर्मद्वयं विद्यते तथैव वितस्तायां नद्यामपि उक्तं धर्मद्वयं विद्यते।

**शङ्खपद्ममुखैर्नागैर्नानारत्नावभासिभिः।**
**नगरं धनदस्येव निधिभिर्यन्निषेव्यते॥३०॥**

**यत्तार्क्ष्यभीत्या प्राप्तानां नागानां गुप्तये ध्रुवम्।**
**प्रसारितभुजं पृष्ठे शैलप्राकारलीलया॥३१॥**

**अन्वयः –** शङ्खपद्ममुखैर्नागैर्नानारत्नावभासिभिः धनदस्येव यत् नगरं निधिभिः निषेव्यते। यत्तार्क्ष्यभीत्या प्राप्तानां नागानां गुप्तये शैलप्राकारलीलया पृष्ठे ध्रुवं प्रसारितभुजम्।

**भावार्थः –** शङ्खपद्ममुखैः विविधरत्नमयाभूषणैः आभूषितैः नागैः युक्तेन कुबेरस्य नगरेण सदृशं काश्मीरमण्डलमिदं विविधनिधिभिः परिपूर्णपर्वत इव प्राकाररूपं भुजद्वयम् उन्नीय वैनतेयात् (गरुडात्) भीत्या शरणागतानां सर्पाणां प्राणरक्षार्थं सर्वदा उद्युक्तं भवति।

**भुक्तिमुक्तिफलप्राप्तिः काष्ठरूपमुमापतिम्।**
**पापसूदनतीर्थान्तर्यत्र संस्पृशतां भवेत्॥३२॥**

**अन्वयः –** यत्र पापसूदनतीर्थान्तः काष्ठरूपमुमापतिं संस्पृशतां भुक्तिमुक्तिफलप्राप्तिः भवेत्।

**भावार्थः –** अत्र पापसूदनतीर्थे विराजमानस्य काष्ठरूपधारिणः उमामहेश्वरस्य दर्शनेन स्पर्शनेन च मनुष्याणां भोगफलप्राप्तिः मोक्षफलप्राप्तिः च जायते।

**सन्ध्यादेवी जलं यस्मिन् धत्ते निःसलिले गिरौ।**
**दर्शनं पुण्यपापानामन्वयव्यतिरेकयोः॥३३॥**

**अन्वयः –** सन्ध्यादेवी यस्मिन् निःसलिले गिरौ जलं धत्ते पुण्यपापानां दर्शनम् अन्वयव्यतिरेकयोः।

**भावार्थः –** सन्ध्यादेवी इह निर्जले पर्वते पापपुण्ययोः निर्णयं जलेन करोति। अर्थात् अत्र पुण्यकर्माणः जलं प्राप्नुवन्ति, पापास्तु जलं न लभन्ते।

**स्वयंभूर्यत्र हुतभुग्भुवो गर्भात्समुन्मिषन्।**
**जुह्वतां प्रतिगृह्णाति ज्वालाभुजवनैर्हविः॥३४॥**

**अन्वयः –** यत्र भुवः गर्भात् स्वयंभूः हुतभुक् समुन्मिषन् ज्वालाभुजवनैः जुह्वतां हविः प्रतिगृह्णाति।

**भावार्थः –** इह पृथिव्याः गर्भात् स्वतः उच्चरन् अग्निः होत्रर्पितं हविः ज्वालारूपाभ्यां हस्ताभ्यां प्रतिगृह्णाति।

**देवी भेडगिरेः श्रृङ्गे गङ्गोद्भेदशुचौ स्वयम्।**
**सरोऽन्तर्दृश्यते यत्र हंसरूपा सरस्वती॥३५॥**

**अन्वयः –** गङ्गोद्भेदशुचौ भेडगिरेः श्रृङ्गे सरोऽन्तः, यत्र हंसरूपा स्वयं सरस्वती देवी दृश्यते।

**भावार्थः –** गङ्गाप्रवाहेण पवित्रे भेदपर्वतस्य सरोवरे हंसरूपधारिणी सरस्वती स्वयं दृश्यते।

**नन्दिक्षेत्रे हरावासप्रासादे द्युचरार्पिताः।**
**अद्यापि यत्र व्यज्यन्ते पूजाचन्दनबिन्दवः॥३६॥**

**अन्वयः –** नन्दिक्षेत्रे हरावासप्रासादे यत्र अद्यापि द्युचरार्पिताः पूजाचन्दनबिन्दवः व्यज्यन्ते।

**भावार्थः –** यत्र नन्दिक्षेत्रे शिवालये देवाः पूजानिमित्तं चन्दनबिन्दून् अर्पितवन्तः तैः अर्पिताः चन्दनबिन्दवः अद्यापि अत्र दृश्यन्ते।

**आलोक्य शारदां देवीं यत्र सम्प्राप्यते क्षणात्।**
**तरङ्गिणी मधुमती वाणी च कविसेविता॥३७॥**

**अन्वयः –** देवीं शारदाम् आलोक्य यत्र कविसेविता तरङ्गिणी मधुमती वाणी च क्षणात् संप्राप्यते॥

**भावार्थः –** अत्र देव्याः सरस्वत्याः दर्शनमात्रेण कविभिः परिवेषिता मधुरवाणी तथा अस्मिन् मनोरमे स्थाने प्रवहमाणा मधुमती नदी, उभयोः प्राप्तिर्भवति।

**चक्रभृद्विजयेशादिकेशवेशावभूषिते।**
**तिलांशोपि न यत्रास्ति पृथ्व्यास्तीर्थैर्बहिष्कृतः॥३८॥**

**अन्वयः –** यत्र चक्रभृद्विजयेशादिकेशवेशावभूषिते पृथ्व्याः तीर्थैः बहिष्कृतः तिलांशोऽपि नास्ति।

**भावार्थः –** चक्रधर-विजयेश-केशव-ईशादयैः शुचिभिः देवालयैः आभूषिते कश्मीरमण्डले एकमपि स्थानम् एवं नास्ति यत् तीर्थं नास्ति। अर्थात् मनोरमे कश्मीरप्रदेशेऽस्मिन् सर्वाण्यपि तीर्थस्थलानि सन्ति।

**भुजवनतरुच्छायां येषां निषेव्य महोजसां**
**जलधिरशना मेदिन्यासीदसावकुतोभया।**
**स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं**
**प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे॥४६॥**

**अन्वयः –** भुवनतरुच्छायां येषां महोजसां जलधिरशना निषेव्य असौ मेदिनी अकुतोभया आसीत्। ते क्ष्मापा यदनुग्रहं विना स्मृतमपि न यान्ति, प्रकृतिमहते तस्मै कविकर्मणे नमः कुर्मः।

**भावार्थः –** उदन्वता परिवेष्टिता इयं भूमिः येषां पराक्रमिणां क्षितीशानां भुजवनरूपाणां वृक्षाणां छायायां भीतिरहिता आसीत्, तेषां राज्ञां नामानि येषाम् अनुग्रहेण विना स्मरणं न यान्ति, तेषां महतां कवीनां कृतये प्रणामः।

## शब्दार्थाः

| | |
|---|---|
| मरीचेः | मरीच-ऋषेः |
| रागद्वेषविनिर्मुक्ता | रागद्वेषरहिता |
| अज्ञातौ | ज्ञाते नास्तः |
| कल्पारम्भात् | कल्पस्य आरम्भात् |
| हंसरूपा | हंसरूपधारिणी |
| हरावासप्रासादे | शिवालये |
| द्युचरार्पिताः | देवैः अर्पिताः |
| आलोक्य | दृष्ट्वा |
| सम्प्राप्यते | लभ्यते |
| आभूषिते | सज्जिते |
| क्ष्मापाः | राजानः |
| कुक्षौ | गर्भे, जठरे |
| अर्णोभिः | जलैः |
| सुरान् | देवान् |
| द्रुहिणोपेन्द्ररूद्रादीन् | ब्रह्मविष्णुमहेशादीन् |
| अवतार्य | अवतरणं कारयित्वा |
| प्रजासृजा | प्रजानां सृष्टिकर्त्री |
| निर्ममे | निर्मानं कृतम् |
| उज्झति | त्यजति |

| | |
|---|---|
| पृथ्वी | पृथिवी |
| आश्रयदात्री | आश्रयं या ददाति |
| नागपीतपया | नागान् जलं पायितवती या |
| स्वयंभूः | स्वयम् उत्पद्यते यः |
| हुतभुक् | अग्निः |
| समुन्मिषन् | उद्गच्छन् |
| जुह्वताम् | यागे आहूतिं ददताम् |
| प्रतिगृह्णाति | स्वीकरोति |
| भुवः | भूमेः |
| गर्भात् | जठरात् |

## अभ्यासः

### १. सर्वे प्रश्नाः समाधेयाः -

(क) राजतरङ्गिण्यां कति तरङ्गाः सन्ति?

(ख) राजतरङ्गिण्यनुसारं काश्मीरः किन्नाम्ना ख्यातः आसीत्?

(ग) हिमालयस्य अन्तः विद्यमानस्य सरोवरस्य नाम किमासीत्?

(घ) सरोवरे कः राक्षसः वसति स्म?

(ङ) सर्वनागानां राजा कः?

(च) सन्ध्यादेवी पापपुण्ययोः निर्णयं कथं करोति?

### २. रिक्तस्थानं पूरयत -

(क) कल्पारम्भात्प्रभृति .................................................. ।

(ख) कश्यपेन तदन्तःस्थं घातयित्वा ........................................... ।

(ग) ........................................ पूर्णा सतीसरः भूः अभूत्।

(घ) येषाम् अनुग्रहेण विना .................................... न यान्ति।

(ङ) ............................................ परिवेष्टिता इयं भूमिः।

(च) आलोक्य ........................................ देवीं यत्र सम्प्राप्यते क्षणात्।

### ३. कोष्ठकात् चित्वा रिक्तस्थानं पूरयत -

| मधुमति, छविः, अन्वयव्यतिरेकयोः, पूजाचन्दनबिन्दवः, नोचिताम् |
|---|

(क) पुण्यपापानां दर्शनम् ........................................... ।

(ख) ज्वालाभुजवनैः जुह्वतां .................................... प्रतिगृह्णाति।

(ग) याताप्युज्झति ............................................................ ।

(घ) द्युचरार्पिताः ..................................................... व्यज्यन्ते।

(ङ) तरङ्गिणी ............................................... वाणी च कविसेविता।

### ४. समुचितं मेलयत -

| | |
|---|---|
| (क) कुर्मस्तस्मै नमः | भीत्या |
| (ख) हंसरूपा | सरस्वती |
| (ग) व्यज्यन्ते | कविकर्मणे |
| (घ) नीलेन | परिपाल्यते |
| (ङ) वैनतेयात् | पूजाचन्दनबिन्दवः |

### ५. कोष्ठके प्रदत्तान् शब्दान् चित्वा रिक्तस्थानानि पूरयत -

| कुक्षौ, अवतार्य, प्रजासृजा, घातयित्वा, निर्ममे, परिपाल्यते, जुह्वताम्, निषेव्य, कुर्मः, धत्ते, दर्शनम्, |
|---|

(क) धा + ते ....................।

(ख) प्रजा-सृज् + क्विप् ....................।

(ग) नि-सेव + ल्यप् ....................।

(घ) निर्-मा + त ....................।

(ङ) कृ + मस् ....................।

(च) घाति + क्त्वा ....................।

(छ) हु + शतृ ....................।

(ज) दृश् + ल्युट् ....................।

(झ) परि-पालि + य + ते ....................।

(ञ) कुक्षि + ङि ....................।

(ट) अव-तारि + ल्यप् ....................।

### ६. अधोलिखितपदानां ससूत्रं सन्धिविच्छेदं कुरुत -

| | | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|---|
| (क) | देव्यनुग्रहेणैव | ---------- + ----------- | ------------------------- |
| (क) | कुर्मस्तस्मै | ---------- + ----------- | ------------------------- |
| (ख) | अद्यापि | ---------- + ----------- | ------------------------- |
| (ग) | सरोऽन्तः | ---------- + ----------- | ------------------------- |
| (घ) | हुतभुग्भुवः | ---------- + ----------- | ------------------------- |
| (ङ) | सम्प्राप्यते | ---------- + ----------- | ------------------------- |
| (च) | जलोद्भवम् | ---------- + ----------- | ------------------------- |
| (छ) | नोचिताम् | ---------- + ----------- | ------------------------- |
| (ज) | यातापुज्झति | ---------- + ----------- | ------------------------- |
| (झ) | होत्रर्पितम् | ---------- + ----------- | ------------------------- |
| (ञ) | पृथिव्यास्तीर्थैः | ---------- + ----------- | ------------------------- |

### ७. अधोलिखितानां पदानां विग्रहं प्रदर्श्य समासनाम निर्दिशत -

| | | समासविग्रहः | समासनाम |
|---|---|---|---|
| (क) | प्रजासृजा | ------------------------- | ------------------------- |
| (ख) | द्रुहिणोपेन्द्ररुद्राः | ------------------------- | ------------------------- |
| (ग) | जलोद्भवः | ------------------------- | ------------------------- |
| (घ) | भुक्तिमुक्तिफलप्राप्तिः | ------------------------- | ------------------------- |
| (ङ) | सन्ध्यादेवी | ------------------------- | ------------------------- |

### ८. रेखाङ्कितपदान्याश्रित्य कारकविभक्ती निर्णयत -

(क) आलोक्य <u>शारदां</u> देवीं यत्र संप्राप्यते क्षणात्।

(ख) नागाधीशेन <u>नीलेन</u> परिपाल्यते।

(ग) <u>कुक्षौ</u> हिमाद्रेरर्णोभिः पूर्णा भूरभुत्।

(घ) <u>कविकर्मणे</u> तस्मै नमः।

(ङ) <u>स्मृतिम्</u> अपि न ते यान्ति क्षमापा विना।

९. **प्रयोगपरिवर्तनं कुरुत।**

(क) अग्निः हविः ज्वालारूपाभ्यां हस्ताभ्यां प्रतिगृह्णाति।

(ख) तैः अर्पिताः चन्दनबिन्दवः अद्यापि अत्र दृश्यन्ते।

(ग) अस्मिन् मनोरमे स्थाने प्रवहमाणा मधुमती नदी उभयोः प्राप्तिर्भवति।

(घ) कश्मीरप्रदेशेऽस्मिन् सर्वाण्यपि तीर्थस्थलानि वर्तन्ते।

(ङ) उमामहेश्वरस्य दर्शनेन स्पर्शनेन च मनुष्याणां भोगफलप्राप्तिः मोक्षफलप्राप्तिश्च जायते।

१०. **पञ्चविंशत्या वाक्यैः काश्मीरप्रदेशस्य इतिहासं वर्णयत।**

## योग्यता-विस्तारः

- राजतरङ्गिण्याः लेखकः कल्हणः काश्मीरदेशे आढ्यब्राह्मणवंशे अजायत। अस्य काश्मीरवासित्वे नास्ति लेशतोऽपि संशयः।
- राज्ञः जयसिंहस्य शासनकाले कल्हणः राजतरङ्गिणीं विरचितवान्। जयसिंहस्य शासनकालः ११२० कैस्ताब्दतः ११५९ तमवर्षपर्यन्तम् आसीत्। अतः कल्हणस्य काल ईशवीयद्वादशशतकं वक्तुं शक्यते।

**विजीयते पुण्यबलैर्बलैर्यत्तु न शस्त्रिणाम्।**
**परलोकात्ततो भीतिर्यस्मिन्निवसतां परम्॥ ३९॥**

**अन्वयः –** पुण्यबलैः विजीयते यत्तु न शस्त्रिणां बलैः। परं परलोकात्ततो भीतिर्यस्मिन्निवसताम्।

**भावार्थः –** पुण्यबलेन एवायं प्रदेशः जेतुं शक्यः न तु शस्त्रबलेन। अतः काश्मीरवास्तव्याः परलोकाद् एव बिभ्यति न शत्रुभ्यः। अर्थात् ते शत्रुभ्यः न बिभ्यति, परलोकात् एव बिभ्यति।

# द्वादशः पाठः

## शिशुपालवधम् – प्रथमः सर्गः

संस्कृसाहित्यजगति महाकविमाघस्य महत्त्वपूर्णं स्थानं वर्तते। महाकविमाघकृतस्य शिशुपालवधमहाकाव्यस्य अन्तिमे कविः स्वयमेव स्वस्य परिचयं प्रादात्। तत एव ज्ञायते यत् दत्तक इति कश्चन माघस्य पितृदेव आसीत्। तस्य पितामहः सुप्रभदेवः वर्मलताख्यस्य राज्ञः अमात्यपदम् अलमकरोत्।

पुरा मीनमल्लाख्यम् एकं नगरं वर्तते। तद् विद्यायाः पीठम् इति प्रथितम् आसीत्। माघस्य जन्म प्रथिते मीनमल्लाख्यनगरे अभवत्। मेरुतुङ्गाचार्यस्य मतेन श्रीमल्लनगरम् आसीत् माघस्य निवासस्थलम्। इदानीन्तने काले गुर्जरप्रदेशे मीनमल्ल इति ग्राम एव कवेः स्थलमिति अनेके मन्यन्ते।

'शिशुपालवधम्' इति माघस्य एका एव कृतिः प्राप्यते। शिशुपालवधमहाकाव्ये विशंतिः सर्गाः, १६२५ श्लोकाश्च सन्ति। महाभारतोक्तां कथां वर्णनमाहात्म्येन चमत्कारिणीं विहितवान्। प्रस्तुते पाठ्यांशे शिशुपालवधमहाकाव्यस्य प्रथमसर्गात् केचन श्लोकाः सङ्गृहीतास्सन्ति।

**श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।**
**वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः॥१॥**

**अन्वयः -** श्रियः पतिः जगन्निवासः जगत् शासितुं श्रीमति वसुदेवसद्मनि वसन् हरिः अम्बरात् अवतरन्तं हिरण्यगर्भाङ्गभुवं मुनिं ददर्श।

**भावार्थः -** लक्ष्म्याः पतिः निखिलजगतः आधारभूतः भगवान् श्रीकृष्णः जगतः नियमनाय श्रीसम्पन्नवसुदेववेश्मनि निवसन् आकाशाद् अवतरन्तं ब्रह्मणः सुतं नारदमुनिम् अपश्यत्।

**गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।**
**पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः॥२॥**

**अन्वयः -** अनूरुसारथेः गतं तिरश्चीनं हविर्भुजः ऊर्ध्वज्वलनं प्रसिद्धं सर्वतः विसारि (इदम्) धाम अधः पतति एतत् किम् इति जनैः आकुलम् (यथा स्यात् तथा) ईक्षितम्।

**भावार्थः -** सूर्यस्य गतिः सर्वदा तिर्यग् भवति। एवम् अग्निः सदा उपरि एव गच्छति इति तु प्रसिद्धम्। अयं परितः विस्तृतः कीदृशः प्रकाशः, यः उपरिष्टादधः प्रकाशयति। इत्थं विस्मयापन्नैर्जनैः नारदः अदृश्यत।

**चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।**
**विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः॥ ३॥**

**अन्वयः -** विभुः सः पुरा त्विषां चयः इति अवधारितम्, ततः विभाविताकृतिं शरीरी इति (अवधारितम्) विभक्तावयवं पुमान् इति (अवधारितम्) अमुं क्रमात् नारद इति अबोधि।

**भावार्थः -** सर्वविद् भगवान् श्रीकृष्ण आदौ आकाशादवतरन्तं नारदं तेजसमूहमचिन्तयत्। ततः किञ्चित् अन्तिकमापन्ने सति हस्तपादयुतामाकृतिमवलोक्य एष कश्चित् देही इति अवागमत्। अनन्तरमतीवसन्निकटे आगते सति मस्तकहस्तपादादीनां पृथक् पृथग् दर्शनेन एष कश्चित् पुरुष इति स्पष्टमबुध्यत।

**नवानधोऽधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।**
**क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना॥ ४॥**

**अन्वयः -** नवान् बृहतः पयोधरान् अधोऽधः (स्थितम्) समूढकर्पूरपरागपाण्डुरं क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना भूतिसितेन शम्भुना स्फुटोपमम् (अमुं नारद इत्यबोधि)।

**भावार्थः -** बृहतां नूतनानां मेघानामधः कर्पूरचूर्णमिव अत्यन्तं गौरवर्णोऽयं नारदमुनिः दृष्टः। क्षणं ताण्डवकाले गजचर्मपरिधाता तथा श्वेतभस्मलेपगात्रः शिव इव नारदमुनिरालोकितः।

**दधानमम्भोरुहकेसरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम्।**
**विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रततीततीरिव॥ ५॥**

**अन्वयः -** अम्भोरुहकेशद्यूतिः जटाः दधानं शरच्चन्द्रमरीचिरोचिषं (अत एव) विपाकपिङ्गाः तुहिनस्थलीरुहः व्रततीततीः (दधानम्) धराधरेन्द्रम् इव।

**भावार्थः -** पद्मकिञ्जल्का इव कान्तिमतीर्जटाः धारयन्तम्, शरदृतोः चन्द्रमसः रश्मिरिव, तथा तुषारभूमिरुहः पुरातनपिङ्गललतावलयधारयिता हिमालय इव नारदमुनिः ईक्षितः।

**पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युतिः।**
**सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम्॥ ६॥**

**अन्वयः -** पिशङ्गमौञ्जीयुजम् अर्जुनच्छविम् अञ्जनद्युतिः एणाजिनं वसानं (अत एव) सुवर्णसूत्राकलिता धराम्बरां शितिवाससः तनुं विडम्बयन्तम्।

**भावार्थः -** मौञ्ज्या मेखलयाऽबद्धं कृष्णसारमृगचर्म्म धारयन्, अत एव स्वर्णमेखलयाऽबद्धं नीलाम्बरवसनं गगनादवतरन्तं तं जनं बलराममनुकुर्वन्तं श्रीकृष्णः नारद इत्यबोधि।

> **विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभिः।**
> **कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनान्ते तडितां गणैरिव॥७॥**

**अन्वयः -** विहङ्गराजाङ्गरुहैः इव आयतैः हिरण्मयोर्वीरुवल्लितन्तुभिः कृतोपवितं हिमशुभ्रं (अत एव) घनान्ते तडितां गणैः (उपलक्षितम्) उच्चकैः धनम् इव।

**भावार्थः -** गरुडलोमवल्लम्बायमानैः सुवर्णवर्णतन्तुभिः रचितं यज्ञोपवितं धारयन्तं हिमवच्छुभ्रं शरत्काले विद्युज्जालाभूषितमेघस्य शोभां परिदधानं गगनादवतरन्तं तं जनं श्रीकृष्णः नारद इत्यबोधि।

> **निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद्बिसच्छेदसिताङ्गसङ्गिना।**
> **चकासतं चारुचमूरुचर्मणा कुथेन नागेन्द्रमिवेन्द्रवाहनम्॥८॥**

**अन्वयः -** निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद् बिसच्छेदसिताङ्गसङ्गिना चारुचमूरुचर्मणा कुथेन इन्द्रवाहनं नागेन्द्रम् इव चकासतम्।

**भावार्थः -** प्राकृतिकचित्रोज्ज्वलसूक्ष्मपक्ष्मयुक्तेन नारदस्य शोभायमानमृणालखण्डवत् शुभ्रेऽङ्गे धारितेन सुन्दरमृगचर्म्मणा पृष्ठास्तरणेनाच्छादितमैरावतमिव शोभमानं तमाकाशादवतरन्तं जनं श्रीवासुदेवो नारद इत्यबोधि।

> **अजस्रमास्फालितवल्लकीगुणक्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया।**
> **पुरःप्रवालैरिव पूरितार्धया विभान्तमच्छस्फटिकाक्षमालया॥९॥**

**अन्वयः -** अजस्रम् आस्फालितवल्लकीगुणक्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया पुरः प्रवालैः पूरितार्धया इव अच्छस्फटिकाक्षमालया विभान्तम्।

**भावार्थः -** नारदस्य हस्ते या स्वच्छस्फटिकगुटिका निर्मिता जपमाला सा सर्वदा वीणावादने तन्त्रीसङ्घर्षणोत्पन्नघनीभूताङ्गुष्ठनखकान्त्या प्रवालपूरितार्धा इव शोभमानं गगनादवतरन्तं तं जनं श्रीकृष्णः नारद इत्यबोधि।

**रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः।**
**स्फुटीभवद्ग्रामविशेषमूर्च्छनामवेक्षमाणं महतीं मुहुर्मुहुः॥१०॥**

**अन्वयः -** नभस्वतः आघट्टनया पृथक् रणद्भिः भिन्नश्रुतिमण्डलैः स्वरैः स्फुटीभवद्ग्राम-विशेषमूर्च्छनां महतीं मुहुर्मुहुः अवेक्षमानम्।

**भावार्थः -** नारदस्य महती नाम या निजवीणा, सा वादनं विनैव तस्यां वायोराघातादुत्पद्यमानेभ्यः श्रुतिसमूहेभ्यः उत्पन्नैः षड्जादिभिः सप्तभिः स्वरैः अतिस्पष्टाः ग्रामविशेषमूर्च्छना अभवन्। अतः आश्चर्यपूर्वकं तां वीणां पश्यन्तं नारदं श्रीकृष्णः अवलोकयामास।

## शब्दार्थाः

| | |
|---|---|
| श्रियः | लक्ष्म्याः |
| सद्मनि | गृहे |
| ददर्श | अवालोकयत् |
| हिरण्यगर्भाङ्गभुवम् | ब्रह्मणः जातम्/ब्रह्मणः पुत्रम् |
| अनूरुसारथेः | सूर्यस्य |
| तिरश्चिनम् | तिर्यग्भूतम् |
| विसारि | विस्तृतम् |
| त्विषां चयः | तेजपुञ्जः |
| विभाविता | विमृष्टा |
| अबोधि | ज्ञातवान् |
| पयोधरः | मेघः |
| कर्पूरपरागपाण्डुरम् | कर्पूरचूर्ण इव गौरवर्णः यस्य तम् |
| स्फुटोपमम् | स्फुटा उपमा यस्य तम् |
| शरच्चन्द्रमरीचिः | शरदृतोः चन्द्रमसः किरणः |
| धराधरेन्द्रम् | हिमालयम् |
| तुहिनरुहः | तुषारभूमौ रोहन्तीति |
| मौञ्जी | मुञ्जस्तृणविशेषः तन्मयी मेखला |

| | |
|---|---|
| अर्जुनच्छविम् | धवलकान्तिम् |
| शितिवाससः | नीलाम्बरस्य |
| विहङ्गराजः | गरुडः |
| कृतोपवीतम् | शोभार्थम् |
| तडिताम् | तडित्सौदामनीनाम् |
| चमूरुचर्मणा | मृगत्वचा |
| अजस्त्रम् | प्राचुर्यम् |
| अच्छस्फटिकाक्षमालया | स्वच्छस्फटिकानां मालया/जपमालया |
| रणद्भिराघट्टनया | वायोः आघातेन |

## अभ्यासः

१. **वस्तुनिष्ठात्मकाः प्रश्नाः -**

(क) वसुदेवस्य पुत्रः कः ?

(अ) अर्जुनः (आ) श्रीकृष्णः

(इ) उद्धवः (ई) युधिष्ठिरः

(ख) शिशुपालवधमहाकाव्ये कति सर्गाः सन्ति ?

(अ) एकोनविंशतिः (आ) अष्टादश

(इ) विंशतिः (ई) सप्तदश

(ग) शिशुपालवधमहाकाव्यस्य प्रतिनायकः कः ?

(अ) दुर्योधनः (आ) शकुनिः

(इ) कर्णः (ई) शिशुपालः

(घ) शिशुपालवधमहाकाव्ये नायकः कः ?

(अ) श्रीकृष्णः (आ) बलरामः

(इ) दुर्योधनः (ई) युधिष्ठिरः

(ङ) श्रियः पतिः कः ?

(अ) इन्द्रः (आ) नारदः

(इ) विष्णुः (ई) दुर्योधनः

## २. अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -

(क) जगतः नियमनाय कस्य सद्मनि विष्णुः पुत्ररूपेणावतीर्णः ?

(ख) श्रीकृष्णः आकाशमार्गादवतरन्तं कं मुनिम् अवलोकयामास ?

(ग) प्रसिद्धमूर्ध्वज्वलनं कस्य ?

(घ) आकाशादवतरद्वस्तु श्रीकृष्णः आदौ कीदृशमचिन्तयत् ?

(ङ) शिशुपालवधमहाकाव्ये मुनेः नारदस्य वीणायाः नाम किम् ?

(च) शिशुपालवधस्य कस्मिन् सर्गे कृष्णनारदसम्भाषणं वर्णितमस्ति?

(छ) श्रीकृष्णः कां वीणां पश्यन्तं नारदम् अपश्यत् ?

## ३. प्रयोगपरिवर्तनं कुरुत -

(क) श्रियः पतिः हिरण्यगर्भाङ्गभुवं मुनिं हरिः अपश्यत्।

(ख) एतत्किमिति जनैराकुलमीक्षितम्।

(ग) विभुर्विभक्तावयवं नारदं श्रीकृष्णः अबुध्यत।

(घ) महती मुहुर्मुहुः अवेक्ष्यमाणा नारदेन।

(ङ) आकाशादवतरन्तं नारदं श्रीकृष्णः अवालोकयत्।

## ४. रिक्तस्थानानि पूरयत -

(क) श्रियःपति ............................... मुनिं हरिः॥

(ख) विभुर्विभक्तावयं ............................... सः॥

(ग) नवानधोऽधो ............................... पाण्डुरम्।

(घ) पिशङ्गमौञ्जी ............................... अञ्जनद्युतिः।

(ङ) ............................... नागेन्द्रमिवेन्द्रवाहनम्॥

(च) अजस्रमास्फालित ............................... ॥

(छ) ............................... महतीं मुहुर्मुहः॥

## ५. अधोलिखितानां शब्दानां प्रकृति-प्रत्ययविभागं कुरुत -

| | प्रकृतिः | प्रत्ययः |
|---|---|---|
| (क) शासितुम् | ---------- | ---------- |
| (ख) गतम् | ---------- | ---------- |
| (ग) विपाकः | ---------- | ---------- |

| | | | |
|---|---|---|---|
| (घ) | नभस्वतः | ---------- | ---------- |
| (ङ) | वसन् | ---------- | ---------- |
| (च) | ईक्षितम् | ---------- | ---------- |
| (छ) | दधानम् | ---------- | ---------- |

## ६. अधोलिखितानि पदानि यथायोग्यं मेलयत -

| | | |
|---|---|---|
| (क) | श्रियः पतिः | पयोधरान् |
| (ख) | महती | सूर्यः |
| (ग) | अनूरुसारथिः | श्रीकृष्णः |
| (घ) | भूतिसितेन | नारदस्य |
| (ङ) | नवान् | शम्भुना |

## ७. अधोलिखितानां पदानां समासनिर्देशपुरस्सरं विग्रहवाक्यं लिखत।

| | | समासविग्रहः | समासनाम |
|---|---|---|---|
| (क) | जगन्निवासः | ------------------------- | ------------------------- |
| (ख) | वसुदेवसद्मनिः | ------------------------- | ------------------------- |
| (ग) | ऊर्ध्वज्वलनम् | ------------------------- | ------------------------- |
| (घ) | व्रततीततीः | ------------------------- | ------------------------- |
| ङ) | अञ्जनद्युतिः | ------------------------- | ------------------------- |
| च) | कृतोपवीतम् | ------------------------- | ------------------------- |
| छ) | इन्द्रवाहनम् | ------------------------- | ------------------------- |

## ८. अधोलिखितानां पदानां सन्धिनिर्देशपूर्वकं सन्धिविच्छेदं कुरुत -

| | | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|---|
| (क) | तिरश्चीनम् | ---------- + ---------- | ------------------------- |
| (ख) | कृतोपवीतम् | ---------- + ---------- | ------------------------- |
| (ग) | मुहुर्मुहः | ---------- + ---------- | ------------------------- |
| (घ) | एणाजिनम् | ---------- + ---------- | ------------------------- |
| (ङ) | धराधरेन्द्रः | ---------- + ---------- | ------------------------- |
| (च) | अधोऽधः | ---------- + ---------- | ------------------------- |

(छ) विभक्तावयवम् ---------- + ----------- -------------------------

९. अधोलिखितानां श्लोकानां भावार्थं संस्कृतभाषया/मातृभाषया वा लिखत -

(क) नवानधोऽधः बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।
क्षणं क्षणोत्क्षिप्तगजेन्द्र कृत्तिना स्फुटोपमं भूतिसितेन शम्भुना॥

(ख) पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति।
सुवर्णसूत्राकलिताधराम्बरां बिऽम्बयन्तं शितिवाससस्तनुम्॥

(ग) निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद् बिसच्छेदसितासङ्गिता।
चकासतं चारूचमूरूचर्मणा कुथेन नागेन्द्रमिवेन्द्रवाहनम्॥

## योग्यता-विस्तारः

माघस्य शिशुपालवधे विंशतिः सर्गाः वर्तन्ते। इह युधिष्ठिरस्य राजसूययागे श्रीकृष्णेन शिशुपालस्य वधो मुख्यतया वर्णितः। महाभारतोक्तामिमां कथां माघो वर्णनां चमत्कारिणीं विहितवान्। माघकवेः विपुलतावर्णनशक्तिरत्र पल्लविता सञ्जाता। महाकाव्ये स्पष्टता, मधुरता, ऊर्जस्वलता च सर्वत्र प्रकटीभवन्ति। वीरोक्तिषु तु अस्य विशिष्टा प्रभावशालिता दृश्यते।

महाकाव्ये किरातार्जुनीयम् अनुक्रियमाणमिव दृश्यते। तत्रापि श्रीशब्दः प्रथमं प्रयुक्तोऽत्रापि तथैव। माघस्य श्र्यङ्कता अपि किरातस्य लक्ष्यङ्कता दर्शनमूला। चतुर्थे सर्गे वृत्तभेदोऽपि सम एवोभयोः। किराते शिवो माघे च हरिः स्तूयते।

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

इत्याभाणकं प्रसिद्धमेव। बृहत्त्रय्यां परिगणितस्य महाकविमाघप्रणितस्यास्य शिशुपाल-वधाख्यस्य महाकाव्यस्य प्रसङ्गप्राप्तः प्रथमसर्गः अत्र पाठे प्रस्तुतो वर्तते।

**नायकस्य लक्षणम्**

**त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।**
**दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता॥**
**धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।**
**धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः॥**

**विदूषकस्य लक्षणम्**

**कुसुमवसन्ताद्यभिधः कर्मवपुर्वेषभाषाद्यैः।**
**हास्यकरः कलहरतिर्विदूषकः स्यात् सकर्मज्ञः॥**

१. गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः। २. श्रेयसी केन तृप्यते।

३. सदाभिमानैकधना हि मानिनः। ४. ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि।

५. महीयांसः प्रकृत्या मितभाषिणः। ६. क्रियासमभिहारेण विराध्यन्तं क्षमेत कः।

७. सर्वः स्वार्थं समीहते। ८. नान्यस्य गन्धमपि मानभृतः सहन्ते।

९. शास्त्रं हि निश्चितधियां क्व न सिद्धिमेति। १०. मन्दोऽपि नाम न महानवगृह्य साध्यः।

११. समय एव करोति बलाबलम्। १२. परिभवोऽरिभवो हि सुदुःसहः।

१३. भवति महत्सु न निष्फलः प्रयासः। १४. क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।

१५. क्षतसकलविपक्षस्तेजसः स स्वभावः।

१६. हरत्यघं सम्प्रति हेतुरेष्यतः, शुभस्य पूर्वाचरितैः कृतं शुभैः।

१७. शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्।

१८. शब्दविद्येव नो भाति राजनीतिरपस्पशा। १९. तावभा भारवेर्भाति यावन्माघस्य नोदयः।

# त्रयोदशः पाठः

## हर्षचरितम्

महाकविः बाणभट्टः गद्यकाव्ये अपारपारावारीणः कविर्विद्यते। इतिहासाश्रितेयं रचना। तस्माद् हर्षचरितम् आख्यायिका इत्युच्यते। बाणस्य हर्षचरितं गद्यकाव्यम् अष्टोच्छ्वासात्मकं विद्यते। तत्र उच्छ्वासत्रये बाणभट्टेन स्वीयकथा उल्लिखिता। चतुर्थादुच्छ्वासादारभ्य समाप्तिपर्यन्तं हर्षचरितं वर्णितम्। एतत् काव्यम् अपूर्वं वर्तते। बाणभट्टविषये "बाणोच्छिष्टं जगत्सर्वम्" इति सुप्रसिद्धमस्ति। बाणभट्टस्य त्रयः रचनाः सन्ति। १. हर्षचरितम् २. कादम्बरी ३. चण्डीशतकञ्च। बाणभट्टस्य प्रथमा कृतिः 'हर्षचरितम्'। हर्षचरिताख्ये गद्यकाव्येऽस्मिन् दिवाकराश्रमवर्णनम्, राजवर्णनम्, यशोमतिवर्णनम्, दधीचिवर्णनम्, भैरवाचार्यवर्णनम् इत्यादीनि सहृदयानां चेतांसि आह्लादयन्ति। पदानां समुचितप्रयोगः, भावानामार्जवम्, उपमाश्लेषरूपकसमासोक्ति-प्रभृतीनाम् अलङ्काराणां स्वाभाविकसमावेशः, देशकालपात्रानुसारिभाषायाः चारु समावेशः, बाणस्य गद्यमतिरिच्यान्यत्र न दृश्यते।

'विद्ययाऽमृतमश्नुते' इति कथनं प्रसिद्धमेव। पूर्वकाले श्रीरामादयः विद्यां प्राप्तुं वसिष्ठमहर्षेः आश्रमम् अध्यगच्छन्। पाठ्यांशोऽयं महाकवेः बाणस्य हर्षचरितस्य अष्टमोच्छ्वासात् संगृहीतोऽस्ति।

**सहसा सम्पादयता मनोरथप्रार्थितानि वस्तूनि।**
**दैवेनापि क्रियते भव्यानां पूर्वसेवेव॥१॥**
**विद्वज्जनसंपर्को नष्टेष्टज्ञातिदर्शनाभ्युदयः।**
**कस्य न सुखाय भवने भवति महारत्नलाभश्च॥२॥**

इतश्चार्धगव्यूतिमात्र एव मुनिमहिते महति महीधरमालामूलरूहि महीरूहां षण्डेऽपि पिण्डपाती प्रभूतान्तेवासिपरिवृतः पाराशरी दिवाकरमित्रनामा गिरिनदीमाश्रित्य प्रतिवसति। स यदि विन्देद्वार्त्तामिति। तच्छ्रुत्वा नरपतिरचिन्तयत्, - 'श्रूयते हि तत्र भवतः सुगृहीतनाम्नः स्वर्गतस्य ग्रहवर्मणो बालमित्रं मैत्रायणीयस्त्रयीं विहाय ब्राह्मणायनो विद्वानुत्पन्नसमाधिः सौगते मते युवैव काषायाणि गृहीतवानिति। प्रेयशश्च जनस्य जनयति सुहृदपि दृष्टो भृशमाश्वासम्। अभिगमनीयाश्च गुणाः सर्वस्य। कस्य न प्रतीक्ष्यो मुनिभावः? भगवती च वैधेयेऽपि धर्मगृहिणी गरिमाणमापादयति प्रव्रज्या। किं पुनः सकलजनमनोमुषि विदुषि जने। यतो नः कुतूहलि

हृदयमभूत् सततमस्य दर्शनं प्रति प्रासङ्गिकमेवेदमापतितमतिकल्याणम्। पश्यामः प्रयत्नप्रार्थितदर्शनं जनम्' इति। प्रकाशं चाब्रवीत् - 'अङ्ग! समुपदिश तमुद्देशं यत्रास्ते स पिण्डपाती' इति। एवमुक्त्वा च तेनैवोपदिश्यमानवर्त्मा प्रावर्त्तत गन्तुम्।

अथ तेषां तरूणां मध्ये नानादेशीयैः स्थानस्थानेषु स्थाणूनाश्रितैः, शिलातलेषूपविष्टैः, लतावनान्यध्यावसद्भिः, अरण्यानीनिकुञ्जेषु निलीनैः, विटपच्छायासु निषण्णैः, तरुमूलानि निषेवमाणैः, वीतरागैरार्हतैर्मस्करिभिः, श्वेतपटैः, पाण्डुरिभिक्षुभिर्भागवतैर्वर्णिभिः केशलुञ्चकैः जैनैः, कापिलैः, जनैर्लोकायतिकैः, काणादैरौपनिषदैरैश्वरकारणिकैः, कर्मन्दिभिः, कारन्धमिभिर्धर्मशास्त्रिभिः, पौराणिकैः, साप्ततन्तवैः, शैवैः, शाब्दिकैः, वैखानसैः, पाञ्चरात्रिकैरन्यैश्च स्वान् स्वान् सिद्धान्ताञ्छृण्वद्भिरभियुक्तैश्चिन्तयद्भिश्च प्रत्युच्चरद्भिश्च, संशयानैश्च, निश्चिन्वद्भिश्च, व्युत्पादयद्भिश्च, विवदमानैश्चाभ्यस्यद्भिश्च, व्याचक्षाणैश्च शिष्यतां प्रतिपन्नैर्दूरादेवा-वेद्यमानमतिविनीतैः कपिभिरपि चैत्यकर्म कुर्वाणैस्त्रिशरणपरैः परमोपासकैः शुकैरपि शाक्यशासनकुशलैः कोशं समुपदिशद्भिः शिक्षापदोपदेशदोषोपशमशालिनीभिः शारिकाभिरपि धर्मदेशनां दर्शयन्तीभिः अनवरतश्रवणगृहीतालोकैः कौशिकैरपि बोधिसत्त्वजातकानि जल्पद्भिर्जातसौगतशीलशीतलस्वभावैः शार्दूलैरप्यमांसाशिभिरुपास्यमानम्, आसनोपान्तो-पविष्टविस्रब्धानेककेसरिशावकतया मुनिपरमेश्वरमकृत्रिम इव सिंहासने निषण्णमुपशममिव पिबद्भिर्वनहरिणैर्जिह्वालताभिरुपलिह्यमानपादपल्लवं, वामकरतलनिविष्टेन नीवारमश्नता पारावतपोतकेन कर्णोत्पलेनेव प्रियां मैत्रीं प्रसादयन्तमितरकरकिसलयनखमयूख-लेखाभिर्जनितजनव्यामोहम्, उद्ग्रीवं मयूरं मरकतमणिकरमिव वारिधाराभिः पूरयन्तम्, इतस्ततः पिपीलकश्रेणीनां श्यामकतण्डुलकणान्स्वयमेव किरन्तमरुणेन चीवरपटलेन म्रदीयसा संवीतं, बहुलबालातपानुलिप्तमिव पौरन्दरं दिग्विभागमुल्लिखितपद्मरागप्रभाप्रतिमया रक्तावदा तया देहप्रभया पाटलीकृतानां काषायग्रहणमिव दिशामप्युपदिशन्तम्, अनौद्धत्यादधोमुखेन मन्दमुकुलितकुमुदाकरेण स्निग्धधवलप्रसन्नेन चक्षुषा जनक्षुण्णक्षुद्रजन्तुजीवनार्थममृतमिव वर्षन्तं, सर्वशास्त्राक्षरपरमाणुभिरिव निर्मितं परमसौगतमप्यवलोकितेश्वरम्, अचलितं मनसि, अस्खलितं तपसि लग्नम्, आलोकमिव यथावस्थितसकलपदार्थप्रकाशकं दर्शनार्थिनां, सुगतस्याप्यभिगमनीयमिव, धर्मस्याप्याराधनीयमिव, प्रसादस्यापि प्रसादनीयमिव, मानस्यापि माननीयमिव, वन्द्यत्वस्यापि वन्दनीयमिव, आत्मनोऽपि स्पृहणीयमिव, ध्यानस्यापि ध्येयमिव, ज्ञानस्यापि ज्ञेयमिव, जन्म जपस्य, नेमिं नियमस्य, तत्त्वं तपसः, शरीरं शौचस्य, कोशं कुशलस्य, वेश्म विश्वासस्य, सर्वस्वं सद्वृत्ततायाः, दाक्ष्यं दाक्षिण्यस्य, पारं परानुकम्पायाः, निर्वृत्तिं सुखस्य,

मध्यमे वयसि वर्त्तमानं दिवाकरमित्रमद्राक्षीत्। अतिप्रशान्तगम्भीराकाररोपितबहुमानश्च सादरं दूरादेव समं शिरसा वचसा मनसा च ववन्दे।

## शब्दार्थाः

| | |
|---|---|
| महीवरः | अद्रिः |
| महीरूहाम् | तरूणाम् |
| काषायाणि | काषायवस्त्राणि |
| उपदिश्यमानः | उपदिश्यमानः |
| स्थाणूनाश्रितैः | शिष्यभावेन |
| निकुञ्जेषु | पर्णकुटीरेषु |
| निषण्णैः | उपविष्टैः |
| श्वेतपटैः | श्वेताम्बरः |
| मस्करिभिः | परिव्राजकैः |
| पाण्डूरभिक्षुभिः | त्यक्तकाषायैः |
| वर्णिभिः | ब्रह्मचारिभिः |
| केशलुञ्चकैः | यथार्थनामभिः |
| लोकायतिकैः | चार्वाकैः |
| ऐश्वरकारणिकैः | नैयायिकैः |
| कारन्धमिभिः | धातुवादिभिः/काणादैः |
| धर्मशास्त्रिभिः | स्मृतिज्ञैः |
| साप्ततन्तवैः | मीमांसकैः |
| शाब्दिकैः | वैयाकरणैः |
| चिन्तयद्भिः | चिन्तां कुर्वद्भिः |
| पाञ्चरात्रिकैः | वैष्णवभेदैः |
| औपनिषदैः | वेदान्तिभिः |
| भागवतैः | विष्णुभक्तैः |
| व्याचक्षाणैः | व्याचक्षाणैः |

| | |
|---|---|
| चैत्यकर्म | अन्त्येष्टिकर्म |
| त्रिशरणपरैः | त्रिबुद्धधर्मसङ्घैः |
| धर्मदेशनां | धर्मकथनम् |
| शीतलस्वभावैः | शीतलस्वभावैः |
| शार्दूलैः | व्याघ्रैः |
| कौशिकैः | उल्लूकपक्षिभिः |
| केसरिशावकैः | सिंहशावकैः |
| पारावतः | कपोतः |
| प्रसादयन्तम् | प्रसन्नं कुर्वन्तम् |
| उद्ग्रीवम् | ग्रीवा उच्चैः कृत्वा |
| अरुणेव | रक्तमिव |
| चीवरपटलेन | भिक्षुवस्त्रेण |
| कुमुदकारेण | कमलेन सदृशम् |
| स्खलितं | पतितम् |
| सुगतम् | सम्यक् |
| वेश्म | सद्म |
| दाक्ष्यम् | दानम् |
| चीवरम् | मुनिनिवासः |
| बोधिः | समाधिः |

## अभ्यासः

१. **सर्वान् प्रश्नान् समाधत्त -**

(क) बाणभट्टस्य कति रचनाः सन्ति ? तासां नामानि लिखत।

(ख) बाणभट्टस्य विषये प्रसिद्धं कथनं किमस्ति ?

(ग) बाणभट्टस्य प्रथमा रचना का ?

(घ) दिवाकरमित्रः कुत्र प्रतिवसति ?

(ङ) कः मध्यमे वयसि आसीत् ?

## २. पूर्णवाक्येन उत्तरत -

(क) हर्षचरिते कति उच्छ्वासाः वर्तन्ते ?

(ख) हर्षचरितस्य आद्येषु त्रिषूच्छ्वासेषु कस्य कथा वर्णिताऽस्ति ?

(ग) हर्षचरितस्य काव्यविधा का ?

(घ) हर्षवर्धनः मध्यमे वयसि वर्तमान् कमद्राक्षीत् ?

(ङ) हर्षवर्धनस्य भगिनी का आसीत् ?

## ३. रिक्तस्थानानि पूरयत -

(क) विद्ययाऽ ..........................................।

(ख) सादरं दूरादेव ............................... ववन्दे।

(ग) ........................................... जगत्सर्वम्।

(घ) अनपेक्षित ............................ सतां व्यसनम्।

(ङ) सकलजनमना ................................ जनयतो।

## ४. अधोलिखितानां पदानां ससूत्रं सन्धिविच्छेदं कुरुत -

| | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|
| (क) वैद्येयेऽपि | ---------- + ---------- | ------------------------- |
| (ख) चाब्रवीत् | ---------- + ---------- | ------------------------- |
| (ग) व्याचक्षाणैश्च | ---------- + ---------- | ------------------------- |
| (घ) तच्छ्रुत्वा | ---------- + ---------- | ------------------------- |
| (ङ) परमोपासकैः | ---------- + ---------- | ------------------------- |
| (च) सुहृदपि | ---------- + ---------- | ------------------------- |
| (छ) तेनैवोपदिश्यमानवर्त्मा | ---------- + ---------- | ------------------------- |
| (ज) प्रत्युच्चरद्भिश्च | ---------- + ---------- | ------------------------- |

## ५. पदानां मूलशब्दं लिङ्गं विभक्तिं वचनं च लिखत -

| क्र. | पदम् | मूलशब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| १ | चैत्यकर्म | ---------- | ---------- | ---------- | ---------- |
| २ | वयसि | ---------- | ---------- | ---------- | ---------- |
| ३ | वेश्म | ---------- | ---------- | ---------- | ---------- |

| | | | | | |
|---|---|---|---|---|---|
| ४ | विदुषि | ---------- | ---------- | ---------- | ---------- |
| ५ | धर्मशास्त्रिभिः | ---------- | ---------- | ---------- | ---------- |
| ६ | कारन्धमिनः | ---------- | ---------- | ---------- | ---------- |
| ७ | तेषाम् | ---------- | ---------- | ---------- | ---------- |
| ८ | छायायाः | ---------- | ---------- | ---------- | ---------- |
| ९ | मनसे | ---------- | ---------- | ---------- | ---------- |
| १० | स्वान् | ---------- | ---------- | ---------- | ---------- |

### ६. अधस्तनपदानां प्रकृतिप्रत्ययौ पृथक्कुरुत -

| क. | उदाहरणम् | धातुः | प्रत्ययः |
|---|---|---|---|
| १. | स्मरणीयम् | -------------------- | -------------------- |
| २. | आश्रित्य | -------------------- | -------------------- |
| ३. | श्रुत्वा | -------------------- | -------------------- |
| ४. | गन्तुम् | -------------------- | -------------------- |
| ५. | व्याचक्षाणः | -------------------- | -------------------- |
| ६. | निश्चिन्वन् | -------------------- | -------------------- |

### ७. रेखाङ्कितपदान्याश्रित्य कारकविभक्ती निर्णयत -

(क) <u>तेन</u> एव उपदिश्यमानवर्त्मा प्रावर्तत गन्तुम्।

(ख) तच्छ्रुत्वा <u>नरपतिः</u> अचिन्तयत्।

(ग) दिवाकरमित्रनामा <u>गिरिनदीम्</u> आश्रित्य प्रतिवसति।

(घ) शिरसा वचसा <u>मनसा</u> च ववन्दे।

(ङ) मध्यमे <u>वयसि</u> वर्तमानं दिवाकरमित्रमद्राक्षीत्।

## योग्यता-विस्तारः

रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः॥
जयन्ति वाणासुरमौलिलालिता दशास्यचूजामणिचक्रचुम्बिनः।
सुरासुराधीशशिखान्तशायिनी भवच्छिदस्त्र्यम्बकपादपांसवः॥
जयत्युपेन्द्रः स चकार दूरतो बिभित्सया यः क्षणलब्धलक्षया।

दृशैव कोपारुणया रिपोरुरः स्वयं भयाद्भिन्नमिवास्रपाटलम्॥
अकारणाविष्कृतवैरदारुणदसज्जनात् कस्य भयं न जायते।
विषं महाहेरिव यस्य दुर्वचः सुदुःसहं सन्निहितं सदा मुखे॥
कटु क्वणन्तो मलदायकाः खलास्तुदन्त्यलं बन्धनशृङ्खला इव।
मनस्तु साधध्वनिभिः पदे पदे हरन्ति सन्तो मणिनूपुरा इव॥
स्फुरत्कलालापविलासकोमला करोति रागं हृदि कौतुकाधिकम्।
रसेन शय्यां स्वयमभ्युपागता कथा जनस्याभिनवा वधूरिव॥
हरन्ति कं नोज्ज्वलदीपकोपमैर्नवैः पदार्थैरुपपादिताः कथाः।
निरन्तरश्लेषघनाः सुजातयो महास्रजश्चम्पककुड्मलैरिव॥
बभूव वात्स्यायनवंशसम्भवो द्विजो जगद्गीतगुणोऽग्रणीः सताम्।
अनेकगुप्तार्चितपादपङ्कजः कुबेरनामांश इव स्वयम्भुवः॥
उवास यस्य श्रुतिशान्तकल्मषे सदा पुरोडाशपवित्रिताधरे।
सरस्वती सोमकषायितोदरे समस्तशास्त्रस्मृतिबन्धुरे मुखे॥
जगुर्गृहेऽभ्यस्तसमस्तवाङ्मयैः ससारिकैः पञ्जरवर्तिभिः शुकैः।
निगृह्यमाण वटवः पदे पदे यजूंषि सामानि च यस्य शङ्किताः॥

# चतुर्दशः पाठः

## अष्टादश स्मृतयः

पूर्वतनस्य अनुभवस्य ज्ञानस्य वा स्मरणं स्मृतिः इति सामान्यार्थः। महर्षयः वेदार्थान् विश्लिष्य प्रतियुगं वेदोपदेशान् लोकहिताय लोकव्यवहाराय च प्रायच्छन्। इत्थं लोकव्यवहाराय वेदार्थानां स्मरणात् प्राप्ताः महर्षीणाम् उपदेशाः स्मृतयः उच्यन्ते। वेदमन्त्राणाम् अर्थनिर्णये सहायकभूतेषु वेदाङ्गेषु कल्पसूत्राणां स्थानम् अतिमहनीयं वर्तते। कल्पसूत्रेषु चतुर्विधानां सूत्राणाम् अन्तर्भावो भवति। तानि सूत्राणि यथा - श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि शुल्बसूत्राणि च। तेषु धर्मसूत्राणि एव धर्मशास्त्राणि, एतान्येव स्मृतिपदाख्यानि भवन्ति। यथोक्तम् -

**"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः।"**

प्राचीनकाले स्मृतयः तात्कालिकस्य समाजस्य राष्ट्रस्य वा सर्वविधव्यवहाराणां यथोचितं व्यवस्थापनाय महर्षिभिः उपदिष्टाः। पुरुषार्थचतुष्टयोपदेशः, वर्णाश्रमधर्मोपदेशः, राजधर्मनिर्देशः सञ्चालनम् अनुशासनं च श्रुतिं स्मृतिं च अनुसृत्यैव भवति स्म। स्मृतिषु ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाश्रमव्यवस्था, वर्णाश्रमधर्माः, विशेषावसरेषु करणीयानि कर्माणि, प्रायश्चित्तानि, प्रशासनप्रणाली, दण्डव्यवस्थाः, देशकालक्रमेण धर्मव्यवस्था इत्यादिषु विषयेषु वर्णनमुपलभ्यते। स्मृतिः एव धर्मशास्त्रनाम्ना उच्यते। धर्मशास्त्रं सूत्रं, स्मृतिः, निबन्ध इति त्रिधा विभिद्यते। सर्वासु स्मृतिषु मुख्यतया आचारः, व्यवहारः, प्रायश्चित्तं च इति त्रयो विषयाः वर्णितास्सन्ति। मनु-नारद-याज्ञवल्क्य-पाराशर-अत्रि-विष्णु-हारीत-औशनस-बाधूल-आङ्गीरस-संवर्त-यम-आपस्तम्भ-बृहस्पति-कात्यायन-व्यास-शङ्ख-लिखित-दक्ष-गौतम-शातातप-वशिष्ठ-प्रजापति-प्रणीताः स्मृतयः सन्ति। एतास्वपि स्मृतिषु मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, पाराशरस्मृतिः च विशिष्टं स्थानं भजन्ते। परन्तु कलौ युगे पाराशरस्मृतिः प्रामुख्यम् आवहति।

### मनुस्मृतिः

उपलभ्यमानासु सर्वासु स्मृतिषु सर्वप्रसिद्धा मनुस्मृतिः, स्मृतिग्रन्थेषु प्राचीनतमा च। महर्षिणा मनुना विरचिता इयं मनुस्मृतिः निखिलविश्वं मानवधर्मम् उपदिशति। मनुस्मृतौ द्वादश अध्यायाः विद्यन्ते। तत्र पञ्चाशीत्यधिकषड्विंशतिशतं (२६८५) श्लोकाः वर्तन्ते। अत्र मनुस्मृतेः द्वादशाध्यायेषु उपलब्धानां मुख्यानां विषयाणां परिचयो दीयते। यथा - **प्रथमेऽध्याये** - सृष्टिक्रमः,

प्राणिनां जातयः, कालगणनम्, वेदेभ्यो धर्मनिष्पत्तिः, आर्यावर्त्तवर्णनम् इत्यादयो विषयाः वर्णिताः सन्ति। **द्वितीयाध्याये** - जातकर्मादिसंस्कारविधिः, ब्रह्मचर्यव्रतविधिः, गुरोः अभिवादनविधिश्च। **तृतीयेऽध्याये** - समावर्तनसंस्कारः, पञ्चमहायज्ञः, विवाहसंस्कारः च। **चतुर्थेऽध्याये** - वेदोक्तजीविकाः, अतिथिलक्षणम्, गार्हस्थधर्मः च। **पञ्चमेऽध्याये** - भक्ष्याभक्ष्यविषयाः, जननमरणशौचनियमाः, गात्राणां शुद्धिः, द्रव्यशुद्धिः, पत्नीधर्मः च। **षष्ठाध्याये** - वानप्रस्थसंन्यासाश्रमयोः नियमाः, दशलक्षणयुक्तः धर्मः। **सप्तमाध्याये** - राज्याधिकारिणो लक्षणम्, राजधर्मः, व्यसनानि, शत्रुमित्रविवेचनम्। **अष्टमेऽध्याये** - न्यायसभायाः निर्माणम्, व्यवहाराणां वर्णनं निर्णयश्च। **नवमेऽध्याये** - गृहस्थानां विवादः, तेषां निर्णयः च, राज्ञो विविधरूपाणि। **दशमाध्याये** - वैश्यशूद्रयोः धर्मः, अनार्यलक्षणम्, कर्मानुसारं वर्णपरिवर्तनम् इति। **एकादशाध्याये** - विविधपापानां प्रायश्चित्तानि। **द्वादशाध्याये** - कर्मफलविधानम्, सात्त्विक-राजसिक-तामसिकानि कर्माणि गतयः च, वेदानां माहात्म्यम्, धर्मपरिषद्-वर्णनम् इति। एतदेव वर्णनं श्लोकमाध्यमेन -

**जगतश्च समुत्पत्तिं संस्कारविधिमेव च।**
**व्रतचर्योपचारं च स्नातस्य च परं विधिम्॥**
**दाराभिगमनं चैव विवाहानां च लक्षणम्।**
**महायज्ञविधानं च श्राद्धकल्पं च शाश्वतम्॥**
**वृत्तीनां लक्षणं चैव स्नातकस्य व्रतानि च।**
**राजश्च धर्ममखिलं कार्याणां च विनिर्णयम्॥**
**साक्षिप्रश्नविधानं च धर्मं स्त्रीपुंसयोरपि।**
**विभागधर्मं द्यूतं च कण्टकानां च शोधनम्॥**
**वैश्यशूद्रोपचारं च सङ्कीर्णानां च सम्भवम्।**
**आपद्धर्मं च वर्णानां प्रायश्चित्तविधिं तथा॥**
**संसारगमनं चैव त्रिविधं कर्मसम्भवम्।**
**निःश्रेयसं कर्मणां च गुणदोषपरीक्षणम्॥**
**देशधर्मान् जातिधर्मान् कुलधर्मांश्च शाश्वतान्।**
**पाखण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान्मनुः॥**

तथैव अन्यासु स्मृतिषु ये मुख्यविषयाः सन्ति ते प्रस्तूयन्ते।

## याज्ञवल्क्यस्मृतिः

ग्रन्थेऽस्मिन् त्रयः अध्यायाः वर्तन्ते। १. आचाराध्यायः २. व्यवहाराध्यायः ३. प्रायश्चित्तोऽध्यायः चेति। तत्र **आचाराध्याये** - उपोद्घातः, ब्रह्मचर्यम्, विवाहः, वर्णजातिविवेकः, गृहस्थधर्मः, स्नातकधर्मः, भक्ष्याभक्ष्यम्, द्रव्यशुद्धिः, दानम्, श्राद्धम्, गणपतिकल्पः, ग्रहशान्तिः, राजधर्मः, इत्यादिविषयाः वर्णितास्सन्ति। **व्यवहाराध्याये** - साधारणव्यवहारमातृका, असाधारणव्यवहारमातृका, ऋणादानम्, उपनिधिः, साक्षी, लेख्यम्, दिव्यम्, दायविभागः, सीमाविवादः, स्वामिविक्रयः, दत्ताप्रदानिकम्, क्रीतानुशयः, संविद्व्यतिक्रमः, वेतनादानम्, द्यूतसमाह्वयः, वाक्पारुष्यम्, दण्डपारुष्यम्, साहसम्, विक्रियासम्प्रदानम्, सम्भूय समुत्थानम्, स्तेयम्, स्त्रीसंग्रहणम्, प्रकीर्णं च प्रतिपादितानि। **प्रायश्चित्ताध्याये** - अशौचम्, आपद्धर्मः, वानप्रस्थः, यतिधर्मः, प्रायश्चित्तम्, प्रकीर्णप्रायश्चित्तानि च वर्णितानि।

## पाराशरस्मृतिः

महर्षिः पराशरः महर्षेः वेदव्यासस्य पिता आसीत्। महर्षिः पराशरः **पाराशरस्मृतेः** प्रणेता आसीत्। एषा स्मृतिः कलौ युगे अनुसरणीया इति महर्षीणाम् उपदेशः। पराशरमुखनिःसृतोऽयं श्लोकः -

**कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः।**
**द्वापरे शङ्खलिखिता कलौ पाराशरः स्मृतः॥**

पुरा वर्णाश्रमनियमानुसारेण ब्राह्मणानां कृते कृषिकर्म निषिद्धम् आसीत्। किन्तु पराशरस्मृतौ यज्ञातिरिक्तं कृषिकर्मापि ब्राह्मणैः कर्त्तव्यत्वेन अनुमतं वर्तते। ब्राह्मणस्तपोयज्ञादिभिः पुण्यैः कर्मभिः, संन्यासी समाधिना, योगारुढो यतिः योगाभ्यासेन च यत् परमं पदं प्राप्नुवन्ति, वीरः क्षत्रियः मातृभूमेः संग्रामे योधं योधं निहतः सन् वीरस्वर्गं लभते इति पाराशरस्मृत्याऽनुमोदितमस्ति। पराशरेण महर्षिणा कलियुगधर्मम् अनुसृत्य कृषिकर्मणो भूयसी प्रशंसा विहिताऽस्ति।

पाराशरस्मृतौ द्वादशाध्यायाः, द्वादशोत्तरपञ्चशतं (५१२) श्लोकाश्च वर्त्तन्ते। तत्र विशेषरूपेण आचार-प्रायश्चित्तयोर्विषये विचार उपनिक्षिप्तः। तत्र **प्रथमाध्याये** - कलियुगस्य शौचाचारव्यवस्था, युगधर्मः, कलियुगेऽसत्याधर्मयोः प्रादुर्भावः, गृहस्थ-धर्मः, अतिथिसत्कारः चतुर्णां वर्णानां कर्त्तव्यानि च इत्येते विषयाः वर्णिताः। **द्वितीयाध्याये** - गृहस्थधर्मः, कृषि-कर्मणो नियमाः, क्षेत्रानुसारेण वलीवर्दयज्ञः, वली-वैश्वदेवफलादिकञ्च विवेचितानि। **तृतीयाध्याये** - चतुर्णां वर्णानां

जनन-मरणाशौचविचारः, सपिण्डविचारः, शुद्धिविचारः, मरणे वर्णादीनां स्पर्शाशौचविचारः च इत्यादिविषयाः निरूपिताः। **चतुर्थाध्याये** - क्रोधादात्महननविचारः, आत्मघातिसंस्कार-प्रायश्चित्तम्, रजःस्वलाशुद्धिः, स्त्रीव्रतानि, भर्त्तृनिन्दाकुफलम्, गर्भपातस्य प्रायश्चित्तमित्यादिकं प्रतिपादितम्। ततः कुणु-गोलक-क्षेत्रज-औरस-कृत्रिम-दत्तकादिपुत्राणां विवरणम्, सतीस्त्रीप्रशंसादिकञ्च अत्र विवृतम्। **पञ्चमाध्याये** - ब्राह्मणब्राह्मण्योः स्वदंशनप्रायश्चित्तम्, अग्निहोत्रिदाहविधिश्च वर्णितः। **षष्ठाध्याये** - पशुपक्षिहिंसायाः प्रायश्चित्तम्, भूमिशुद्धिव्यवस्थादिकञ्च प्रतिपादितम्। **सप्तमाध्याये** - द्रव्यशुद्धिः, चमसादिपात्रशुद्धिः रजःस्वलाशुद्धिः च इत्यादिशुद्धिव्यवस्थाः प्रतिपादिताः। **अष्टमाध्याये** - गायत्री-रहितब्राह्मण्स्य निन्दा, देवमन्दिरे प्रायश्चित्त-व्यवस्था, गोवधप्रायश्चितादिकञ्च चर्चितम्। **नवमाध्याये** - विविधगोवधे प्रायश्चित्तम्। **द्वादशमाध्याये** - वर्णानां पापमुक्त्युपायः, विविधमहापातकप्रायश्चित्तं च वर्णितम्। **एकादशाध्याये** - भक्ष्याभक्ष्यविचारः, अभक्ष्य-भक्षणप्रायश्चित्तम्, विधिपूर्वकं पञ्चगव्यप्राशनविधानम्। **द्वादशाध्याये** - पञ्चविधस्नान-विचारः, आचमनविधिः, संसर्गदोषप्रायश्चित्तादिकञ्च निरूपितम्।

## अत्रिसंहिता

ग्रन्थेऽस्मिन् अत्रिप्रोक्ताः धर्मशास्त्रोपदेशाः उक्ताः। ते च शुद्धिप्रकरणम्, प्रायश्चित्तम्, दानफलम्, श्राद्धफलम्, आचारहीनब्राह्मणस्वरूपम्, धर्मफलम् इत्यादयो विषयाः वर्णिताः।

**हारीतस्मृतिः** - अस्यां स्मृतौ वर्णाश्रमधर्माः, ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाः इति चतुर्विधाश्रमधर्माः, योगधर्मश्च विषया वर्णिता विद्यन्ते।

**बाधूलस्मृतिः** - ग्रन्थेऽस्मिन् गृहस्थधर्मस्य प्रातरारभ्य सायं पर्यन्तं क्रियमाणानां नित्यनैमित्तिककर्मणां, बाह्य-आभ्यन्तरशौचस्य, तिलकधारणम् इति विषया वर्णितास्सन्ति।

**आङ्गीरसस्मृतिः** - प्रायश्चित्तविधानम्, जलपानविधानम्, उच्छिष्टभोजनविषयः, वस्त्रधारणम्, भोजनम्, दानम्, च इत्यादिविषयाः इह विवृताः सन्ति।

**संवर्तस्मृतिः** - ब्रह्मचर्यवर्णनम्, धर्मवर्णनम्, कन्याविवाहः, अशौचम्, पाप-प्रायश्चित्तम्, गोदानमाहात्म्यम्, दिनचर्यावर्णनम्, वानप्रस्थ-यतिधर्मः, सुरापाननिषेधः, जीवहत्यानिषेधः, अभक्ष्यभक्ष्यम्, उपवास-व्रतम्, ब्राह्मणभोजनम्, गायत्रीप्राणायामादयो विषयाः प्रतिपादिताः वर्तन्ते।

**यमस्मृतिः** - नानाविधप्रायश्चित्तवर्णनम्, यज्ञतडागकूपादिनिर्माणविधानम् इति विषया अत्र वर्णिताः सन्ति।

**आपस्तम्बस्मृतिः** - गोधनादिविषयः, गोहत्यानिषेधः, शुद्धिः, अशुद्धिः, वस्त्रधारणम्, विवाहः, सुरादिसेवननिषेधः, दूषितान्नभोजननिषेधः इति विषया अत्र वर्णिताः सन्ति।

**बृहस्पतिस्मृतिः** - सुवर्णदानम्, भूमिदानम्, गोचर्मलक्षणम्, नीलवृषभलक्षणम्, भूमिहरणफलम्, तडागादिनिर्माणम् इत्यादयो विषया अत्र आलोचिताः सन्ति।

**कात्यायनस्मृतिः** - उपनयनसंस्कारः, नित्यं नैमित्तिकं च कर्मणी, श्राद्धप्रकरणम्, शमी-गर्भ-काष्ठ-अश्वत्थवृक्षाणां महिमा, स्नान-सन्ध्योपासन-तर्पण-पञ्चमहायज्ञ-ब्रह्मयज्ञ-श्राद्धवर्णन-विवाहादिहोमविधान-स्त्रीधर्म-मृतदाहसंस्कार-प्रायश्चित्तानि इति विषयाः वर्णिताः।

**व्यासस्मृतिः** - वर्णविभागः, अनुलोम-प्रतिलोमजातीनां संज्ञा, कर्म-संस्कार-विवाह-गृहस्थधर्म-स्त्रीधर्म-नित्यनैमित्तिककर्म-तीर्थधर्म-दानधर्म-सांस्कृतिकजीवनम् इति विषयाः वर्णिताः सन्ति।

**शङ्खस्मृतिः** - चतुर्वर्णानां पृथक् पृथक् कर्म, गर्भाधानात् उपनयनपर्यन्तं संस्कारः, ब्रह्मचर्यम्, विवाहः, पञ्चमहायज्ञः, वानप्रस्थधर्मः, प्राणायामः, ध्यानम्, स्नानम्, तर्पणम्, श्राद्धम्, अशौचम्, द्रव्यशुद्धिः, मृन्मयादिपात्रशुद्धिः, पापानां प्रायश्चित्तानि च। एते विषयाः प्रतिपादितास्सन्ति।

**लिखितस्मृतिः** - इष्टकर्म, पूर्तकर्म, बलिवैश्वदेव-अतिथिपूजनम्, सांस्कृतिकजीवनम्, अशौचवर्णनम् इति।

**दक्षस्मृतिः** - आश्रमवर्णनम्, दिनचर्याकर्म, वैदिककर्म, गृहस्थाश्रमः, नवकर्म, स्त्रीधर्मः, शौचम्, अशौचम्, समाधिः, योगः, इन्द्रियनिग्रहः, अध्यात्मयोगसाधना इत्येते विषयाः समालोचिता विद्यन्ते।

**गौतमस्मृतिः** - आचारवर्णनम्, ब्रह्मचारिवर्णनम्, विवाहप्रकरणम्, गृहस्थाश्रमः, आपद्धर्मः, संस्कारः, कर्तव्याकर्तव्ये, राजधर्मः, दण्डविधानम्, अशौचम्, श्राद्धम्, अनध्यायः, भक्ष्याभक्ष्ये, पापकर्मफलम्, सम्पत्तिविभागः इति विषया अत्र प्रतिपादिताः सन्ति।

**शातातपस्मृतिः** - अकृतप्रायश्चित्तम्, पूर्वजन्मकृतप्रायश्चित्तम्, ब्राह्मणमहत्त्वम्, कुष्ठनिवारणम्, सर्वपापप्रायश्चित्तम्, प्रकीर्णरोगाणां प्रायश्चित्तम्, कुलध्वंसः, मुधतैलधातूनां चौर्ये प्रायश्चित्तम्, अनुचितव्यवहारनिमित्तं प्रायश्चित्तम् इति विषयाः वर्णिताः सन्ति।

# शब्दार्थः

| | |
|---|---|
| हृद्गतान् | हृदयस्थान् |
| विज्ञेयः | ज्ञातव्यः |
| आभारतम् | सम्पूर्णे भारते |
| निखिलविश्वम् | सम्पूर्णं जगत् |
| सृष्टिक्रमः | सर्गप्रक्रिया |
| धर्मनिष्पत्तिः | धर्मोद्भवः |
| समावर्तनम् | वेदाध्ययनानन्तरं गार्हस्थादिकारप्रयोजकं कर्म |
| गात्राणाम् | शरीराणाम् |
| द्रव्यशुद्धिः | धनशुद्धिः |
| राज्याधिकारिणः | राजकर्मचारिणः |
| श्राद्धकल्पः | श्राद्धविधिः |
| शाश्वतम् | नित्यम् |
| वृत्तीनाम् | जीविकानाम् |
| सङ्कीर्णानाम् | सङ्कुचितानाम् |
| आपद्धर्मः | आपत्तिकाले क्रियमाणः धर्मः |
| निःश्रेयसम् | निश्चितं श्रेयः, मोक्षः |
| पाखण्डः | वेदविरुद्धाचारवान् |
| स्नातकधर्मः | गार्हस्थधर्मः |
| उपनिधिः | उपन्यस्तवस्तु, स्थाप्यद्रव्यम् |
| लेख्यम् | साक्षिसम्बन्धि |
| दायविभागः | सम्पत्तिविभाजनम् |

# अभ्यासः

## १. एकवाक्येन प्रश्नाः समाधेयाः।

(क) धर्मशास्त्रस्य अपरं नाम किम् ?

(ख) सामान्यतया स्मृतिषु कति विषयाः भवन्ति ?

(ग) याज्ञवल्क्यस्मृतौ कति अध्यायाः वर्तन्ते ? के च ते ?

(घ) कलौ युगे का स्मृतिः प्रामुख्यं भजते ?

(ङ) तिलकधारणविधेः विषयः कस्यां स्मृतौ वर्तते ?

## २. पूर्णवाक्येन उत्तरत।

(क) मृतदाहसंस्कारः कस्यां स्मृतौ अस्ति ?

(ख) मनुस्मृतेः द्वितीयाध्याये के विषयाः वर्णिताः ?

(ग) महर्षिः पराशरः कस्य पिता आसीत् ?

(घ) मनुस्मृतौ कति श्लोकाः वर्तन्ते ?

(ङ) पराशरस्मृतौ कति अध्यायाः सन्ति ?

## ३. रिक्तस्थानानि पूरयत -

(क) जगतश्च समुत्पत्तिं .................... परं विधिम्॥

(ख) संसारगमनं चैव ........................... गुणदोषपरीक्षणम्॥

(ग) कृते तु मानवो ............................ कलौ पाराशरस्मृतिः॥

(घ) पाराशरस्मृतौ एकादशाध्याये ........................... पञ्चगव्यपानविधानम्।

(ङ) शातातपस्मृतिः ................................कुष्ठनिवारणम्।

(च) सुवर्णदानम्, भूमिदानम् ................................ अत्र आलोचिताः सन्ति।

## ४. अधोलिखिनां शब्दानां प्रकृतिप्रत्ययौ विभजत -

| | प्रकृतिः + प्रत्ययः |
|---|---|
| (क) अधीत्य | ............+...............। |
| (ख) अनुशासनम् | ............+...............। |
| (ग) भक्ष्यम् | ............+...............। |
| (घ) स्मृतः | ............+...............। |

(ङ) सन् ............+..............।

(च) लब्धुम् ............+..............।

(छ) योगः ............+..............।

५. सन्धिविच्छेदं कृत्वा सन्धिसूत्राणि लिखत।

| | | सन्धिविच्छेदः | सन्धिसूत्राणि |
|---|---|---|---|
| (क) | प्रायच्छन् | ............+........... | ....................। |
| (ख) | यथोक्तम् | ............+........... | ....................। |
| (ग) | वेदो विज्ञेयः | ............+........... | ....................। |
| (घ) | शास्त्रन्तु | ............+..........+.......... | ..................। |
| (ङ) | अनुसृत्यैव | ............+........... | ....................। |
| (च) | एतान्येव | ............+........... | ....................। |

६. समुचितं युग्मम्।

| | | |
|---|---|---|
| (क) | मनुस्मृतिः | गायत्रीप्राणायामौ |
| (ख) | कल | गौतमस्मृतिः |
| (ग) | कृते तु मानवो धर्मः | लिखितस्मृतिः |
| (घ) | संवर्तस्मृतिः | आर्यावर्तवर्णनम् |
| (ङ) | अतिथिपूजनम् | त्रेतायां गौतमः स्मृतः |
| (च) | अनाध्यायः | पाराशरस्मृतिः |

७. अधोलिखितानि पदान्याश्रित्य कारकविभक्ती निर्णयत।

(क) श्रुतिस्तु वेदो विज्ञेयः।

(ख) महर्षिणा मनुना विरचिता इयं मनुस्मृतिः।

(ग) गायत्री-रहितस्य ब्राह्मणस्य निन्दा।

(घ) द्वापरे शाङ्खलिखिता कलौ पाराशरः स्मृतः।

(ङ) मनुस्मृतिः निखिलविश्वं मानवधर्मम् उपदिशति।

८. प्रोयगपरिवर्तनं कुरुत।

(क) कलौ युगे पाराशरस्मृतिः प्रामुख्यम् आवहति।

(ख) महर्षिपराशरः वेदव्यासस्य पिता आसीत्।

(ग) मनुस्मृतौ द्वादश अध्यायाः सन्ति।

(घ) महर्षिणा मनुना विरचिता मनुस्मृतिः।

(ङ) मनुस्मृतिः निखिलविश्वं मानवधर्मम् उपदिशति।

९. **क्रियापदमाश्रित्य वाक्यानि रचयत।**

(क) आवहति ............................................।

(ख) विद्यन्ते ............................................।

(ग) आसीत् ............................................।

(घ) उपदिशति ............................................।

(ङ) प्रतिपादयति ............................................।

(च) भजते ............................................।

१०. **स्मृतीनां सामाजिकोपयोगिताविषये संस्कृतभाषया/मातृभाषया/आङ्ग्लभाषया वा निबन्धात्मकं वर्णनं कुरुत।**

११. **अधोलिखितं श्लोकमाश्रित्य स्वभाषया त्रिंशता वाक्यैः निबन्धं लिखत।**

कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः।
द्वापरे शाङ्खलिखिता कलौ पाराशरस्मृतिः॥

## योग्यताविस्तारः

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥**

*(मनुस्मृतिः ६.९२)*

**अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।**
**दानं दमो दया शान्तिः सर्वेषां धर्मसाधनम्॥**

*(याज्ञवल्क्यस्मृतिः १.१२२)*

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥**

*(पद्मपुराणम्, सृष्टिखण्डे 19/357-358)*

ब्रह्मचर्येण सत्येन तपसा च प्रवर्तते।
दानेन नियमेनापि क्षमा शौचेन वल्लभ॥
अहिंसया सुशांत्या च अस्तेयेनापि वर्तते।
एतैर्दशभिरगैस्तु धर्ममेव सुसूचयेत्॥

(पद्मपुराणम्)

सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः।
अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम्॥
संतोषः समदृक् सेवा ग्राम्येहोपरमः शनैः।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम्॥
अन्नाद्यादे संविभागो भूतेभ्यश्च यथार्हतः।
तेषात्मदेवताबुद्धिः सुतरां नृषु पाण्डव॥
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः।
सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम्॥

नृणामयं परो धर्मः सर्वेषां समुदाहृतः।
त्रिशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति॥

*(श्रीमद्भागवतम् सप्तमस्कन्धे ११-८ से १२ )*

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥
तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।
वर्णानां सान्तरालानां स सदाचार उच्यते॥
सरस्वती-दृषद्वत्योः देवनद्योर्यदन्तरम्।
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते॥
आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः॥
नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत्।

पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणाऽन्विते॥
वेदमेव सदाभ्यस्येत्तपस्तप्यन्द्विजोत्तमः।
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥
चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधिः॥
सर्वेषामपि पापानां सङ्कटे समुपस्थिते।
शतसाहस्रमभ्यस्ता गायत्री शोधनं परम्॥

# महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

## माध्यमेन सञ्चालिता प्रस्ताविता च राष्ट्रीयादर्शवेदविद्यालयः




महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in